CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सरस्वतीभवन-ग्रन्थमाला [

[१२६]

वाक्यपदीयपाठभेदनिर्णयः

[द्वितीयो भागः]

[illegible]

[illegible]

सम्पादकः

[illegible]

[illegible]

[illegible]

[illegible]

वाराणसी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

132

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Anamol Kumar

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

SARASVATĪBHAVANA-GRANTHAMĀLĀ

[Vol. 116]

VĀKYAPADĪYAPĀṬHABHEDANIRṆAYA

[PART TWO]

WRITTEN AND EDITED
BY
'PADMAŚRĪ' PT. RAGHUNĀTHA ŚARMĀ

ASSISTANT EDITOR
DR. NARENDRA NĀTHA PĀṆDEYA
Professor & Head of Deptt.
Prācīna Rājaśāstra–Arthaśāstra Department
Sampurnanand Sanskrit University
Varanasi

VARANASI
1991

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi–221 002.

□

First Edition, 1000 Copies
Price Rs. 86·00

□

Printed by—
Gaurishankara Press,
Madhyameshvara,
Varanasi–1.

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सरस्वतीभवन-ग्रन्थमाला

[११६]

वाक्यपदीयपाठभेदनिर्णयः

[द्वितीयो भागः]

प्रणेता सम्पादकश्च

'पद्मश्रीः' पण्डितरघुनाथशर्मा

सहायकसम्पादकः

डॉ० नरेन्द्रनाथपाण्डेयः

आचार्योऽध्यक्षश्च

प्राचीनराजशास्त्रार्थशास्त्रविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणसी

वाराणस्याम्

२०४८ तमे वैक्रमाब्दे १९१३ तमे शकाब्दे १९९१ तमे ख्रैस्ताब्दे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुसन्धानप्रकाशनपर्यवेक्षक:—
निदेशक:, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

□

प्रकाशक:—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभाग:,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्— ८६=०० रूप्यकाणि

□

मुद्रक:—
गौरीशङ्कर-प्रेस
मध्यमेश्वर, वाराणसी–१ ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्ररोचना

पण्डितवर्याणां प्रथितयशसां **श्रीमद्रघुनाथशर्मणाम्** आजीवनं मनोयोगो 'वाक्यपदीये' आसीत् । महतो व्याकरणागमस्य वाक्यपदीयग्रन्थस्य **अम्बाकर्त्री**ति टीका तैर्विरचिता, अस्माभिः प्रकाशिता च । तस्यैव ग्रन्थस्य पाठभेदविषये बहु विचिकित्सितं विद्वद्भिः । सर्वासां विचिकित्सानामुद्भावना समाधानञ्च पण्डितवर्यैर्यत्प्रस्तुतम्, तदस्माभिः क्रमशः प्रकाश्यते । पाठभेदनिर्णयस्याधुना द्वितीयः खण्डः प्रकाश्यतामानीयते, तृतीयश्च खण्डो मुद्रणाधीनः । शीघ्रमेव सोऽपि प्रकाशयिष्यते ।

खेदस्यायं विषयो यत् ते साम्प्रतं यशःशरीरे स्थिताः । तेषां मनो नूनमेव प्रसादमन्वभविष्यत्, यदि तेऽवर्तिष्यन्त । तै रचितस्यास्य ग्रन्थस्य सम्पादने तेषां सुयोग्येन पुत्रेणायुष्मता **श्रीनरेन्द्रनाथपाण्डेयेन** यन्महता श्रमेण सम्पादनादिकं विहितम्, तदर्थं तम् आशीर्वचसा सभाजयामि, दिवङ्गतेभ्यः पण्डितवर्येभ्यः प्रणामाञ्जलिं च निवेदयामि ।

वाराणस्याम्
श्रावणीपूर्णिमायाम्,
वि० सं० २०४८

विद्यानिवासमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राक्कथनम्

श्रीभर्तृहरेः सर्वस्वं **वाक्यपदीयम्** । एतच्च **अम्बाकर्त्र्या** आम्रेडितेन वेत्स्यन्ति विद्वांसः । इदं खलु अद्वैतदर्शनं शब्दब्रह्मनिरूपणपरम् । एतस्य च सम्प्रदायपरम्परा एवं श्रूयते । व्याडिः किल सङ्ग्रहनामकं निबन्धं लक्षश्लोकसंख्यापरिमितं निबबन्ध । स च गौरवाद् भीतैरध्येतृभिः समुपेक्षणात् लुप्तः । ततो भर्तृहरेर्गुरुणा वसुरातेन स एव आगमः संगृहीतः । तमेवागमं समालम्ब्य भर्तृहरिणा अयं ग्रन्थो निबद्धः ।

अयञ्च ग्रन्थोऽष्टादशशती कारिकात्मको दुरूहः । अस्य ग्रन्थस्य व्याख्या प्रथम-खण्डे भर्तृहरिणा स्वयं लिखिता समुपलभ्यते । मन्ये काण्डद्वयस्यान्यस्यापि व्याख्या अनेन कृता आसीत्, सा च द्वितीयकाण्डे विच्छिन्ना समुपलभ्यते, तृतीयकाण्डे च नैवोपलभ्यते । द्वितोय-तृतोयकाण्डयोः टोकाद्वयं समुपलभ्यते काशी-चौखम्भा-पुस्तकालये । तत्र प्रथमा व्याख्या पुण्यराजकृता द्वितीयकाण्डे । द्वितीया च तृतोय-काण्डे हेलाराजकृता । इदमेव च काण्डत्रयस्य टीकात्रयं समालम्ब्य मया महता श्रमेण अम्बाकर्त्री व्याख्या विरचिता । मदीया च अम्बाकर्त्री-व्याख्या, प्राचोनव्याख्या अवलम्बमाना न प्रविशति दोषपङ्केषु इति मन्ये । किञ्च, अपूर्वा अपि पदार्था अम्बा-कर्त्र्यां शास्त्रान्तराणि समाश्रित्य लिखिता इति अम्बाकर्त्री अपूर्वैव काचन टोका समजनि । एवमतिदुरूहोऽयं वाक्यपदोयग्रन्थो विद्वद्भिः समादृतोऽपि पदे पदे मूलटीकायाञ्च अयुतात् परैः पाठभेदैः दुष्पठो जातः ।

एतद् विचिन्त्य मया पाठभेदनिर्णयात्मको ग्रन्थो महता श्रमेण सम्पादितः । नूनं मम अनेन श्रमेण विदुषामुपकारो मोदश्च भविष्यतीति वेदयन् विस्तराद् विरमामि ।

यदलम्भि किमपि पुण्यं पङ्कद्वैतेषु सन्निमग्नानां
श्रीमद्धरिसुरभीणाम् अतिजरतीनां समुद्धरणात् ।
सर्वं पितृपदाब्जे स्मारं स्मारं निवेद्याहं शम्भुं
याचे चेतो नित्यं मे निर्मलं भवतात् ॥

रघुनाथशर्मा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रास्ताविकम्

वाक्यपदीयपाठभेदनिर्णयः पितृपादैर्विहित इदानीं जातिसमुद्देशं क्रोडीकृत्य प्राकाश्यं याति। अम्बाकर्त्रीलेखनप्रसङ्गे पाठाशुद्धीनां बाहुल्यं दृष्ट्वा एष निर्णयः कृतो विद्वद्वरैः वाक्यपदीयस्य उद्धाराय। अत एव प्रारम्भेऽत्रोच्यते—

हरेर्जरद्गवी द्वैतपङ्के मूढैः प्रवेशिता।
तदुद्धाराय सज्जस्य ममैष सफलः श्रमः॥

अयं श्लोकः ग्रन्थकर्तुर्भावान् उद्देश्यञ्च स्पष्टयन् ग्रन्थगौरवमपि सूचयति। सहेतुकः पाठभेदनिर्णयोऽत्र क्रियमाणः अध्येतॄणां प्रज्ञावैशारद्याय भविष्यतीति दृढो विश्वासः। टीकालेखनसमये पाठाशुद्धीनां बाहुल्याद् महत्कष्टमनुभवद्भिरपि लेखकैः पाठः संशोधितः; किन्तु युक्तयो न प्रदर्शिताः, अत्र तु युक्तीनामेव प्राधान्यम्। एकस्मिन् प्रसङ्गे—

गौरिवासितपक्षस्य सामुदे चारुहासिनि।
अहेः पञ्चपदानीव त्वमेव शरणं मम॥

इति श्लोको वाक्यपदीयटीकायां समागतो व्याख्यायमान आसीत्। तदानीं पितृपादैः सङ्गतस्य ममापि अयं श्लोकः कर्णविवरयोः प्रविष्टः। असकृदनुध्यानेऽपि अर्थस्फुरणाभावे तैः संशोधितः श्लोकः श्रावितः—

ग्लौरिवासितपक्षस्य साऽमुदे चारुहासिनि।
आहेः पञ्चपदानीव त्वमेव शरणं मम॥

हे चारुहासिनि! असितपक्षस्य ग्लौः चन्द्र इव सा अम्बा मम अमुदे मोदाय न भवति। किं बहुना, यथा आह-धातोः (ब्रुवः पञ्चानामादितः "आहो ब्रुवः" इति विहितस्य) लिटि पञ्चपदान्येव शरणम्, अन्यत्र प्रयोगाभावात्, तथैव त्वमेव मम शरणम्, इत्यर्थोऽपि तदानीमेव श्रुतः।

निदर्शनेनानेन पाठभेदनिर्णयस्यावश्यकता निर्णयाभावे च ग्रन्थस्य दुरूहता स्पष्टा भवति। इदं तु एकमुदाहरणम्। सुदीर्घकालप्रवाहपतितस्यास्य ग्रन्थस्य प्रतिपङ्क्ति एतादृश्योऽशुद्धयो व्याख्यानसमये व्याख्यावरान् नितरां मोहाम्भोधौ अपातयन्, अत एव पराम्बानुकम्पया मया एष ग्रन्थो व्याख्यात इत्यासीत् तेषामुद्गारः, अत एव तैरुच्यते—

पाठभेदमहाम्भोधौ निमग्नस्य तितीर्षतः।
मम मातृपदद्वन्द्वमवलम्बं भविष्यति॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदानीं कानिचन उदाहरणानि प्रस्तूयन्ते—

हेलाराजीयद्वितीयमङ्गलपद्ये प्रथमपृष्ठे 'सिद्धान्तार्थसतत्त्वतः' इति पाठो गृहीतः शुद्धतया। सिद्धान्तार्थानां सतत्त्वं तत्त्वेन सहितं तात्त्विकं रूपमादाय अस्माभिरयं प्रबन्धो विहित इति योजनां प्रदर्श्य अग्रे—अत्र ल्यब्लोपे पञ्चमी तदन्तात्सार्वविभक्तिकस्तसिर्बोध्य इति अर्थस्फोरणायोक्तम्, योजनायाञ्च तात्त्विकं रूपमादायेति ल्यबन्तपदमपि प्रदर्शितम्।

अग्रे प्रथमपृष्ठ एव—

प्रबन्धो विहित इति, प्रयत्नो विहित इति पाठद्वयस्य निर्णयप्रसङ्गे 'यद्यपि द्वितीयपाठेऽपि प्रबन्धविषयकः प्रयत्नः, इत्यर्थकरणेनार्थसंगतिरस्त्येव, तथाऽपि सोऽर्थो दुःखलभ्यः प्रकरणादिति श्रुत्या प्रमाणेनानुगृहीतोऽयमेव पाठः प्राथमिको युक्त इत्युक्तम्। एतादृशस्थलानां व्युत्पत्त्याधायकत्वं स्फुटम्। तथा हि—प्रथमपाठेऽर्थसङ्गतिं प्रदर्श्य तस्य युक्तता प्रदर्शिता पूर्वम्, प्रयत्नो विहित इति द्वितीयपाठस्य सर्वथाऽसाङ्गत्यं कादाचित्कत्वं वेति विचारावसरे प्रयत्नपदेन प्रकरणात् प्रबन्धविषयकप्रयत्नमादाय कथञ्चिदर्थसङ्गतिरपि प्रदर्शिता। उभयत्रार्थसङ्गतिसत्त्वेऽपि प्रथमस्य युक्ततरत्वप्रतिपादनाय 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां (समवाये) पारदौर्बल्यमर्थविप्रकर्षात्' (३।३।१४) इति मीमांसान्यायः प्रदर्शितः।

षष्ठमपृष्ठे-बाह्यस्येति, अबाह्यस्येति पाठयोर्निर्णयप्रसङ्गे "तथाऽपि बुद्धया निर्वर्तनम् आन्तरस्यैवार्थस्य, न तु बाह्यस्येति अबाह्यस्येति पाठ एव युक्तः" इत्युक्तम्। एवञ्च बाह्यार्थस्य निष्पत्तिः सामग्रीमपेक्षते न केवलां बुद्धिमिति सूचितम्।

कुत्रचित् पदवैय्यर्थ्यादपि पाठाशुद्धिः प्रतिपादिता, यथा अष्टमपृष्ठे—नामाख्याताभ्यां पृथग्विभक्तौ इति पाठे पृथग् इति पदस्य वैयर्थ्येन तस्याशुद्धिः प्रदर्शिता।

एवं निदर्शनरूपेण द्वित्राणि स्थलानि प्रदर्शितानि विस्तरतस्तु ग्रन्थाध्ययनेन स्वयमेव पाठका ज्ञास्यन्ति। ग्रन्थस्यास्याध्ययनेन नूनं शास्त्रेषु विभिन्नेषु अध्येतॄणां प्रवेशो भविष्यतीति विश्वसिमि।

वाराणस्याम्
वैशाखपूर्णिमायाम्,
२०४८ वैक्रमाब्दे
(२८।५।१९९१ खै स्ताब्दे)

नरेन्द्रनाथपाण्डेयः
आचार्योऽध्यक्षश्च,
प्राचीनराजशास्त्रार्थशास्त्रविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषयानुक्रमणिका

विषयाः	कारिका-संख्या	पृष्ठाङ्काः
द्विधा कैश्चित् पदम् इति	१	२–२०
पदार्थानामपोद्धारे इति	२	२०–२५
केषाञ्चित्साहचर्येण इति	३	२६–३०
अस्वातन्त्र्यफलो बन्धि	४	३०–३४
संश्लेषमात्रं बध्नातिर्यदि	५	३४–४६
स्वाजातिः प्रथमं शब्दैरिति	६	४६–५५
यथा रक्ते गुणे तत्त्वमिति, तथा शब्दार्थसम्बन्धादिति	७-८	५५–६६
जातिशब्दैकशेषे सा	९	६६–७०
या शब्दजातिः शब्देषु	१०	७०–७१
अर्थजात्यभिधानेऽपि	११	७१–७८
जातौ पदार्थे जातिर्वा	१२	७८–८२
द्रव्यधर्मा पदार्थे तु	१३	८२–८६
अनुप्रवृत्तिधर्मो वा	१४	८६–९३
संयोगि धर्मभेदेन	१५	९३–१०१
आदेशानां घटादीनामिति	१६	१०१–१०३
भिन्नवस्त्वाश्रया बुद्धिः	१७	१०३
अतः संयोगिदेशानां	१८	१०४–१०७
अनुप्रवृत्तिरूपां यामिति	१९	१०७–११०
भिन्ना इति परोपाधिरिति	२०	१११
नैकत्वं नापि नानात्वमिति	२१	१११–११२
सर्वशक्त्यात्मभूतत्वमिति	२२	११३
तस्माद् द्रव्यादयः सर्वाः	२३	११३
यथैव चेन्द्रियादीनामिति	२४	११३–११९
न तदुत्पद्यते कश्चिदिति	२५	११९–१२०
कारणेषु पदं कृत्वा	२६	१२०
निर्वर्त्यमानं यत्कर्म	२७	१२०–१२३
विधौ वा प्रतिषेधे वा	२८	१२३–१२७
यथा जलादिभिर्व्यक्तं	२९	१२७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथेन्द्रियगतो भेदः	३०	१२७
यथात्मरूपग्रहणात्	३१	१२८–१३३
सत्यासत्यौ तु यौ भागौ	३२	१३३–१३५
सम्बन्धिभेदात् सत्तैव	३३	१३५–१३६
तां प्रातिपदिकार्थञ्च	३४	१३६–१३९
प्राप्तक्रमा विशेषेषु	३५	१३९–१४१
सैव भावविकारेषु	३६	१४१–१४३
आत्मभूतः क्रमोऽप्यस्याः	३७	१४३
तिरोभावाभ्युपगमे	३८	१४३–१४५
पूर्वस्मात्प्रच्युताधर्मात्	३९	१४५–१४७
आश्रयः स्वात्ममात्रा वा	४०	१४७–१५१
पृथिव्यादिष्वभिव्यक्तौ	४१	१५१–१५४
अनुच्छेद्याश्रयामेके	४२	१५४–१५५
प्रकृतौ प्रविलीनेषु	४३	१५५–१५७
ब्राह्मणत्वादयो धर्मा	४४	१५७
चित्रादिष्वप्यभिव्यक्तिरिति	४५	१५८–१६०
ज्ञानं त्वस्मद्विशिष्टानामिति	४६	१६०–१६८
जात्युत्पलादिगन्धादाविति	४७	१६९–१७१
अस्वशब्दाभिधानास्तु	४८	१७१–१७३
जात्यवस्थापरिच्छेदे	४९	१७३–१७५
लक्षणाशब्दसंस्कारे	५०	१७५–१८०
न विना सङ्ख्यया कश्चित्	५१	१८०–१८१
एकत्वं वा बहुत्वं वा	५२	१८१–१८२
यद्येतौ व्याधितौ स्यातां	५३	१८२–१८३
एकादिशब्दवाच्यायाः	५४	१८३–१८५
यजेत पशुनेत्यत्र	५५	१८५–१८७
लिङ्गात्तु स्याद् द्वितीयादेरिति	५६	१८७–१८९
अन्यत्राविहितस्यैव	५७	१८९–१९१
ग्रहास्त्वन्यत्र विहिता	५८	१९१
अङ्गत्वेन प्रतीतानामिति	५९	१९१–१९४
नान्यत्र विधिरस्तीति	६०	१९५
सम्मार्जने विशेषश्चेति	६१	१९६
प्रत्याश्रयं समाप्तायामिति	६२	१९७–१९८
एकेन चेत्प्रसिद्धायामिति	६३	१९८–१९९

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथैवाहितगर्भायामिति	६४	१९९-२००
तावतार्थस्य सिद्धत्वादिति	६५	२००-२०१
द्वितीयादिषु यल्लिङ्गमुक्तमिति	६६	२०१-२०२
अन्वयव्यतिरेकाभ्यामिति	६७	२०२-२०४
साधनत्वे पदार्थस्य इति	६८	२०४-२०६
अपूर्वस्य विधेयत्वादिति	६९	२०६-२०७
संमार्गस्य विधेयत्वादिति	७०	२०७-२०९
विधिवाक्यान्तरे सङ्ख्या इति	७१	२०९-२११
निर्ज्ञातद्रव्यसम्बन्धे	७२	२११-२१३
कश्चिदेव गुणो द्रव्ये इति	७३	२१३
तयोस्तु पृथगर्थित्वे इति	७४	२१४-२१६
क्रियया योऽभिसम्बन्ध इति	७५	२१६-२१८
तत्र द्रव्यगुणाभावे इति	७६	२१८
यदा तु जातिः शक्तिर्वा इति	७७	२१९
जातीनाञ्च गुणानाञ्चेति	७८	२१९-२२०
व्यक्तिशक्तेः समासन्ना इति	७९	२२०-२२२
साम्येनान्यतराभावे	८०	२२२-२२३
जातेराश्रितसंख्यायाः	८१	२२३
पराङ्गभूतमिति	८२	२२३-२२४
यजेत पशुनेत्यत्र	८३	२२४
यावतां सम्भवो यस्येति	८४	२२५
संमृज्यमानतन्त्रे तु	८५	२२५-२२६
शिष्यमाणपरे वाक्ये इति	८६	२२६-२२७
समासप्रत्ययविधाविति	८७	२२७-२३०
गुणेऽपि नाङ्गीक्रियते इति	८८	२३०-२३१
यस्यान्यस्य प्रसक्तस्येति	८९	२३१-२३७
सरूपसमुदायात्तु इति	९०	२३७-२४०
प्रत्ययस्य प्रधानस्येति	९१	२४०-२४१
अभेदरूपं सादृश्यमिति	९२	२४१-२४२
दण्डोपादित्सया दण्डमिति	९३	२४२-२४३
नेच्छानिमित्तादिच्छावानिति	९४	२४३-२४६
स्वभावोऽव्यपदेश्यो वा	९५	२४६-२४९
यदा भेदान् परित्यज्य	९६	२४९-२५१

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भेदरूपैरनुस्यूतमिति	९७	२५१–२५२
सकृत् प्रवृत्तावेकत्वमावृत्तौ	९८	२५२–२५४
अनुप्रवृत्तेति यथा	९९	२५४–२५५
सरूपाणां च सर्वेषामिति	१००	२५५–२५६
ज्ञानशब्दार्थविषया इति	१०१	२५६–२५७
ज्ञानेष्वपि यथार्थेषु इति	१०२	२५७
ज्ञेयस्थमेव सामान्यमिति	१०३	२५८
यथा ज्योतिः प्रकाशेन	१०४	२५८–२५९
घटज्ञानमिति ज्ञानम्	१०५	२५९–२६०
यतो विषयरूपेण	१०६	२६०–२६३

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाक्यपदीयपाठभेदनिर्णयः

तृतीयं काण्डम्

(जातिसमुद्देशः)

तरणिर्भवपारगतौ भवती सरणिर्भवपारगता भवती।
अरणिर्भवदावभवे भवती भवदावनिवारिणिका भवती॥ १।
शुण्डादण्डमिलन्मिलिन्दपटलीसंगीतझङ्कारकं
शृण्वन् मीलितलोचनो गजमुखो मां पातु सर्वापदः।
बालो मे क्व किलासबालरहित पृच्छत्यपर्णा मुहुः
कैलासं गिरिशं गुहं मृगपतिं यस्यात्ययाशङ्किनी॥ २।
मातृपादाब्जयुगलं वन्दे लोकोत्तरं मुहुः।
सदा विकसितं यच्च रजसानाधिभूयते॥३।
पाठभेदमहाम्भोधौ निमग्नस्य तितीर्षतः।
मम मातृपदद्वन्द्वमवलम्बं भविष्यति॥४।
हरेर्जरद्गवी द्वैतपङ्के मूढैः प्रवेशिता।
तदुद्धाराय सज्जस्य ममैष सफलः श्रमः॥५।

हेलाराजीये मङ्गलपद्यात्प्राक्—'निरन्तरायस्तात्' इति पाठः क्वचिद् दृश्यते, स तु न युक्तः; किन्तु 'निरन्तरायं स्तात्' इति युक्तं भाति निर्मक्षिकमितिवत्।

हेलाराजीये मङ्गलपद्ये प्रथमे—रुचिरम् इति, रुचिरः इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, विशेष्यस्य महिम्नः पुंस्त्वात्। अत एव 'अभिनवः' इति तद् विशेषणं दृश्यते।

अत्रैव पद्ये--'यत्परमाम्' इति, 'यात्परमाम्' इयि पाठद्वयं दृश्यते। तत्राद्य-पाठ एवार्थसंगत्या युक्तः।

अत्रैव पद्ये--'तनोति' इति, 'तनीति' इति, 'तनौति' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्याकरणेन संस्कृतत्वात्।

अत्रैव द्वितीयपद्ये--'सिद्धान्तार्थसतत्त्वतः' इति, 'सिद्धान्तर्थसतत्त्वशः' इति; 'सिद्धान्तार्थसतत्त्वग' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तोऽर्थसंगतेः।

तथा हि-- तत्र पाठे सिद्धान्तार्थानां स तत्त्वं तत्त्वेन सहितं तात्त्विकं रूप-मादाय अस्माभिरयं प्रबन्धो विहित इति योजना। अत्र ल्यब् लोपे पञ्चमी। तदन्तात्सार्वविभक्तिकस्तसिरत्र बोध्यः।

अत्रैव पद्ये 'प्रबन्धो विहितः', इति, 'प्रयत्नो विहितः' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः,अर्थसंगतेः। यद्यपि द्वितीयपाठेऽपि प्रबन्धविषयकः प्रयत्न

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यर्थकरणेनार्थसंगतिरस्त्येव; तथापि सोऽर्थो दुःखलभ्यः, प्रकरणादिति श्रुत्या प्रमाणेनानुगृहीतोऽयमेव पाठः प्राथमिको युक्तः ।

अत्रैव तृतीयपद्ये—'तच्छेषभूते' इति, 'तच्छेष्यभूते' इति पाठद्वयं दृश्यते । अत्राद्यपाठ एव युक्तः, अर्थसंगते । द्वितीयपाठे तु अर्थासंगतिः स्पष्टैव ।

द्विधा कैश्चित्तु पदक इति ॥ १ ।

अत्रावतरणे हेलाराजीये—'प्रयोजनादिपदार्थे' इति, 'प्रयोजनादि पदार्थे, इति पाठद्वयं दृश्यते । तत्राद्यपाठ एवं युक्तः, अर्थसंगतेः । द्वितीयपाठस्त्वनर्थकः । एतदग्रे—'अनन्तरकाण्डोपपादितोपपत्तिभिः' इति, अनन्तरेऽन्वपादितोपपत्तिभिरिति' पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीपाठे तु अर्थासंगतिः स्पष्टैव, अनन्तरकाण्ड उपपत्तीनामन्वा गादितत्वाभावात् ।

एतदग्रे हेलाराजीये—'अन्वाख्येयस्थितलक्षणयोरिति', 'अन्वाख्येयस्थितलक्षद्योरिति' पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, साधुत्वादर्थसंगतेश्च । द्वितीयपाठस्तु तदुभयाभावादयुक्तः ।

एतदग्रे हेलाराजीये एव—'तदौपयिकापोद्धाररूपपदविचारः' इति, 'तदपोद्धारकापोद्धाररूपपदविचारः' इति,'तदुपकारकापोद्धाररूपपदविचारः' इति पाठत्रयं दृश्यते । तत्राद्यतृतीयपाठावेव युक्तौ, अर्थसंगतेः । यद्यपि द्वितीयपाठोऽपि युज्यत एव, पदापोद्धारस्य अर्थापोद्धारं प्रति अन्वयव्यतिरेकाभ्यां हेतुत्वात् तथापि पादापोद्धारस्य अर्थापोद्धरं प्रति न कर्तृत्वम्, अचेतनत्वात्, अन्वयव्यतिरेकज्ञानवतश्चेतनस्यैव तत्कर्तृत्वात् । यदि तु हेतौ अचेतनेऽपि कर्तृप्रयोगः । 'घटो भवति' 'जलं प्रवहति, इत्यादि ।

अथ वा सर्वं चेतनमिति धातोः कर्मण इति सन् विधायकसूत्रस्थभाष्यसिद्धन्तमाश्रित्य अचेतनेऽपि कर्तृप्रयोग उपपाद्यः । 'तदपोद्धाररूपपदविचारः' इति पाठस्तु न युज्यते, पदविचारस्य अर्थापोद्धाररूपत्वाभावात् ।

अत्रैव—तदौपयिकापोद्धाररूपः पदविचार इति, तदौपयिकापोद्धाररूपपदविचार इति पाठद्वयं दृश्यते । तत्राद्यपाठो न युक्तः, पदविचारस्य अपोद्धाररूपत्वाभावात् ।

अत्रैव—'तदौपयिकापोद्धाररूपपदविचारः' इति, 'भेदौपयिकापोद्धाररूपपदविचारः' इति पाठद्वयं दृश्यते । तत्राद्यपाठो न युक्तः, पदशब्दस्य चरणवाचिनो हलन्तस्य साधुत्वेऽपि वैयाकरणसंमते सुप्तिङन्तलक्षणे पदे तस्यासाधुत्वात् ।

एतदग्रे हेलाराजीये—'तत्रानियतविकल्पः' इति, 'तत्र नियतविकल्पः' इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । अपोद्धारस्य विकल्पास्तु प्रतिमुण्डं मतिभेदेन न नियता इति द्वितीयपाठो न युक्तः ।

एतदग्रे—'पदभेदानुद्दिशति' इति, 'पदभेदानुपदिशति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा हि—तत्र पाठे उद्दिशति इत्यस्य संक्षेपतो निर्दिशति इत्यर्थः। द्वितीयपाठस्तु न युक्तः, अज्ञातज्ञापने उपदेशपदप्रयोगात्।

अत्र तु--कारिकायां कैश्चिदित्युक्त्याज्ञातस्यैव ज्ञापनात्।

अत्र मूले—प्रथमकारिकायाम् 'पञ्चधाऽपि वा' इति, 'पञ्चधाऽपि च' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, वाशब्दस्य समुच्चयार्थकत्वेन 'च'शब्दसमानार्थकत्वात्। 'वा स्याद् विकल्पोपमयोरेवार्थेऽपि समुच्चये' (इति मेदिनी—१८२।७४-७५)

अत्रैव—तृतीयपादे 'अपोद्धृत्यैव' इति, 'आपोद्धृत्यैव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, साधुत्वात्। द्वितीयपाठस्तु अशुद्धोऽनर्थकश्चेति।

एकत्कारिकाव्याख्याने हेलाराजीये—किमसत्येन पदेन व्युत्पादितेन इति, किमसत्त्यपदव्युत्पादनेन इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। किमसत्त्यपदव्युत्पादनेन इति तृतीयपाठस्तु असंगत इति स्पष्टमेव प्रतीयते, असाधुत्वात्।

एतदग्रे हेलाराजीये—'कल्पनाबुद्धचा' इति, कल्पनाबुद्धय' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, साधुत्वाच्च। द्वितीयपाठस्तु असाधुत्वादयुक्तः।

एतदग्रे हेलाराजीये—'पृथक् पदं निष्कृष्य' इति, 'पदं निष्कृष्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, कल्पनाबुद्धचा वाक्यात् पृथक्कृतं पदं निष्कृष्य इत्यर्थसंगतेः द्वितीयपाठोऽपि युक्तः, कल्पनाबुद्धचा पृथक्कृतस्यैव ततो निष्कर्षणसंभवात्। एवञ्चाद्यपाठः स्पष्टप्रतिपत्त्यर्थः।

एतदग्रे--अत्रैव 'निष्कृष्य अखण्डवाक्यव्युत्पत्तामिति', 'निष्कृष्येन्दुखण्डवाक्यव्युत्पत्ताविति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, साधुत्वाच्च। द्वितीयपाठस्तु असाधुत्वादयुक्तः।

क्वचित्तु—'निष्कृष्याखण्डवाक्यव्युत्पत्ताविति' संहितया पाठः, स तु न युक्तः, अपोद्धृत्य इत्यस्य हि निष्कृष्य इत्येतत्पर्यन्तमर्थः। तथा चात्रैव विरम्य—अग्रे पुनः संबन्धो युक्तः।

अत्रैव—'अखण्डवाक्यमुत्पन्नावुपायः, इति, 'अखण्डवाक्यव्युत्पत्तावुपायः' इति, 'अखण्डवाक्यव्युत्पत्तानुपाय' इति पाठत्रयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु असाधुत्वादयुक्तम्।

एतदग्रे हेलाराजीये—'अखण्डपदव्युत्पत्तावपि' इति, 'अखण्डपदव्युत्पत्ताविव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु एकस्मिन्नुपमानोपमेयभावाभावादयुक्तः। अनन्वयालङ्कारमार्गोऽप्यत्र न युक्तः, द्विःपाठाभावेन तदनुल्लेखात्। काव्य एव तत्प्रयोगस्यौचित्याच्चेति।

एतदग्रे हेलाराजीये—'स्वालक्षण्येनाशक्या' इति, 'स्वालक्ष्येनाशक्या' इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'स्वारस्येनाशक्या' इति, 'स्वालक्षण्यद्वारकं नाशक्या' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत्र हि पाठे स्वालक्षण्येन इत्यस्य स्वरूपेणेत्यर्थः। इतरत्पाठत्रयन्तु अर्थासंगत्याऽसाधुत्वेन चायुक्तम्।

एतदग्रे हेलाराजीये—'उभयोरपि चापोद्धृतस्य' इति, 'उभयोरपि वाऽपोद्धृतस्येति', 'उभयोरत्रापि चापोद्धृतस्येति', 'उभयोरपि चापोद्धृतत्वस्येति' पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठोऽपि युक्तः, यदि वा शब्दोऽपि समुच्चयार्थवाचित्वेन च शब्दसमानार्थको भवेत्। तृतीयपाठस्य तु विरुद्धमतिकृत्वेनासंगतिः, चतुर्थपाठे तु विवक्षितार्थासिद्धिः।

एतदग्रे हेलाराजीये--'तथा हि' इनि, 'यथा हि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, यथा हि इति पाठे तु नार्थसंगतिः।

एतदग्रे हेलाराजीये--'अनियतानुपूर्वीका' इति, 'अनियतानुपूर्विक' इति, 'अनियतानुपूर्वीके' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, साधुत्वाच्च। द्वितीयपाठस्तु अशुद्धः, 'न कपि' इत्यणः प्रतिषेधात्। तृतीयपाठे तु अर्थासंगतिः।

अत्रैव—'यथार्थं परिकल्पितान्वयव्यतिरेकनिबन्धन' इति, 'यथार्थपरिकल्पितान्वयव्यतिरेकनिबन्धन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, साधुत्वाच्च। द्वितीयपाठस्तु अशुद्धः, अव्ययीभावेन सह समासस्य अनभिधानात्।

अत्रैव—'यथार्थं परिकल्पितान्वयव्यतिरेकनिबन्धनः' इति, 'परिकल्पितान्वयव्यतिरेकनिबन्धन' इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः। द्वितीयपाठेऽपि यथार्थमित्यस्यार्थापत्त्यालाभात्।

अत्रैव —'परिकल्पितान्वयव्यतिरेकनिबन्धनः, इति, 'परिकल्पितव्यतिरेकनिबन्धन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, तत्र विवक्षितार्थासिद्धेः।

तथा हि– तत्र पाठेऽन्वयस्य पदापोद्धारनिमित्तत्वं विवक्षितं न लभ्यत इति।

एतदग्रे—'वाक्यवादिनां पदापोद्धार' इति, 'वाक्यवादीनां पदापोद्धार' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, साधुत्वात्। द्वितीयपाठे तु असाधुत्वं स्पष्टमेव।

एतदग्रे—'शास्त्रीयान्वयव्यतिरेकनिमित्तार्थापोद्धारवशः' इति, 'शास्त्रेऽप्यन्वयव्यतिरेकनिमित्तार्थापोद्धारवशः' इति, 'शास्त्रेणाप्यन्वयव्यतिरेकनिमित्तार्थापोद्धारवशः' इति, 'शास्त्रेणान्वयव्यतिरेकनिमित्तार्थापोद्धारवशः', शास्त्रीयान्वयव्यतिरेकनिमित्तार्थोऽपोद्धारवशः' इति, पाठपञ्चकं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठचतुष्टयं तु अर्थासंगत्याऽयुक्तम्। चतुर्थः पाठस्तु असाधुरपि इति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'प्रकृतिप्रत्ययाद्यपोद्धार' इति, 'प्रत्ययापोद्धार' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, विवक्षितसर्वापोद्धारसंग्रहात्। द्वितीयपाठस्तु अयुक्तः, तदभावात्।

एतदग्रे—'सिद्धत्वान्वयव्यतिरेकाभ्याम्' इति, 'सिद्धवाऽन्वयव्यतिरेकाभ्यामिति', 'सिद्धतान्वयव्यतिरेकाभ्याम्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु असाधुत्वादयुक्तः। तृतीयपाठोऽपि कथञ्चिदर्थसंगतया युक्त एव।

एतदग्रे—'भिन्नत्वं सामान्यम्, द्विधा इत्यादिको विशेषः' इति, 'भिन्नत्वं सामान्यधा इत्यादिको विशेष' इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अयुक्तः, अर्थासंगतेरसाधुत्वाच्च।

अत्रैव—'इत्यादिको विशेषः' इति, 'इत्यादितो विशेषं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे हेलाराजीये—'प्रकारो हि विधार्थ' इति, 'प्रकाशो हि विधार्थ' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्पष्टैव।

एतदग्रे—'भेदको विशेष' इति, 'भेदकोऽवशेष' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

अत्रैव—'विशेषप्रकार' इति, 'विशेषः प्रकार' इति पाठद्वयं दृश्यते। तदुभयमप्यसाधु, अर्थासंगतेः।

अत्रैव—'स च सामान्यस्य भेदको विशेषः, 'सादृश्यमेव सर्वत्र प्रकारः कैश्चिदिष्यते' इति वाक्ये—सादृश्यमेव, सादृश्यामेव इति पाठद्वयम्, सर्वत्र इति, सर्वत्र इति दिष्यते इति, दुक्तमिति पाठा दृश्यन्ते। तत्राद्ये पाठद्वये आद्यपाठ एव युक्तः, अर्थसंगतेः, साधुत्वादर्थसंगतेश्च।

अत्रैव—'इत्येकीयमतमिति', 'इत्येकीयं मतमिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—'कैश्चिदिष्यते' इति, 'कैश्चिदिश्यते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, साधुत्वादर्थसंगतेश्च। द्वितीयपाठे तु असाधुत्वमर्थासंगतिश्च।

एतदग्रे—'कैश्चिदभ्युपगम्यते इत्युक्तेः' इति, कैश्चिदभ्युपगम्यते इति चोक्तमिति', 'कैश्चिदभ्युपगम्यते इत्युक्ते' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्यायुक्तम्।

एतदग्रे—'यदि वा अत्र' इति, 'यदि चात्र' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, चार्थस्यात्र वाक्यार्थेऽन्वयानुपपत्तेः।

अत्रैव—'बुद्धिरूपप्रकल्पितमिति', 'बुद्धिरूपकल्पितमिति' पाठद्वयं दृश्यते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'तत्र उभयत्रापि रूपशब्दपाठोऽनर्थकः। प्रकल्पितमिति, कल्पितमिति पाठद्वयन्तु युक्तमेव, अर्थसंगतेः।

एतदग्रे—'ज्ञानप्रतिबिम्बितस्य' इति, 'ज्ञानप्रतिबिम्बस्य' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एत युक्तः; बाह्यानुकारित्वेन इत्यनेन सम्बन्धसंम्भवात्। प्रथमपाठे तु न तत्संभव इति हेयः सः।

अत्रैव—'ज्ञानप्रतिबिम्बितस्य कैश्चिदभ्युपगम्य बाह्यानुकारित्वेन सादृश्यम्' इति, 'ज्ञानप्रतिबिम्बस्य बाह्यानुकारित्वेन सादृश्यम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, एकीयमतस्य प्रागुक्तत्वात्।

अत्रैव--'सादृश्यं सर्वत्र प्रकारार्थं' इति, 'स तु सर्वत्र प्रकारार्थं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

अत्रैव—'संकल्पितसादृश्यस्य' इति, 'संकल्पितः सादृश्यस्य' इति, 'संकल्पितसदृशस्य' इति, 'संकल्पितसादृशस्य' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरेषु तु त्रिषु पाठेषु अर्थासंगतिः।

अत्रैव –'बाह्यस्येति', 'अबाह्यस्य' इति पाठद्वयं दृश्यते। अत्राद्यपाठो न युक्तः, अर्थासंगतेः। ज्ञानप्रतिबिम्बे आन्तर एवार्थे वाह्यसादृश्यं संकल्प्यत इति अनुभवः। "यद्यपि आन्तरार्थसादृश्यमपि बाह्ये संभवति, सादृश्यस्योभयनिष्ठत्वात्; तथापि बुद्धयानिर्वर्तनमान्तरस्यैवार्थस्य, न तु बाह्यस्येति अबाह्यस्येति पाठ एय युक्तः।

अत्रैव—'अनिर्वर्तनात्' इति, 'निर्वर्तनात्' इति पाठद्वयं दृश्यते। तत्राद्यपाठे इतः प्राक् बाह्यस्येति पाठो युक्तः, द्वितीयपाठे तु इतः प्राग् अबाह्यस्येति पाठो युक्तः। एवं हि पूर्वपाठद्वयम्, इतरत्पाठद्वयञ्चापि सम्यञ्चि संपद्यन्त इति।

इतः प्राग् हेलाराजीये—'पदस्य वाक्यार्थांशपरिकल्पनया' इति, 'पदस्य वाक्यार्थांशस्य परिकल्पनये' इति 'पदस्य वाक्यार्थान्तरापरिकल्पनया' इति पाठत्रयं दृश्यते। तत्र मध्यपाठ एव युक्तः, अर्थासंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—'अर्थवत एवापोद्धारो युक्तः' इति 'अर्थ एव चापोद्धार' इति 'अर्थत एवापोद्धारो युक्त' इति 'अर्धत एवापोद्धारो युक्त' इति, 'अर्थापोद्धारो युक्त' इति पाठपञ्चकमुपलभ्यते। तत्राद्यपाठद्वयमेव युक्तम्, अर्थसंगतेः; इतरत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'पदापोद्धारस्य निमित्तमिति', 'पदापोद्धारस्य निमित्तः' इति, 'पदापोद्धारस्य निमित्तमिति' पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु यथासंभवमशुद्धयर्थासंगतिभ्यामयुक्तम्।

एतदग्रे--'अनिमित्ते हि' इति 'अनिमिते हि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये--वाक्यार्थश्चेत्यत्र त्वर्थकश्चकारो युक्त एव।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--'निरंशः कारकोत्कलितेति', 'निरंशकारोत्कलितेति', पाठद्वयं दृश्यते। तथापि अत्र पाठे अर्थासंगतिरिति 'कारकोत्कलितशरीरः क्रियास्वभाव' इति व्यस्तपाठ एव युक्तः।

अत्रैव—'कारकोत्कलितशरीर' इति, 'कारकोत्कलीनमशरीर' इति. 'कारकोत्कलीनगशरीर' इति, 'कारकोपकल्पितशरीर' इति पाठचतुष्टयं समुपलभ्यते। तत्र चतुर्थपाठ एव सुक्तः संभवति, अर्थसंगतेः। इतरे तु त्रयः पाठा असाधवः।

अत्रैव--'क्रियास्वभाव' इति, 'क्रियास्वभावत' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे--हेलाराजीये--'अंशांशित्र ल्पनया' इति, 'अशांशिकल्पनया' इति, 'अंशांशे कल्पनया' इति पाठत्रयं दृश्तते। तत्राद्यपाठ एव युक्तः, इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'चांशो विभागार्हे' इति, 'च प्रविभागार्हे' इति, 'च विभागार्हे' इति, 'न प्रविभागार्हे' इति, 'चासौ विकल्प हि' इति पाठपञ्चकं प्रतीयते। तत्राद्यं पाठत्रयमर्थसंगत्या युक्तम्। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे हेलाराजीये—'सिद्धरूपोंऽशः' इति 'सिद्धरूपांश' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु तु कारकात्मनि सिद्धरूपे अंशत्वे च तन्निरूपितं विधेयत्वं न प्रतीयते समासादिति अर्थासंगतिः।

एतदग्रे हेलाराजीये 'संख्यादेः शाब्दमिति', 'संख्याभेदः शाब्दमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'शाब्दं प्राधान्यमिति', 'शाब्दप्राधान्यमिति' पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदग्रे—'जात्याच्छुरितस्य' इति, 'जात्याद्यङ्कुरितस्येति' 'जात्याङ्कुरितस्येति' पाठत्रयं इति दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'प्राधान्यं सिद्धरूपस्य' इति, 'प्राधान्यसिद्धरूपस्येति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः।

एतदग्रे—'तदाश्रयत्वादिति', तद्विशेषत्वादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'निपातोपसर्गकर्मप्रवचनीयलक्षण'इति,'निपातोपसर्गीकर्तव्यलक्षण' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे--'पदभेदोऽन्तर्भवति' इति, 'पदभेदोऽन्तर्भूत' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'तथा हि-'सिद्धार्थाभिधायिनामपदमिति', 'तदर्थागमनामपदमिति'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'सिद्धे ह्यर्थे नामपदमिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु—सिद्धे ह्यर्थे शक्तं नामपदमिति योजनायां शक्तपदाध्याहारे क्लेशः, दुरधिगमश्च तदध्याहाराः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—'तदर्थगतं विशेषमिति', 'तद् विशेषमिति', 'तद् गतं विशेषमिति' पाठत्रयमुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे—'सिद्धं ह्यर्थं साक्षाद्वाऽभिदधातु' इति, 'सिद्धार्थात् साक्षाद्वाऽभिदधाने' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'नेयताभेद' इति 'यदोभेदम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'हिरुगादयः क्रियाप्रधाना' इति 'हिरुगादयः क्रिया' इति पाठद्वयं दृश्यते, तत्राद्यपाठ एवः युक्तः अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः, न हि हिरुगादयः क्रियाः, किन्तु क्रियावाचिन इति।

एतदग्रे -'न हि तिङन्तमेवाख्यातमिति', 'न हि भिन्नं तमेवाख्यातमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—'पदान्यप्याख्यातमेव', 'पदान्यथाख्यातमेव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटैवेति।

एतदग्रे—'तद्गतभेदान्तरविवक्षायान्तु इति', 'तद्वतः भेदान्तरविवक्षायान्तु' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—'अर्थमात्राविशेषोऽनयोरिति', 'अर्थमानाविशेषोऽनयोरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तोऽर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—'साक्षादर्थं वदत' इति, 'साक्षादर्थवन्त' 'इति पाठद्वयं दृश्यते। तात्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

तथा हि—न ह्येतौ साक्षादर्थवन्तः, किन्तु तद्गतविशेषद्योतनद्वारा इति योजनायामपि भिन्नविभक्तिकत्वेन सामानाधिकरण्यानुपपत्तिः। साक्षादर्थवन्त इति तृतीयपाठोऽपि असंगत एव।

एतदग्रे—'अपि तु' इति, 'अपि उ' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'नामाख्याताभ्यां प्रविभक्तौ' इति, नामाख्याताभ्यां प्रविभक्ते' इति, 'नामाख्याताभ्यां पृथगविभक्तौ' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीतपाठे तु लिङ्गभेदेन साधुत्वाभावः। तृतीयपाठे तु पृथगिति पदं व्यर्थम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'सिद्धसाध्यार्थविषयविशेषद्योतकत्वादिति', 'सिद्धे साध्यार्थविषय-विशेषद्योतकत्वादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—'कर्मप्रवचनीयास्तु क्रियाविशेषोपजनितसम्बन्धावच्छेदहेतव' इति, 'कर्मप्रवचनीयास्तु निपातानां क्रियाविशेषोपजनितसंबन्धावच्छेदहेतव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु निपातानामित्यधिकम्।

तथा हि—'वृक्षमनुविद्योतते विद्युत्' इत्यत्र अनुः कर्मप्रवचनीयः। स च विद्योतनरूपेण क्रियाविशेषेण उपजनितस्य लक्ष्यलक्षणभावरूपस्य संबन्धस्य अवच्छेदे निर्धारणे हेतुरिति योजनायां सम्भवन्त्यां निपातपदस्य वाक्ये वैयर्थ्यं स्फुटमेव।

अत्रैव—'कर्मप्रवचनीयास्तु निपातत्त्वाद्वोपजनितसम्बन्धावच्छेदहेतव इति तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः। अत्रैव—'कर्मप्रवचनीयास्तु क्रियाविशेषोपजनित-सम्बन्धानवच्छेदहेतव' इति पाठोऽपि अर्थासंगत्याऽयुक्तः। अत्रैव—'कर्मप्रवचनीयास्तु संक्रियाविशेषोपजनितसंबन्धावच्छेदहेतव' इति पाठेऽपि समितिशब्दस्य वैयर्थ्यं स्फुटमेव।

एतदग्रे—'क्रियाविशेषप्रकाशनादुपसर्गेष्वेव' इति, 'क्रियाविशेषप्रकाशना उपसर्गेष्वेव' इति, 'क्रियाविशेषप्रकाशनानुपसर्गेष्वेव' इति पाठत्रयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—'अन्तर्भवन्तीति', 'अन्तर्भवतीति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, कर्मप्रवचनीया इति कर्तृबहुत्वात्।

अत्रैवाग्रे—'चतुर्धैव कैश्चिदिति'. 'चतुर्थ्येव कैश्चिदिति', 'चतुर्विधैव कैश्चिदिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे हेलाराजीये—'कर्मप्रोक्तवन्त' इति, 'कर्मप्रयोक्तवन्त' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च।

एतदग्रे हेलाराजीय एव—अतिक्रान्तक्रियाख्यानलक्षणस्य' इति 'अतिक्रान्तस्य क्रियाख्यानलक्षणस्येति', 'अतिक्रान्तक्रियाख्यातलक्षणस्येति' पाठत्रयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अर्थसंगतेः।

तथा हि—अत्र पाठे अतिक्रान्तेति क्रियापदविशेषणं सम्भवति इति। द्वितीय-पाठे तु अतिक्रान्तेत्यस्य न क्रियाविशेषणत्वसंभव इति विवक्षितार्थासिद्ध्याऽयं पाठोऽयुक्तः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे - 'न तु वर्तमानस्येति', 'ननु वर्तमानस्येति' पाठद्वयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्फुटैव, अग्रे समाधाना-भावात्।

एतदग्रे हेलाराजीये—'सम्बन्धावच्छेदनमत्र' इति, 'सम्बन्धावच्छेदमत्रेति' 'सम्बन्धावच्छेदेनमत्र इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, साधुत्वाच्च। यद्यपि द्वितीयपाठेऽप्यर्थसंगतिरस्ति, तथापि सम्बन्धावच्छेदमिति नपुंसक-पाठोऽसाधुः, घञन्तस्य पुंस्त्वात्। तृतीयपाठोऽपि शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'क्रियाकृत:' इति विसर्गसहितः, 'क्रियाकृतेति' विसर्गरहितः पाठो दृश्यते। तदुभयमपि साधु, वाक्यभेदे विसर्गस्य, एकवाक्यतायां विसर्गाभावस्य चोपपत्तेः।

एतदग्रे—'उपकारप्रभावितत्वादिति', 'क्रियोचितत्वादिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। तत्राद्यपाठे सम्बन्धस्य उपकारप्रभावितत्वं युक्तमेवेत्यर्थसंगतिः। द्वितीयपाठेऽपि क्रियायामुचितत्वादिति समासस्वीकारेणार्थसंगतिः।

अत्रैव—'उपकारप्रभावितत्वात न तस्य' इति, 'उपकारप्रभावितत्वात्तस्य च' इति पाठद्वयं दृश्यते। तदुभयमप्यसाधु, अर्थासंगतेः।

एतदग्रे—'यत्र श्रूयते' इति, 'यन्न श्रूयते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—'सर्पिषो जानीते' इति, 'सर्पिषे जानीते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्याकरणेन संस्कृतत्वात्। द्वितीयपाठस्तु तद्राहित्यादयुक्तः।

एतदग्रे—'क्रिया हि स्वभावादेव' इति, 'क्रियादि स्वभावादेव' इति, 'क्रियाभिः स्वभावादेव' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु आदिपदं व्यर्थम्। तृतीयपाठे तु तृतीयाविभक्तिरत्रायुक्ता।

एतदग्रे हेलाराजीये—'यस्मान्मातृविषये' इति, 'यस्मान्मातापितृविषये इति पाठद्वयं दृश्यते। तदुभयमपि साधु, पितुः स्मरति, पितुः स्मृतमित्याद्युदाहरणस्य सम्भवात्।

एतदग्रे—'अश्रुते तु क्रियापदे' इति, 'अन्यत्र तु क्रियापदे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, नियतक्रियाक्षेपसिद्धेरिति अग्रे वक्ष्यमाणत्वात्। द्वितीयपाठे तु तदा साधुत्वं स्यात्, यदि – अत्र क्रियापदे इति पूर्वोक्तं स्यात्। अन्यत्वप्रतियोगिन इदमर्थस्य प्रागनुक्तेर्द्वितीयपाठो न युक्तः।

एतदग्रे—'संबन्धिस्वरूपमहिम्नैव' इति, 'सम्बन्धस्वरूपमहिम्नैव इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, क्वचित्तु सम्बन्धानां प्रतिनियतक्रियापूर्वकत्वावधारणेनास्ति सामर्थ्यमिति अग्रे वक्ष्यमाणत्वात्। अत्रैव वाक्ये 'प्रतिनियतक्रियाकारकभावपूर्वकत्वं शेषसम्बन्धस्य' इत्युक्तेश्च। क्वचित्तु 'सम्बन्धमहिम्नैव' इति स्वरूपपदविरहितः पाठो दृश्यते। स तु युक्त एव, विवक्षितार्थसाधकत्वात्।

क्वचित्तु—'सम्बन्धस्वरूपमहिम्नेव' इति इवशब्दपाठ उपलभ्यते, स तु अयुक्तः, उपमेयानुपन्यासात्।

अत्रैव एतदग्रे—'नियतक्रियाक्षेपसिद्धेरिति, 'नियतक्रियापेक्षासिद्धेरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'अवयवावयविभावसम्बन्धश्चेति', 'अवयवस्यावयतिभावसम्बन्धश्चेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु असाधुत्वेनायुक्तः।

एतदग्रे हेलाराजीये—'नास्ति सामर्थ्यमिति', 'नास्ति सामर्थ्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः,। द्वितीयपाठस्तु पञ्चम्या अनुपयोगादयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'क्रियाविशेषस्तु नावधार्यते' इति, 'क्रियाविशेषस्तुन्नवधार्यते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु असाधुत्वादयुक्तः।

एतदग्रे—'यदेतत्स्वं नाम' इति, 'यदेतत्स्वत्वं नाम' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—'तथा च भाष्यमिति', 'तथा हि भाष्यमिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः।

एतदग्रेऽत्रैव वाक्ये—'याश्चया' इति, 'याश्रया' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु असाधुत्वादयुक्तः।

एतदग्रे—'त्वन्यतमाविनाभावादिति', 'त्वनन्यतमाविनाभावादिति', 'त्वन्यतया विनाभावादिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, इतरत् पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

इतः पूर्ववाक्ये—क्रयणादित्यस्य स्थाने—'क्रियणादिति' पाठः क्वचिदुपलभ्यते। तस्य तु स्वरूपव्याक्रियैव पराक्रिया वेदितव्या।

एतदग्रे—'क्वचित्त्वविनाभाविनी इति, क्वचिच्चाविनाभाविनी' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः।

एतदग्रे—'नियतविशिष्टक्रियाकृतत्वम्' इति, 'निपतन्नवशीष्टक्रियाकृतत्वम्' इति, 'निपतनविशिष्टक्रियाकृतत्वम्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगनेः। इतरत्पाठद्वयं तु यथायथं शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

अत्रैव—'कृतत्वमिति'. कृतं तु त्रित्वम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रेऽत्रैव वाक्ये—'सम्बन्धस्य विशेषमिति', 'सम्बन्धस्याविशेषमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—'जनयित्वा क्रिया काचित् सम्बन्धं विनिवर्तते' इति, 'जनयित्वा क्रियां कांचित् सम्बन्धो विनिवर्तते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सम्बन्धस्य क्रियाकारकभावपूर्वकत्वात्। तदुक्तमत्रैव प्राक्—प्रतिनियतक्रियाकारकभावपूर्वकत्वं शेषसम्बन्धस्येति। द्वितीयपाठस्तु एतद् विरोधादुपेक्ष्यः।

एतदग्रे अत्रैव पद्ये - 'श्रूयमाणे क्रियाशब्दे' इति, 'श्रूयमाणक्रियाशब्दे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्यस्तपाठे क्रियाशब्दमुद्दिश्य श्रूयमाणत्वस्य विधेयत्वसम्भवात्। द्वितीयपाठस्तु समासे उद्देश्यविधेयभावासम्भवादयुक्तः।

एतदग्रे -'स चोपजातः सम्बन्ध इति, 'यद्वोपजातसम्बन्ध' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः।

तथा हि पक्षान्तरे वक्तव्ये विकल्पार्थकशब्दप्रयोग एव समुचित इति।

एतदग्रे हेलाराजीये—'नियमस्तस्य' इति, 'निद्यमस्तस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव वाक्ये—'नियतक्रियाजनितत्वम्' इति, 'नियतक्रियासंजनितत्वम्' इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'नियतक्रियाजनितम्' इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्, तृतीयस्तु पाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे अत्रैव—'शाकल्यस्य' इति, 'शाकलस्य' इति पाठद्वयं दृश्यते। इदं पाठद्वयं युक्तम्, अर्थसंगतेः। द्वितीयपाठे हि अपत्यार्थाऽभिन्ने इदमर्थेऽण्प्रत्ययः।

अत्रैव—'सहितामनु' इति, 'सहितो मनु' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'प्रावर्षदिति', 'प्रावर्षमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'संहिताप्रवर्षणयोरिति', 'सहितः प्रवर्षणयोरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, अर्थासंगते।

एतदग्र—'नियतक्रियाजनित' इति, 'नियतक्रियातनित' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'नियतक्रियाजनित' इति, 'निशमनक्रियाजनित इति, 'नियमः क्रिया-जनित' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत् पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—'वेधते' इति, आवेधते' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'निशमयति क्रिया' इति, 'निशामयति क्रिया' इति, 'नीशामयति क्रिया इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्याकरणेन संस्कृतत्वात्। इतरत्पाठद्वयं तु व्याकरणासंस्कृत्याऽयुक्तम्।

एतदग्रे—'तदनुमानस्येति', 'तदसमानस्येति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अथंसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे–'अन्यत्र दृष्टशक्तोरति', 'अन्यदुष्टशक्तेरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासगत्याऽयुक्तः।

अत्रैव—'शक्तेर्न' इति, 'शक्तिना' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अथंसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'प्रादेशं विपरिलिखति' इति, 'प्रदेशं विपरिलिखति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्था-संगत्याऽयुक्तः।

एतदग्रे--'लेखनासमन्वयानुपपत्तेरिति', 'लेखनक्रियानुपपत्तेरिति', 'लेखनाय समन्वयानुपपत्तेरिति' पाठत्रयं दृश्यते। अत्र प्रथमपाठो न युक्तः, प्रादेशं विमाय लिखति इत्यर्थे लेखनेति ण्यन्तार्थस्यानुपपत्तेः। द्वितीयपाठस्तु युक्तः, अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'लेखनसमन्वयानुपपत्तेरिति' पाठस्तु युक्ततरः।

अत्रैव—'निर्मातिक्रियाक्षेपकत्वमिति', 'पिमतिक्रियाक्षेपकत्वमिति', 'मिमित्तिक्रियाक्षेपकत्वमिति', 'विमातिक्रियाक्षेपकत्वमिति' पाठचतुष्टयं समुप-लभ्यते। तत्रान्त्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदनन्तरम्—'कारकविभक्तिर्ह्यत्र' इति, कारकविभक्तिहि यत्र' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव वाक्ये--'युक्तस्तत्समुचितक्रियाक्षेप' इति, 'युक्तस्तत्समुच्चितक्रियाक्षेप' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः। न ह्यत्र द्वितीयासमुच्चितक्रियाया आक्षेपो भवतीति।

एतदग्रे हेलाराजीये--'अविनाभावेन न्याय्यत्वादिति, 'अविनाभावेन याय्यत्वादिति', 'अविनाभावेन न्यायत्वादिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे--'सम्बन्धवाचित्वमिति', 'सम्बन्धवाचकत्वमिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव— मत्रानोरिति', 'मत्रामोरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--'सम्बन्धावच्छेदस्येति', 'सम्बन्धावच्छेदकस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः।

एतदग्रे-- 'सम्बन्धस्य न वाचक' इति, 'सम्बन्धस्य च वाचक' इति पाठद्वय दृश्यते। तत्राद्यपाठ एव युक्तः, उपक्रमोपसंहारयोर्नञो दर्शनेन मध्येऽपि नञ्पाठस्यैवौचित्यात्।

अत्रैव श्लोके चतुर्थचरणे- सम्बन्धस्य तु भेदकः' इति, 'सम्बन्धस्य च भेदकः' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, समानार्थकत्वादर्थसङ्गतेश्च।

एतदग्रे हेलाराजीये-- भेदको विशेषद्योतक' इति, 'भेदको विशेषक' इति, 'भेदतो विशेषद्योतक' इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे - 'यत्पुनरन्यथा अर्थसामर्थ्यादिना' इति, 'यत्तु वचनसामर्थ्यादिना' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः।

एतदग्रे – 'न तत्र तस्य' इति, 'न तस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। पूर्वं यत्पदेनोक्तस्य हि अत्र तत्रेति तत्पदेन परामर्श इति।

एतदग्रे—'पार्यते' इति, 'पायते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु शब्दार्थयोर्द्वयोरप्यसंगतिः।

एतदग्रे—'पदान्तराणामर्थान्तरनिवेशात्' इति, 'पदान्तराणां सामर्थ्यान्तरनिवेशात्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'अर्थान्तरनिवेशात्सम्बन्धविशेषस्य' इति, 'अर्थान्तरविवेशार्थबन्धविशेषस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'सम्बन्धविशेषस्य' इति, 'सम्बन्धविययस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठे तु शब्दाशुद्धिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव – 'सम्बन्धविशेषस्येति', सम्बन्धविशेषस्य चेति' पाठद्वयं दृश्यते। द्वितीयपाठेऽत्र चार्थासङ्गतिः।

एतदग्रे—'यदत्राधिक्यम्' इति, 'यत्राधिक्यम्' इति पाठद्वयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अत्र यत्पदेनोक्तस्य 'वाक्यार्थः स' इति, तत्पदेन परामर्शादर्थसङ्गतेः। द्वितीयपाठे तु अर्थासङ्गतिः।

एतदग्रे—'वाक्यार्थः स' इति, 'स वाक्यार्थ' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, उद्देश्यविधेयपदयोः पौर्वापर्यप्रयोगस्य विवक्षाधीनत्वेन अनियतत्वात्।

एतदग्रे हेलाराजीये– 'सम्बन्धस्यावच्छेद' इति, 'सम्बन्धानवच्छेदम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे– 'वाक्यार्थः किम्' इति, 'वाक्यार्थः किमिति' इति पाठद्वय दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे– उच्यमानं पदार्थं' इति, 'उच्यमानपदार्थं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे - 'पदार्थोल्लंघनेन' इति, 'पदार्थोल्लंघनेम' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दसाधुत्वाच्च। द्वितीयपाठस्तु एतद्धेतुद्वयाभावादयुक्तः। अत्रैव - 'उक्तत्वे ह्यनेन' इति तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—'तत्तद्वाक्योपात्तस्येति', 'तद्वाक्योपात्तस्येति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, वीप्सायामर्थसङ्गतेः।

एतदग्रे—'विशेष्यस्य' इति, 'विशेषस्य' इति, 'विशेषैश्चेति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे हेलाराजीये– 'इत्थं च' इति, 'इयश्च' इति पाठद्वयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'अनुपात्तस्यैव' इति, 'अनुपात्रम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त।

एतदग्रे—'वाक्यात्प्रतीतिरिति', 'वाक्यार्थात्प्रतीतिरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'अत्रापदार्थ' इति, 'अत्र पदार्थ' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'यद् वक्ष्यति' इति, 'स वक्ष्यति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये समुदाहृते पद्ये– 'कर्मप्रवचनीयैस्तु, इति, 'कर्मप्रवचनीयेन' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव चतुर्थचरणे—'सविशेषे' इति, 'स्वविशेषे' इति, 'सविशेषः' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—'अवरुद्धयते' इति, 'विरुध्यते' इति पाठद्वय दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे हेलाराजीये –'सम्बन्धान्तरविलक्षणः कर्म' इति, 'सम्बन्धान्तराद् विलक्षणः कर्म' इति, 'सम्बन्धान्तरविलक्षणकर्म' इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे हेलाराजीये –'क्रियाविशेषजनितत्वेन वेति' इति, 'क्रियाविशेषजनितत्वेनैवेति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये –'विशेषक्रियाजनितत्वप्रतीतिः' इति, 'वोविषयक्रियाजनितत्वप्रतीतिः' इति, 'विशिष्टक्रियाजनितत्वप्रतीतिः, इति, 'विशिष्टक्रियाजनितत्त्वप्रतीतिः' इति पाठचतुष्टयं दृश्यते। तत्र प्रथमतृतीयपाठौ साधू, अर्थसङ्गतेः। द्वितीयचतुर्थपाठौ तु असाधू, अर्थासङ्गतेः।

अत्रैव –'सम्बन्धिविशेषपर्यालोचना लभ्या' इति, 'सम्बन्धविशेषपर्यालोचना लभ्या' इति, 'सम्बन्धीविशेषपर्यालोचना लभ्या' इति, 'सम्बन्धिविशेषपर्याभावेना लभ्या' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे हेलाराजीये –'यंधाला' इति, 'पञ्चाला' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, शब्दशुद्धेः। प्रथमपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे–'त्वस्वाग्नभावोऽयम्' इति, 'स्वस्वामिभावोऽयम्' इति पाठद्वयं दृश्यते। तत्र प्रथमपाठः शब्दाशुद्ध्याऽयुक्तः। द्वितीयपाठस्तु शब्दशुद्ध्याऽर्थसंगत्या च युक्त इति।

एतदग्रे हेलाराजीये–'अधिना वेद्यते' इति, 'अधिना कल्पते' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, द्वितीयपाठे 'कल्पते' इत्यस्य 'सम्पद्यते' इत्यर्थात् धातूनामनेकार्थत्वात्।

एतदग्रे हेलाराजीये–'स्वामी ईश्वर' इति, 'स्वामी ईश्वरेति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः सविभक्तिकस्यैव साधुत्वात्। द्वितीयपाठस्तु विभक्तिराहित्यादसाधुः।

एतदग्रे–'जनपदः स्वमिति', 'जनपदस्वमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे–'परिपालनकरा दानादिक्रियाप्रभावित एवेति', 'परिपालनकरो दानादिक्रियाप्रभावित एवेति, 'परिपालनकशारानादिक्रियाप्रभावित एवेति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्ध्याऽसाधु।

अत्रैव –'एवायं सम्बन्ध' इति, 'एव सम्बन्ध' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सम्बन्धविशेषे न्याय्यत्वस्य इदमोऽवगमात्। इदमोऽप्रयोगे सम्बन्धसामान्ये प्रतीयमानं न्याय्यत्वं तु नौचितीमर्हति।

एतदग्रे–'प्रतीतिप्रतिना' इति, 'प्रतीतिना' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या विवक्षितार्थस्य स्फुटमप्रत्यायकत्वेन चायुक्तः। 'प्रतीति' इति तृतीयपाठः, 'प्रसिना' इति चतुर्थपाठोऽपि असाधुः, विवक्षितार्थाप्रत्यायकत्वात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'सादृश्यलक्षणोऽयं सम्बन्ध' इति, 'सदृशलक्षणोऽयं सम्बन्ध' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त', अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'सम्बन्धिस्वरूपपर्यालोचनादत्र' इति, सम्बन्धिस्वरूपपर्यालोचनयाऽत्रेति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैवाग्रे—'सम्प्रहरणादि क्रियाकृत' इति, 'सम्प्रहरणादि क्रियावृत्त' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगते।

एतदग्रे—'शाकल्यस्य संहिता मनुः' इति, 'शाकल्यसंहिता मनुः' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'हेतुफलभाव' इति, 'हेतुफलाभाव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्येतावत्येवायमनुरिति', 'इत्येतापत्येवामनुरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्रैव—'अनुर्विश्राम्यति' इति, 'अनुविभ्राम्यति' इति, 'अनुर्विश्राम्यतु', इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'पाठविशेरूषपत्वात्' इति, 'पाठविशेषरूपत्वादिति' पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, शब्दाशुद्धेः। द्वितीयपाठस्तु शब्दशुद्धयाऽर्थसंगत्या च युक्तः।

एतदग्रे—'देवोऽवर्षदिति' इति, 'देवो वर्षति' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगते। इतः प्रागवस्थितस्य (शब्दवर्णन इत्यस्य) आद्यपाठपक्षे शाकल्यसंहिताशब्दश्रवणेन इत्यर्थः। द्वितीयपाठपक्षे तु संहिताशब्दश्रवणेन इत्यर्थः।

एतदनन्तरम्—'सम्बन्धिमहिम्ना' इति 'सम्बन्धमहिम्ना' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव 'सम्बन्धिमहिम्ना' इति, 'सम्बन्धिमहिम्नः' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, विशिष्टक्रियाप्रभावितत्वावसाये सम्बन्धिमहिम्नः करणत्वस्यौचित्यात्। अपायस्यात्राभानेनापादानत्वस्यासम्भवात्।

अत्रैव—विशिष्टक्रियाप्रभावितत्वमिति' 'विशिष्टक्रियाप्रभावित्वमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'केचिदियाननोरेव व्यापार इत्याहु' इति, 'क्वचित् क्रियान्तरादेव व्यापार इत्याहुः' इति पाठद्वय दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'कार्यभूतसम्बन्धापेक्षया अतीतत्वादिति', 'कार्यभूतसम्बन्धापेक्षया अतीतकर्मत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये 'प्रोक्तवन्त इत्यर्थ' इति, 'प्रोक्त इत्यर्थ' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त', अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव—'इत्यर्थ' इति, 'इत्यर्थादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'इत्यर्थः समन्वेत्येव' इति, 'इत्यर्थस्तमन्वेत्येव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः, अत्र तत्पदेन परामृश्यमानस्यार्थस्य पूर्वं यत्पदेनानिर्देशात्। 'समं नेत्येव' इति तृतीयपाठोऽपि अयुक्तः, अर्थासंगतेः।

एतदग्रे हेलाराजीये—'वस्तुतः क्रियाफलस्यैव' इति, 'वस्तुनः क्रियाफलस्यैव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु 'वस्तुनः' इत्यस्य क्रियाफलविशेषणस्य वैयर्थ्यमिति।

एतदग्रे—'प्रकाशनादिति', 'प्रकाशमानादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'प्रकाशनास्य' इति तृतीयपाठोऽपि अर्थासंगत्याऽयुक्त एव।

एतदग्रे—'तत्रभवद् भर्तृहरेरिति', 'तत्र भर्तृहरेरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, अग्रे तत्र तत्रेति वीप्सित-तत्पददर्शनात्।

अत्रैव—'तत्रभवद् भर्तृहरेरिति', 'तत्रभवद् हरेक्षत्रेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'निमित्तविशेषावच्छेद एवेति', 'निमित्तविशेष एवावच्छेद एवेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'परिपालनक्रियाहितत्वम्', इति, 'परिपालनक्रियाहेतुत्वम्' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। तथा हि प्रथमपाठे आहितत्वमिति च्छेदः, जनितत्वमिति तदर्थः। द्वितीयपाठे तु बहुव्रीहिणा परिपालनक्रियाकृतत्वमिति तदर्थः। 'परिपालनक्रियातिरोहितत्वमिति' तृतीयपाठोऽपि उपलभ्यते। स तु न युक्तः, अर्थासंगतेः।

एतदग्रे हेलाराजीये—'प्रतीत्यमित्रपराजयादि' इति, 'प्रतीत्यत्र पराजयादि' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। प्रथमपाठस्तु युक्ततरः, पराजयविशेषस्य तत्र पाठे श्रुत्या प्रतीतेः। द्वितीयपाठे तु पराजयसामान्यप्रतीतिः प्रथमम्, पराजयविशेषप्रतीतिस्तु वाक्यप्रमाणप्रयुक्ता इति वाक्यापेक्षया श्रुतेः प्रबलत्वात् प्रथमपाठ एव युक्ततर इति। 'प्रतीत्यन् पराजयादि इति, 'प्रतीत्यमित्रपराजयनादि इति तृतीयचतुर्थपाठावपि क्वचित् क्वचिद् दृश्येते। तत्र तृतीयपाठो न युक्तः, शब्दाशुद्धेरर्थासंगतेश्च। चतुर्थपाठस्तु कथञ्चित्साधुः, अच्प्रत्ययप्रयोगे स्वायत्ते तमुपेक्ष्य ल्युट्प्रयोगस्य संशयजनकस्यानुचितत्वात्।

अत्रैव—'प्रतीत्यमित्रपराजयादिकृतोऽनुकार्यानुकरणभावः प्रतिना' इति, 'प्रतीत्यमित्रपराजयादिकृतानुकार्यानुकरणभावः प्रतिना' इति, 'प्रतीत्यमित्रपराज-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यादिकृतानुकार्यानुकरणभावप्रतिना' इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्त्वसाधुः, अर्थासंगतेः।

एतदग्रे—'पृतन्यते', 'प्रकाश्यते' इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽसाधुः, अर्थासंगतेः।

एतदग्रे हेलाराजीये—'कर्मप्रवचनीयसंज्ञाधिकारिकी इति, 'कर्मप्रवचनीयसंज्ञाधिकारिकाम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'उपसर्गसंज्ञाबाधनाय प्रवर्तते' इति, 'उपसर्गसंज्ञाबाधनाय तेषां प्रवर्तते' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। तत्र द्वितीयपाठे तेषामित्यस्य स्वत्यादीनामित्यर्थः।

एतदग्रे हेलाराजीये समुद्धृते पद्ये तृतीयचरणे—'षत्वादिविनिवृत्त्यर्थम्' इति, 'ष्षत्वादिविनिवृत्त्यर्थम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्रैव—'तिनिवृत्त्यर्थम्' इति, 'विनिवृत्त्यर्थम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठः शब्दाशुद्धयाऽयुक्तः। द्वितीयपाठस्तु शब्दशुद्धयाऽर्थसंगत्या च युक्तः।

अत्रैव पद्ये चतुर्थचरणे—'स्वत्यादीनां विधर्मणाम्' इति, 'स्वत्यादिनां विधर्मणाम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तद्द्वयाभावादयुक्तः।

अत्रैव—'विधर्मणाम्' इति, 'हि धार्मणाम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु न शब्दशुद्धिर्नापि अर्थसंगतिरिति हेयः सः।

एतदग्रे हेलाराजीये—'आर्थेन तु रूपेण' इति, 'अर्थेन तु रूपेण' इति, 'अर्थो न तु रूपेण' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'विभागे प्रस्तुते' इति, 'विभावो प्रस्तुते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्त इति।

एतदग्रे—'उपसर्गपदे' इति, 'उपसर्गपर्णं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'स्वत्यादिरन्तर्भवति' इति, 'स्वात्यादिरन्तर्भवति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त।

एतदग्रे—'तदेवमिति', 'तदेव' इति, 'तदेकमिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्या युक्तः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'वाक्यादपोद्ध्रियमाणस्य' इति, 'वाक्यादयोद्ध्रियमाणस्य' इति, 'वाक्यादयाद्ध्रियमाणस्य' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे –'वदस्य' इति, 'पदस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, शब्दाशुद्धेरर्थासंगतेश्च। द्वितीयपाठस्तु युक्तः, अर्थसंगतेः।

एतदग्रे -'अपोद्धारार्थविशेषाश्रयेण' इति, 'अपोद्धारार्थः विशेषाश्रयेण' इति पाठद्वयं दृश्यते। तदुभयमप्यसाधु, अर्थासंगतेः। तस्मादत्र 'अपोद्धारार्थं विशेषाश्रयेण' इति पठनीयम्।

एतदग्रे—'यथासम्भवं भेद' इति, 'यथासम्भवमभेद' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अपोद्धारे हि भेदो भवति, न त्वभेदः। अत एव द्वितीयपाठो निरस्तः।

एतदग्रे—'निरंशकवाक्यव्युत्पत्त्युपायभूत' इति, 'निरंशवाक्यव्युत्पत्त्युपायभूत' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। उभयत्रापि पक्षे निरंशपदे बहुव्रीहिः। एकत्र पक्षे कप्, अन्यत्र तु तदभावः, "शेषाद् विभाषा" इति कपो वैकल्पिकत्वात्।

अत्रैव—'निरंशकवाक्यव्युत्पत्त्युपायभूत' इति, 'निरंशकवाक्यच्युत्युत्युपायभूत' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे– 'अतश्च' इति, 'अत एव' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे 'स्वादिपदम्' इति, 'वाक्यपदम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे 'वाक्यव्युत्पत्त्यनङ्गत्वात्' इति, 'वाक्यच्युत्यत्यनङ्गत्वात्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव – 'वाक्यव्युत्पत्त्यनन्तरत्वात्' इति, 'वाक्यव्युत्पत्त्यनङ्गत्वात्' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु अर्थसंगत्या युक्तः।

एतदग्रे - 'संकेतितम्' इति, 'संकेतिता' इति, 'संकेतित' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसगतेः, स्वादिपदस्य विशेष्यत्वेन तद्विशेषणस्यास्य नपुंसकत्वैकवचनयोर्युक्तत्वाच्च। अत एवेतरत्पाठद्वयमसाधु।

एतदग्रे—'सुबन्तपदव्युत्पत्त्युपायभूतम्' इति, 'स्वतंपदव्युत्पत्त्युपायभूतम्' इति, 'सुबन्तपदं व्युत्पत्त्युपायभूतम्' इति, 'सुबन्तपदे व्युत्पत्त्युपायभूतम्' इति, 'सुबन्तपदे च्युत्युत्युपायभूतम्' इति पाठपञ्चकं समुपलभ्यते। तत्राद्यपाठ एवार्थसङ्गत्या युक्तः। इतरत्पाठचतुष्टयं तु शब्दाशुद्ध्याऽर्थासङ्गत्या चायुक्तमिति।

एतदग्रे –'गणनार्हम्' इति, 'ग्रहणनार्हमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—'प्रकृतिप्रत्ययवदिति', 'प्रकृतप्रत्ययवदिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्या युक्तः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव – 'प्रकृतिप्रत्ययदिति' इति पाठोऽपि शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे –'नाव्याप्तिरिति', 'नव्याप्तिरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्या युक्तः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे –'पदात् किलासाविति', 'पदात्कीलासाविति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—'तदित्थमिति', 'तदिष्टचमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—'पदापोद्धारे' इति, 'यदाऽपोद्धारे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे – 'अपोद्धृतस्य' इति, 'प्रोद्भूतस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे— सिद्धसाध्यरूपद्वययोगिन' इति, 'सिद्धसाध्यरूपयोगिन' इति, 'सिद्धसाध्यरूपद्वययोगितया' इति पाठत्रयं दृश्यते। एतत्पाठत्रयमपि अर्थसंगत्या साधु।

एतदग्रे—'स्वरूपोपदर्शनार्थमिति', 'स्वरूपेण प्रदर्शनार्थमिति', 'स्वरूपप्रदर्शनार्थमिति' पाठत्रयं समुपलभ्यते। तदेतत्पाठत्रयमपि साधु, अर्थसंगतेः।

पदार्थानामपोद्धारे इति ॥ २ ।

कारिकायाम्—'पदार्थानाम्' इति, 'वदार्थानाम्, इति, 'जातिर्वा द्रव्यमेव वा' इति, 'जातिर्वाद्यद्रमेव वा' इति, 'नित्यावेवोपवर्णिताविति', 'नित्यादेवोपवर्णिताविति' पाठाः समुपलभ्यन्ते। तत्र त्रिष्वपि पाठयुग्मेषु आद्यपाठा एव युक्ताः, शब्दशुद्धेरर्थसंगतेश्च।

अस्यामेव कारिकायाम्—'अपोद्धारे' इति, 'अपोद्धारो' इति पाठद्वयमुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः,। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—'पदं परीक्ष्येत' इति, 'पदं परिक्ष्यते' इति, 'प्रथममपोद्धारपदार्थविचार' इति, 'प्रथमोद्धारपदार्थविचार' इति पाठयुग्मद्वयमुपलभ्यत इति। तत्राद्ये युग्मे आद्यपाठ एव युक्तः, शब्दशुद्धेः। द्वितीये युग्मेऽपि प्रथमपाठ एव युक्तः, अर्थसंगतेः, व्यासे उद्देश्यविधेयभावावगमसम्भवाच्च। द्वितीयपाठे तु उभयाभावः।

एतदग्रे हेलाराजीये—'सर्वेषामपि शब्दानां पदरूपाणामिति', 'सर्वेषामपि पदरूपाणामिति', 'सर्वेषामपि शब्दानां पदस्वभावानामिति' पाठत्रयं समुपलभ्यते। तत्सर्वं साधु, अर्थसंगतेः।

अत्रैव हेलाराजीये—'नामाख्यातादि स्वस्वभावानामिति', 'नामाख्याताभिस्वभावानामिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे हेलाराजीये—'जातिरेवार्थो न द्रव्यमिति' 'जातिरेवार्थो न द्रव्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु नपुंसकस्य पुंसि प्रयोगेणायुक्तः।

एतदग्रे हेलाराजीये—'द्रव्यवादिमते तु' इति, 'द्रव्यवादिमतेरु' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'द्रव्यमेव न जातिरिति', 'द्रव्यमेव न शति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे हेलाराजीये—'जातिविशिष्टद्रव्याभिधानमिति', 'जातिविशीयद्रव्याभिधानमिति', 'जातिविशिष्टद्रव्यविधानमिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तमिति। 'जातिविशिष्टद्रव्यादिधानमिति' चतुर्थपाठोऽप्ययुक्तः, अर्थासंगतेः।

एतदग्रे हेलाराजीये—'संकलनारूपं पदार्थाविति' इति, 'संकलनारूपपदार्थाविति' पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, अर्थसगतेः। द्वितीयपाठस्तु 'तदेव' इत्यनेन सहानन्वयापत्त्याऽयुक्त।

अत्रैव— पदार्थाविति स्फुटीकृतम्' इति 'पदार्थानां विति स्फुटीकृतमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—'अन्यथा' इति, 'अ- द्यथा' इति 'वार्थे' इति, यार्थे' इति 'प्रक्रान्ते' इति, प्रकीन्ते' इति, 'चार्थोपसंहार' इति, 'चार्थोपसंहारोऽयम् इति. पाठयुग्मचतुष्टयमुपलभ्यते। तेषु युग्मेषु सर्वेष्वपि आद्यपाठा एव युक्ताः, अर्थसंगतेः।

एतदग्रे हेलाराजीये— तद्वदभिधाने तु' इति, 'तद्वदतिधाने तु' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः।

अत्रैव—'तु अभिधानं तावद्' इति, 'त्वनभिधानं तावदिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त', अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

अत्रैव—'द्वयोरपि समानमिति', 'द्वयोरपि समानेति' पाठद्वयं दृश्यते। 'तावद्वयोरपि समानमिति' तृतीयपाठोऽपि दृश्यते। एतेषु त्रिषु आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु समानपदस्य अविभक्तित्वादसाधुः। तृतीयपाठस्तु तावच्छब्दे दकारलोपादसाधुः।

एतदग्रे—'आर्थस्तु' इति, 'वार्थस्तु' इति, 'अर्थस्तु' इति, 'कार्यस्तु' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरे तु त्रयः पाठा अर्थासंगत्याऽयुक्ताः।

अत्रैव—'गुणप्रधानभाव' इति, 'गुणभावस्य वा' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे हेलाराजीये—'यद्वा प्राधान्येनैव' इति, 'यद्वा प्रधानेनैव' इति, 'यद्वा पद्यततथा' इति, 'भिन्नविषयतया' इति, 'विषयतया' इति, पाणिनिदर्शने' इति, 'पाणिनीयदर्शने' इति, 'पाणिभिदर्शने' इति, 'जातिद्रव्ये शब्देनाभिधीयेते' इति, 'जातिद्रव्ये शब्देनाभिधीयते' इति, 'इत्ययमत्र पक्ष इति, 'इत्यपरः पक्ष' इति, 'इत्ययमत्रपेक्ष' इति, इत्युक्त' इति, 'इत्युक्तमिति' पाठानां पञ्चदशकं समुपलभ्यते।

तत्राद्ये पाठत्रये प्रथमपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्। चतुर्थपञ्चमपाठयोश्च चतुर्थपाठ एव युक्तः, अर्थसंगतेः। पञ्चमपाठस्तु अर्थासंगत्याऽयुक्तः। षष्ठसप्तमपाठौ युक्तौ, अर्थसंगतेः। अष्टमपाठस्तु अयुक्तः, शब्दाशुद्धेः। नवमपाठो युक्त, अर्थसंगतेः। दशमपाठस्तु शब्दाशुद्धयाऽयुक्तः। एकादशपाठस्तथा द्वादशपाठोऽर्थसंगत्या युक्तः। त्रयोदशपाठस्तु शब्दाशुद्धयाऽयुक्तः। चतुर्दशपाठस्तु शब्दशुद्धयाऽर्थसंगत्या च युक्त। पञ्चदशपाठस्तु इत्युक्तमित्यस्य पक्षविशेषणत्वानुपपत्तेरयुक्तः।

एतदग्रे--'तत्र नामपदस्य' इति, 'नामपदस्थ' इति, 'गोत्वादिजातिः' इति, 'गौत्वादिजातिः' इति, 'गौत्वादिजातिः नियतक्रियाविषयसाधनैकार्थसमवेतसंख्याजातिविशेषभावमापन्ना' इति, गोत्वादिजातिनियतक्रियाविषयसाधनकार्यसमवेत· संख्याजातिविशेषभावमापन्ना' इति, 'संख्याजाति' इति, 'सांख्याजाति' इति, 'संख्यातातिं' इति, 'विशेषणभावमापन्ना' इति, 'विशेषभावमापन्ना' इति. 'विशेषतमापन्ना' इति, विशेषमात्रापन्ना' इति, विशेषमापन्ना' इति, 'अभिधेया' इति, 'अभिधेयाया' इति, 'अनाश्रयाया' इति. 'अनाश्रयाय' इति अनाश्रयाद्या' इति, 'जातेरनुपपत्तेरिति', 'जातेः' इति, 'सामर्थ्यात्प्रतीतं द्रव्यमिति', 'सामर्थ्यात्प्रतीतिः द्रव्यम्' इति, सामर्थ्यप्रतीतं द्रव्यमिति' पाठानां त्रयोविंशतिकं दृश्यते।

तत्र प्रथमपाठद्वये— द्वयमपि साधु। द्वितीये पाठद्वये तु आद्यपाठ एव साधुः। द्वितीयपाठस्तु असाधुः, विशेष्यालाभात्। तृतीयपाठद्वयेऽपि आद्यपाठ एव साधुः। द्वितीयपाठस्तु आनर्थक्यादयुक्तः। संख्यातातिं' इति तृतीयपाठोऽपि आनर्थक्यादेवायुक्तः। चतुर्थे पाठपञ्चके द्वितीयपाठ एव युक्तः, अर्थसंगतेः। इतरेषु चतुर्षु पाठेषु तु नार्थसंगतिरिति विचार्यमार्यैः। पञ्चमे पाठद्वये आद्यपाठ एव युक्तः, अर्थसंगते.। द्वितीयपाठस्तु वाक्यार्थेऽनन्वयित्वादयुक्तः।

षष्ठे पाठत्रये आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्। सप्तमे पाठद्वये -आद्यपाठ एव युक्त, अर्थसंगतेः। अष्टमे पाठत्रये आद्यपाठः साधुः, तृतीयश्च, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'विभिन्नक्रियाक्षणसमवेता' इति, 'विभिन्नक्रियाक्षणः समवेता' इति, 'विभिन्नक्रियालक्षणसमवेता' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

अत्र—'क्रियारूपः क्षणः', 'क्रियाक्षणो द्रष्टव्यः', अत्र क्षणशब्देन क्षणिकः पदार्थ उच्यते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे हेलाराजीये – 'कारिकादिजातिस्त्वत्र' इति, 'कारकजातिस्त्वत्र' इति, 'कारकादिजातिस्तु' इति पाठत्रयं दृश्यते । अत्र प्रथमः पाठो युक्तः, आदिपदेन संख्याकालयोः संग्रहात् । द्वितीयपाठस्तु न युक्तः, तदसंग्रहात् । तृतीयपाठोऽपि न युक्तः, अत्रेति पदं विना कुत्रेति जिज्ञासाया अनुपरमात् ।

एतदग्रे––'नामपदगतया च कारकजात्या' इति, 'नामपदगतवाचककारकजात्या' इति, 'क्रियाजातिराख्यातपदगता' इति, 'क्रियाजातिः पदगता' इति, व्यक्तिद्वारेण वतिद्वारेणेति', 'समन्वयमेति' इति 'समेति' इति, 'एकार्थसमवायात् साधनशक्तिद्वारेण' इति 'साधनशक्तिएकार्थसमवायादिति', 'एकार्थसाधनशक्तिद्वारेण' इति, 'स्वव्यक्त्यात्मना' इति 'स्वव्यक्तात्मना' इति, 'क्रियान्वयिनी' इति, 'क्रियान्वयमेति' इति, सर्वपदार्थसमन्वयोपपत्ताविति', 'सर्वसमन्वयोपपत्ताविति', सर्वपदान्वयोपपत्ताविति', 'कल्प्यते वाक्यार्थ' इति. कल्पते वाक्यार्थ' इति पाठाः समुपलभ्यन्ते । तत्र प्रथमे पाठद्वये आद्यपाठ एव साधुः, अर्थसंगतेः ।

नामपदगतया चेत्यस्य––अर्थद्वारा नामपदसम्बद्धया इत्यर्थः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त । द्वितीयपाठद्वयेऽपि आद्यपाठ एव साधुः, अर्थसंगतेः । द्वितीयपाठस्तु न साधु पदगता इत्येतस्मादाख्यातपदाप्रतिपत्तेः । तृतीये पाठद्वयेऽपि आद्यपाठ एव साधुः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, चतुर्थपाठद्वये तु उभयं साधु, अर्थसंगतेः । पञ्चमे तु पाठगणे आद्यः साधुः, अर्थसंगतेः। इतरत्तु पाठद्वयमसाधु, अर्थासंगतेः । षष्ठे पाठद्वयेऽपि आद्यः साधुः, अर्थसंगतेः, द्वितीयपाठस्तु असाधुः, अर्थासंगतेः । सप्तमे पाठद्वये तु उभयं साधु, अर्थसंगतेः । अष्टमे पाठगणे तु पाठत्रयमपि साधु, अर्थसंगतेः । नवमे पाठद्वये तु आद्यः पाठः साधु, अर्थसङ्गतेः । तत्र हि कल्पते इत्यस्य प्रसिध्यति इत्यर्थः । द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः । तत्र हि पाठे कर्ता नोपात्त इति ।

एतदग्रे हेलाराजीये—'यथा च' इति, 'यथा वा' इति, 'असमसमयभाविभिः' इति, असमयभाविभिः' इति, 'असरमयूनाविभिः' इति, 'आवृत्त्योत्क्षेपणत्वादिजातिः' इति, 'आवृत्त्यक्षेपणत्वादिजातिरिति', 'अवृत्त्योक्षगणत्वादिजातिरिति', 'आवृत्तौत्क्षेपणत्वादिजातिरिति', 'तथा अधिश्रयणादिभिरिति'. 'यथा अधिश्रयणादिभिरिति', 'पचत्यादिक्रियाजातिरिति', 'पच्यादिक्रियाजातिरिति', 'चास्यानित्याया' इति, 'चात्यानित्याया' इति 'चास्यनित्याया' इति, 'उपपद्यते' इति 'उपपच्यते' इति पाठाः समुपलभ्यन्ते ।

तत्र प्रथमे पाठद्वये—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठोऽपि तदा युक्तः, यदा वाशब्दश्चार्थकः स्वीक्रियते । अन्यथा त्वर्थासंगत्या दुष्टः । द्वितीये पाठत्रयात्मके गणेऽपि आद्यपाठ एव युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम् । चतुर्थे पाठचतुष्टयात्मके गणेऽपि आद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठत्रयन्तु अर्थासङ्गत्याऽयुक्तम् । पञ्चमे पाठद्वये– आद्यपाठ एव युक्त, अर्थसङ्गतेः । द्वितीयपाठस्तु न युक्तः, यथाशब्दस्य पूर्वोपात्तत्वात् । षष्ठे पाठद्वये—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उभयमपि साधु, अर्थसङ्गतेः। सप्तमे पाठत्रयात्मके गणे आद्यपाठ एव युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्। अष्टमे पाठद्वये—आद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'उपसर्गादिभिरप्यत्र' इति, 'उपसर्गादिभिरत्र' इति, 'नामाख्यातसहभावी' इति, 'नामाख्यातसहभावि' इति, 'जातिपदार्थ एव' इति, 'जातिपदार्थक एव' इति, 'विश्रान्तस्यैवावसायात्' इति, 'विश्रान्तस्यैकावसायात्' इति, 'सम्बन्धजातिनिष्ठ एव' इति, 'सम्बन्धो जातिनिष्ठ एवेति', 'गुणशब्दानामपि' इति, 'गणशब्दानामपि' इति, 'गुणशब्दनामपि' इति, 'गुणजातिर्वाच्या' इति, 'गुणजातिर्वान्या' इति, 'जातिवाचित्वं समर्थयिष्यते' इति, 'जातिशब्दत्वं समर्थयिष्यते' इति पाठा उपलभ्यन्ते। तत्र प्रथमे पाठद्वये उभयमप्यसाधु, अर्थासङ्गतेः। 'उपसर्गादिरप्यत्र' इति पाठस्तु युक्तः, नामाख्यातसहभावी इत्यनेन जातिपदार्थक एवेत्यनेन च सामानाधिकरण्येनान्वयसम्भवात्। द्वितीये पाठद्वयेऽपि आद्यपाठ एव साधुः, उपसर्गादिरिति पुंस एव विशेष्यस्य दर्शनात्।

तृतीये पाठद्वये तु उभयं साधु, बहुव्रीहिणाऽर्थसङ्गतेः।

कप् तु वैकल्पिकः। चतुर्थे पाठद्वये आद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु न युक्तः, एकार्थपदस्य वैयर्थ्यात्। पञ्चमे पाठद्वयेऽपि आद्यपाठ एव साधुः, कर्मप्रवचनीये विधेयत्वसम्भवात्। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्त। षष्ठे पाठत्रयेऽपि आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासङ्गत्या शब्दाशुद्ध्या चायुक्तम्। सप्तमे पाठद्वयेऽपि आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अष्टमे पाठद्वये तूभयमपि साधु, अर्थसंगतेः। तत्र प्रथमपाठे अर्थसंगतिः स्फुटैव। द्वितीयपाठे तु षष्ठीतत्पुरुषसमाश्रयणेनार्थसंगतिः।

एतदग्रे हेलाराजीये—'तदित्थं वाजप्यायनमते' इति, 'तर्हि जप्यायनमते' इति, 'व्याडिमते तु', 'प्याडिमते तु' इति, 'साक्षात् क्रियासमन्यशोपपत्तेरिति' 'साक्षात् क्रियासमन्वयोपपत्तेरिति', 'वाक्यार्थङ्गतयेति', 'वाक्यार्थान्तर्गततयेति', 'वाक्यार्थोवगत' इति, 'ब्रह्मसत्तारूपैकजातिसमन्वयवशेन' इति, 'एकजातिसमन्वयवशेन' इति, एकजातिसमन्ययवशेन' इति, 'अनभिधीयमानाऽपि' इति, 'अनभिधेयाऽपि' इति, 'उपलक्षणीक्रियते' इति, 'उपलक्षणा क्रियते' इति, 'साधनाधारद्रव्यप्राधान्यमिति', 'साभवनाधारद्रव्यप्रधान्यमिति', 'समानाधिकरण्योपपत्तेरिति', 'सम्बन्धोपपत्तेरिति', 'गुणभूताऽत्र' इति, 'गुणभूतान्न' इति, 'व्यापाराविष्टमिति', 'व्यापारविशिष्टम्' इति, 'चात्र' इति; 'वाऽत्र' इति, 'तथा च वक्ष्यति' इति, 'इति वक्ष्यति' इति, 'सर्वोऽर्थ उच्यते' इति, 'सर्वार्थ उच्यते' इति, 'द्रव्यपदार्थतासिद्धा' इति, 'द्रव्यपदार्थतासिद्धौ' इति, 'द्रव्यशब्दवाच्यमिति', 'इत्यशब्दवाच्यमिति', 'जातिव्यक्तिविकल्पेन' इति, 'नातिव्यक्तिविकल्पेन' इति, 'सर्वशब्दविषय' इति, 'सर्वशब्दविषम' इति, 'प्रकृतिप्रत्ययरूपस्यापि' इति, 'प्रकृतिरूपस्यापि' इति, 'यथायोगम्' इति 'यथायोपम्' इति, 'समाम्नात' इति, 'समाश्चात्' इति, 'यस्मिंस्तत्त्वम्' इति, 'यस्मिश्च तत्त्वमिति', 'न

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विहन्यते' इति, 'न विहन्यन्ते' इति, 'सदैव प्रतीतेः' इति 'सदैव वा प्रतीतेः' इति, 'सदैव प्रतीते' इति पाठा उपलभ्यन्ते ।

तत्र प्रथमे पाठद्वये—आद्यपाठ एव साधुः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तः । द्वितीये पाठद्वयेऽपि आद्यपाठ एव साधुः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु तदभावादयुक्तः । तृतीये पाठद्वये तु द्वितीयपाठ एव युक्तः, अर्थसंगतिशब्दशुद्धिभ्याम् । प्रथमपाठस्तु तदभावादयुक्तः । चतुर्थपाठत्रये प्रथमपाठ एव युक्तः, अर्थसंगते, इतरत्पाठद्वयं तु तदभावादयुक्तम् । पञ्चमे पाठत्रये आद्यपाठस्य साधुत्वमेवं संभवति, सर्वासां जातीनां वेदान्तनये ब्रह्मसत्तारूपत्वाभ्युपगमात् । द्वितीयपाठोऽपि साधुः, अर्थसंगतेः । तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । षष्ठे पाठद्वये तु उभयमपि साधु, अर्थसंगतेः । सप्तमे पाठद्वये तु आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु तदभावादयुक्तः । अष्टमे पाठद्वये—प्रथमपाठ एव युक्तः, अर्थसंगतेः ।

तथा हि—अत्र पाठे साधनानां कर्तृत्वादिशक्तीनामाधारभूतस्य द्रव्यस्य प्राधान्यमित्यर्थः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

नवमे पाठद्वये तूभयं साधु, अर्थसंगतेः । दशमे पाठद्वये प्रथम; साधुः अर्थसंगतेः । द्वितीयस्तु तदभावादसाधुः । एकादशे पाठद्वये तु—उभयं साधु, अर्थसंगतेः । द्वादशे पाठद्वयेऽपि उभयं साधु, अर्थसंगतेः । आद्यपाठे चकारः समुच्चयार्थकः । त्रयोदशे पाठद्वयेऽपि उभयं साधु, अर्थसंगतेः । चतुर्दशे पाठद्वयेऽपि उभयं साधु, अर्थसंगतेः । पञ्चदशे पाठद्वये तु—आद्यः साधुः, शब्दशुद्धेरर्थसंगतेश्च । द्वितीयस्तु पाठः तदुभयाभावादसाधुः । षोडशे तु पाठद्वये उभयमपि साधु, अर्थसंगतेः । तथा हि—आद्यपाठे न काचन विप्रतिपत्तिः, द्वितीयपाठे तु वस्तुत इति पदमध्याहृत्य वाक्यार्थो बोध्यः ।

सप्तदशे पाठद्वये तु—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । अष्टादशे तु पाठद्वये—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । एकोनविंशे पाठद्वये तु—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, प्रकृतेः कारकसंख्याद्यर्थकत्वासंभवात् ।

विंशे पाठद्वये तु आद्यपाठ एव साधुः, अर्थसंगतेः, विप्रतिपत्त्यभावात् । द्वितीयपाठस्यापि साधुत्वं संभाव्यते ।

तथा हि तत्र पाठे—पोषमर्थपुष्टिमनतिक्रम्येत्यर्थः करिष्यते । एकविंशे पाठद्वये तु—प्रथमः पाठः युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु तदभावादयुक्तः । द्वाविंशे पाठद्वये तु उभयं साधु, अर्थसंगतेः । द्वितीयपाठे च शब्दस्तु तुशब्दार्थक इति । त्रयोविंशे पाठद्वये तु—प्रथमः पाठः साधुः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । चतुर्विंशे तु पाठत्रये—प्रथमपाठ एव युक्तः, अर्थसंगतेः । द्वितीये पाठे तु त्रिफलार्थासंगतिः । तृतीयपाठस्तु शब्दाशुद्धया निरस्तो वेदितव्यः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केषाञ्चित्साहचर्येण इति ॥ ३ ।

अवतरणिकायां हेलाराजीये—'जातिर्द्रव्यं वा पदार्थ' इति, 'जातिर्द्रव्यं वा' इति, 'इत्युक्ते' इति, 'इत्युक्तम्' इति, 'जातिपदार्थविषयशास्त्रोपयोगी' इति, 'जातिपदार्थविषये शास्त्रोपयोगी' इति, 'जातिपदार्थविषयः शास्त्रोपयोगी' इति, 'काण्डमिति' 'कारणमिति', 'वाक्यार्थभूतया आख्यातपदवाच्यया' इति, 'वाक्यार्थभूताख्यातपदवाच्यया' इति, 'आख्यातपदवाच्यया' इति, 'आख्यातपदवाच्यमिति', 'आख्यातपदवाच्य वा' इति, 'क्रियया' इति, 'क्रियाया' इति, 'तदाश्रयः साधनमिति', 'तत्राश्रयः साधनमिति', 'प्रतिनिधिर्माभूत' इति, प्रतिनिधामाभूदिति', प्रतिनिवामाभूदिति' इति, 'नित्यस्य कर्मण' इति, 'इत्यस्य कर्मण' इति, 'इत्यपदिश्यते' इति, 'इत्यपदिश्य' इति, 'प्रतिनिध्यनुपपत्तिरिति', 'प्रतिनिध्यनुपपत्तिरिति' 'प्रनित्य उपपत्तिरिति', तत्समर्थनायाह' इति, 'तत्समर्थनार्थमाहेति' ।

अस्यामेव कारिकायां -चतुर्थचरणे -'शक्त; प्रतिनिधीयते' इति, 'शक्तिः प्रतिनिधियते' इति ।

एतत्कारिकाव्याख्याने हेलाराजीये—'जातिः उपलक्षणम्' इति, 'जातिद्वयलक्षणमिति', 'कार्ययोगस्तु तस्या' इति, 'कार्ययोगस्तु तासाः' इति, 'शक्तितात्पर्येण' इति, 'शक्तिस्तात्पर्येण' इति, शक्तितात्पर्ये' इति, 'जातेरुपलक्षणत्वाद्' इति, 'जातेरुपलक्ष्यत्वात्' इति, 'केवलाया अप्रयोगार्हत्वात्' इति, 'केवलया अप्रयोगार्हत्वात्' इति, 'उपादानमिति' इति, 'उपादानसिति' इति, 'उपादानमितः' इति, 'तद्वाच्यया जात्या' इति, 'तद्वाप्यया जस्या' इति पाठा उपलभ्यन्ते ।

तत्र प्रथमे पाठद्वये आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु पदार्थपदाभावे विधेयाकाङ्क्षाया अनुपरमादयुक्तः । द्वितीये पाठद्वये उभयमपि साधु, अर्थसंगतेः ।

तृतीयपाठत्रये—आद्यपाठ एव युक्तः, जातिपदार्थविषयकत्वस्य शास्त्रविशेषणताया एवौचित्यात् । इतरत्पाठद्वयन्तु न युक्तम्, विवक्षितार्थासिद्धेः । चतुर्थपाठद्वये —आद्यपाठ एव युक्तः, साधुत्वात् । द्वितायपाठस्तु असाधुत्वादयुक्तः । पञ्चमे पाठद्वयेऽपि - आद्यपाठ एव युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । षष्ठे पाठद्वयेऽपि पाठद्वयस्य औचित्यानौचित्ये चतुर्थपाठद्वयवद् बोध्ये । सप्तमे पाठपञ्चके—पाठत्रयमाद्यं साधु, अर्थसंगतेः । चतुर्थपञ्चमपाठौ तु अर्थासंगतिशब्दाशुद्धिभ्यामसाधू । अष्टमे पाठद्वये—प्रथमः पाठः साधुः, अर्थसंगतेः । द्वितीयपाठस्तु तदभावादयुक्तः । नवमे पाठद्वयेऽपि—आद्यपाठ एव युक्तः, अर्थसंगते, शब्दशुद्धेश्च । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । दशमे पाठद्वयेऽपि —आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्थाप्रत्यायकत्वादयुक्तः । एकादशपाठत्रयेऽपि - आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽयुक्तौ । द्वादशे पाठद्वयेऽपि – आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु तदभावादयुक्तः । त्रयोदशे पाठत्रयेऽपि —आद्यपाठ एव युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम् । चतुर्दशे पाठद्वयेऽपि—उभयमपि साधुः अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्यामेव कारिकायां चतुर्थचरणे पाठद्वये—आद्यपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—प्रथमे पाठद्वये—आद्यपाठ एव युक्तः, अर्थसंगतेः, । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। द्वितीये पाठद्वयेऽपि। आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीये पाठत्रयेऽपि—आद्यपाठ एव साधुः, अर्थसंगतेः, । इतरत्पाठद्वयन्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्। चतुर्थे पाठद्वये अपि—आद्यपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु विवक्षितविरुद्धार्थ-प्रत्यायकत्वादयुक्तः। पञ्चमे पाठद्वयेऽपि – आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीय-पाठस्तु अर्थासंगत्याऽयुक्तः। षष्ठे पाठत्रयेऽपि - आद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय-पाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीयपाठोऽपि युक्त एव, इत इत्यस्य – हेतुपदसमभि-व्याहृतेति पदसमानार्थकत्वात्। सप्तमे पाठद्वयेऽपि - आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे एतत्कारिकाया व्याख्यान एव हेलाराजीये - 'तत्सदृशापरजातिसह-चरिताऽपि' इति, 'एतत्सदृशापरजातिसहचरिताऽपि' इति, 'यतः सदृशः परजाति-सहचरिताऽपि' इति पाठत्रयं समुपलभ्यते। तत्र प्रथमद्वितीयौ पाठौ युक्तौ, अर्थ-संगतेः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'शक्तिर्गृह्यते' इति, 'जातीयप्रतिगृह्यते' इति पाठद्वयमुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'साधनमात्रस्याक्षेपे' इति, 'साधनमात्राक्षेपे' इति पाठद्वयं समुप-लभ्यते। तदुभयं साधु, अर्थसङ्गतेः।

एतदनन्तरम् —'सिद्धे' इति, 'सिद्ध' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे—'विशिष्टजातीयप्रतिपत्त्यर्थम्' इति, 'विशिष्टजातीये प्रतिपत्त्यर्थम्' इति, 'विशिष्टजातिपत्त्यर्थः' इति, 'विशिष्टजातीयप्रत्त्यर्थम्' इति, 'विशिष्टजातीय-पत्त्यर्थम्' इति पञ्चपाठाः समुपलभ्यन्ते। तेषु प्रथमपाठो युक्तः, अर्थसङ्गतेः। द्वितीय-पाठोऽपि युक्तः, विषयसप्तम्याम् अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासङ्गत्याऽयुक्तम्।

एतदग्रे—'प्रयोगान्माभूत्प्रधानभूताया' इति, 'प्रयोगान्माभूत्प्रधानभूतास्या' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः।

एतदग्रे –'त्यागे क्रियाया' इति, 'त्यागक्रियाया' इति, 'त्यागः क्रियाया' इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वयन्तु अर्था-सङ्गत्याऽयुक्तम्।

अत्रैव –'क्रियाया असंपत्तिरिति', 'क्रियाऽसंपत्तिरिति' पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसङ्गतेः।

एतदग्रे हेलाराजीये – 'शिष्टसमाचारादिति', विशिष्टसमाचारादिति', 'शिष्टाचारादिति' पाठत्रयं समुपलभ्यते। तत् त्रितयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र शिष्टाः—गुरुभिः मातापित्राचार्यैः सम्यक् शिक्षिताः। विशेषेण शिष्टा विशिष्टा इति। आचारसमाचारयोस्तु सामान्यविशेषभाव इति न भेदः।

एतदग्रे हेलाराजीये—'परिगृह्यते' इति, 'परिगृह्यतो' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्त इति।

एतदग्रे—'न चैवमतिप्रसङ्ग' इति, 'न चैवमिति नित्यप्रसङ्ग' इति पाठद्वयं समुलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'चोदितप्रतिनिधिविषय एव' इति, 'चोदितविषय एवेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, निराकाङ्क्षस्य वाक्यार्थस्य प्रतिपत्तेः। द्वितीयपाठे तु कश्चोदित इत्याकाङ्क्षाया अनुपरमाद् न साधुत्वम्।

अत्रैव—'एतस्य' इति, 'एतश्च' इति पाठद्वयं दृश्यते। तत्र प्रथमपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—'न्यायस्येष्टत्वात्' इति, 'न्यायस्य प्रवृत्तत्वात्' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'तदसामर्थ्ये' इति, 'तदसामयर्थे' इति पाठद्वयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—क्वचित्पुस्तके—'जातिर्नियमं न विधत्ते' इति पाठो दृश्यते। स तु न युक्तः, जातेर्नियमविधौ कर्तृत्वसंभावनाया अभावात्।

तस्मात्—'उपलक्षणत्वाच्च जातेर्नियमं न विधत्ते' इति युक्तः पाठः। निरपेक्षस्वरूपा श्रुतिश्चात्र कर्त्री।

एतदग्रे हेलाराजीये—'उपघातकनिवारणपरे' इति, 'उपघातनिवारणपरे' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—'निवारणपरे वाक्ये' इति, 'निवारणवाक्ये' इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

अत्रैव—'काकादिरिति' इति, 'काकादिरीति' इति, कादिरिति' इति, 'काकादीति' इति पाठचतुष्टयं दृश्यते। तत्राद्यचतुर्थपाठौ युक्तौ, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽयुक्तम्। क्वाकादिरिति पञ्चमः पाठोऽपि न युक्तः, शब्दाशुद्धेः।

अत्रैव—'सदृशोपादाने' इति, 'सदृशोपादानमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे हेलाराजीये—'श्रौतार्थत्याग' इति, 'श्रौतार्थत्यागे' इति, 'श्रौतार्थस्य त्याग' इति, 'श्रौतस्यार्थस्य त्याग' इति पाठचतुष्टयं दृश्यते। तत्राद्यतृतीयचतुर्थपाठा एव युक्ताः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'यत्र च संभव' इति, 'यत्र तु संभव इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे हेलाराजीये—'सफला' इति, 'सकला' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'पलाशे बध्नाति' इति, 'पलाशं बध्नाति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'तत्सदृशकदरादि' इति, 'तत्सदृशकरादि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः,। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त।

एतदग्रे हेलाराजीये—'जातेरुपादानम्' इति, 'जातेरूपादानम्, इति, 'जातेरुपादानात्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठे शब्दाशुद्धिः, तृतीयपाठे चार्थासंगतिः।

एतदग्रे 'शक्त्युपलक्षणमिति, 'शक्तिलक्षणमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'न कार्ययोगिनी' इति 'कार्ययोगिनो' इति, 'न कार्मयोगिनी' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः; द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव 'न कार्ययोगिनी इति' इति, 'न कार्ययोगिनी' इति पाठद्वय दृश्यते। तत्र प्रथमपाठ एव युक्तः, इतिशब्दसत्त्व एवार्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—'अशक्तत्वे तमन्तरेण' इति, 'अशक्तत्वेनान्तरेण' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः।

एतदग्रे 'शक्तं स्यादिति', 'शक्तस्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ ए युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे 'तज्जातीयमेव' इति, 'त्वं जातीयमेव' इति पाठद्वय दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासगत्याऽयुक्तः।

एतदग्रे 'उपादीयेत' इति, 'उपादीयते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, पूर्वत्र स्यादिति लिङ उपादानेन अत्रापि लिङ एवौचित्यात्।

एतदग्रे—'तदशक्तत्वे' इति, 'तदशक्तते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—'उपलक्षणे चरितार्थत्वादिति' 'उपलक्षणं चरितार्थत्वादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'अन्यस्यापि तत्कार्ययोगे' इति, 'असत्यपि तत्कार्ययोगे' इति, 'असन्यस्यापि तत्कार्ययोगे' इति, 'अस्यापि तत्कार्ययोगे' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—'तत्कार्ययोगे' इति समस्तम्, तत् कार्ययोगे' इति व्यस्तं पाठद्वयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'तदुपलक्षिता शक्तिरिति' 'तदुपलभिता शक्तिरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे 'अर्थान्तरगताऽप्यपर्युदस्तत्वात्' इति, 'अर्थात्परगताऽप्यपर्युदस्तत्वात्, इति, 'अर्थान्तरगतार्थपर्युदस्त्वादिति, पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव–'उपादीयते' इति, 'उपादियते' इति पाठद्वयं दृश्यते। तत्राद्यः पाठः साधुः, द्वितीयस्तु असाधुः।

अस्वातन्त्र्यफलो बन्धि ॥ ४ ।

अस्याः कारिकायाः प्रथमे चरणे– 'बन्धिरिति', 'बाध्निरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादसंगतः।

अस्या एव कारिकाया द्वितीयपादे–'प्रमाणादीव शिष्यते' इति, 'प्रमाणापरिशिष्यते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

अत्रैव–'प्रमाणादीव' इति, 'प्रमाणादाव' इति, 'प्रमाणादिव' इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव साधुः। इतरत्पाठद्वयन्तु असाधु, शब्दाशुद्धेरर्थासंगतेश्च।

अस्या एव कारिकायाश्चतुर्थे चरणे—'शक्तिहीनम्' इति, 'शक्तिहिनम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु शब्दाशुद्धिः, छन्दोऽशुद्धिश्चेति दोषद्वयम्।

अस्या एव कारिकाया व्याख्याने हेलाराजीये–'अत इति, अस्वातन्त्र्यफलस्य' इति, 'अत इत्येस्वातन्त्र्यफलस्येति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु शब्दाशुद्धिर्दोषः।

एतदग्रे—'बन्धेर्विधानात्' इति, विधेर्विधानात्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'चोदनात् जातेरिति', 'चोदना जातेरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे हेलाराजीय एव –'प्रतिपाद्यत्वेऽप्युपलक्षणत्वाभावेऽपि' इति, प्रतिपाद्यत्वेऽप्युपलक्षणत्वभाक्तेऽपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'प्रतिपाद्यत्वेषूपलक्षणत्वाभावेऽपि' इति पाठोऽपि अयुक्तः, शब्दाशुद्धेरर्थासंगतेश्च।

एतदग्रे—'अस्वातन्त्र्यप्रयोजनबन्धिविधिसामर्थ्यादिति', स्वातन्त्र्यप्रयोजनबन्धिविधिसामर्थ्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः,। द्वितीयपाठस्तु विवक्षितार्थाप्रत्यायकत्वादयुक्तः।

अत्रैव–'अस्वातन्त्र्यप्रयोजनबन्धिविधिसामर्थ्यादिति' 'अस्वातन्त्र्यप्रयोजनं बन्धिविधिसामर्थ्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, विवक्षितार्थप्रत्यायकत्वात्। द्वितीयपाठस्तु तदभावादयुक्तः। 'अस्वातन्त्र्यप्रयोजनवधविधिसामर्थ्यादिति' पाठोऽपि अर्थाऽसंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'शक्तिहीनस्य खदिरादेरिति', 'शक्तिहीनखदिरादेरिति' पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगते।

एतदग्रे—'प्रतिनिधीयते' इति, 'प्रतिनिधायते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—'वाक्यार्थभूता हि बन्धिक्रिया' इति, 'वाक्यार्थभूता हि वधिक्रिया' इति, 'वाक्यार्थभूतादि च निक्रिय' इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्। तृतीयपाठस्तु आदि पदार्थाप्रसिद्ध्याऽपि हेयः। 'यूपे पशुं बध्नाति' इति, बन्धिक्रियैवात्र प्रसिद्धा इति।

एतदग्रे—'तत्संपादनशक्तस्येति' 'तत्संपादानशक्तस्येति', 'तत्सपादानशक्तस्येति', 'सुत्संपादनशक्तस्येति' पाठचतुष्टयं समुपलभ्यते। अत्राप्याद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽयुक्तम्।

एतदग्रे – 'पदार्थस्य' इति, 'पादार्थस्येति' पाठद्वयं संभाव्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'कोऽनुरोध' इति, 'कोऽनुबन्ध' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः। अग्रे - सर्वथाऽसावनुरोध्य इति. अनुरोधक्रियाया दर्शनात्। द्वितीयपाठस्तु वक्ष्यमाणानुरोधक्रियाविरोधादुपेक्ष्यः।

एतदग्रे—'इत्याशङ्क्योक्तम्' इति, 'इत्याशंक्यातं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठे तु तदुभयमपि नास्ति इति हेयः सः।

एतदनन्तरम्—'प्रमाणादीव' इति, 'प्रमाणादाव' इति, 'प्रमाणादिव' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठे तु शब्दाशुद्धिः। तृतीयपाठे तु अर्थासंगतिः।

अत्रैव—'शिष्यते' इति, 'शिष्यतं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाऽशुद्ध्याऽयुक्तः।

एतदग्रे - 'यथा दृष्टफलम्' इति, 'यादृशं फलं' इति, 'यादृशं दृष्टफलम्' इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, तथा इत्याद्युत्तरग्रन्थानुरोधात्। अत एव इतरत्पाठद्वयं न युक्तम्।

एतदग्रे--'तदङ्गभूतोऽपि बन्धिरिति', 'तदङ्गभूतोऽपि बध्निरिह' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे हेलाराजीये — सर्वथाऽमावनुरोध्य' इति, 'सर्यथाऽसावनुरोध्य' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः।

अत्रैव—'असावनुरोध्य' इति, 'असावनुधेति', 'असावतुरोध' इति 'असावनुरोधः, इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव साधुः, अर्थसंगतेः। इतरत्पाठत्रयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'तथा हि असति' इति, 'तथा सति' इति पाठद्वयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'पशोर्यूपे बन्धने' इति 'पशोर्मपेर्बन्धने' इति, पर्शोर्पूयः बन्धने' इति, 'पशोर्यूपबन्धने' इति पाठचतुष्टयं दृश्यते। तत्र प्रथमचतुर्थपाठौ युक्तौ, मध्यमौ तु द्वावयुक्ताविति। तत्र मध्यमयोरयुक्तत्वे शब्दाशुद्धिरर्थासंगतिश्च हेतू। प्रथमचतुर्थ-योर्युक्तत्वे तु अर्थसंगतिः हेतुः।

अत्रैव—'बन्धने प्रमाणाद्यनुपपत्ताविति', 'बन्धनप्रमाणाद्यनुपपत्ताविति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंग-त्याऽयुक्तः।

अत्रैव—'प्रमाणाद्यनुपपत्ताविति', 'प्रमाणाद्यरपपत्ताविति' पाठद्वयं दृश्यते। तत्र प्रथमपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, शब्दाशुद्धेः।

अत्रैव—'अवदानग्रहाभावात्' इति, 'अवदानग्रहयोरभावात्' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। किन्तु प्रथमपाठे—अवदानग्रहयोरभावादिति, अवदानग्रहस्याभावादिति वा विग्रह इति सन्देहो जायत इति कृत्वा ज्यायस्त्वं द्वितीयपाठस्य।

एतदग्रे—'यजेरेवासंपत्तिः' इति, 'यजरेवासंपत्तिः' इति, 'यजेरसंपत्तिरिति' पाठत्रयं दृश्यते। तत्र प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः। असति बाधके सर्वं वाक्यं सावधारणं भवति इति तृतीयपाठेऽपि एवकारार्थस्य लाभसम्भवात्। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—'तदनुरोधादिति', 'तदउरोधादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'प्रमाणम्' इति, 'प्रमाण्यमिति', 'प्रमाणो' इति 'प्रमासो' इति 'हियां' इति, 'हिसां' इति पाठानां द्विकत्रयं समुपलभ्यते।

तत्र प्रथमे द्विके प्रथमः पाठः साधुः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽ-साधुः। द्वितीये द्विके पाठद्वयमपि असाधु, शब्दतोऽर्थतश्च। तृतीये द्विकेऽपि पाठद्वय-मपि असाधु, हिंसा इति पाठस्तु साधुः।

एतदग्रे—'ल्युटचेज् विषये रूपम्' इति, 'ल्युटचे वषयरूपमिति', 'ल्युटचेज् विषयरूपमिति', 'ल्युडञ्विषये रूपमिति', अयोन्निषयरूपमिति पाठपञ्चकं समुपलभ्यते। तत्र प्रथमतृतीयपाठावेव साधू, अर्थसंगतेः। इतरत्पाठत्रयन्तु असाधु शब्दतोऽर्थतश्च।

एतदग्रे—'रूपम्-आत्वे च कृते' इति, 'रूपवत्त्वे च कृते' इति, 'रूपमात्वञ्च कृते' इति, 'रूपम्, आत्वे कृते' इति, कृते' इति कृते' इति, 'समानम्' इति 'मानम्' इति पाठानां द्विकचतुष्कं समुपलभ्यते।

तत्र प्रथमे द्विके प्रथमपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु तत्रासाधुः, अर्थासंगतेः।

द्वितीये द्विके प्रथमः पाठोऽसाधुः, शब्दतोऽर्थतश्च। द्वितीयपाठस्तु अर्थसंगत्या साधुः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृतीये द्विके प्रथमस्य साधुत्वम्, शब्दतोऽर्थतश्च। द्वितीयपाठस्य तु असाधुत्वम्, शब्दतः।

चतुर्थे द्विके प्रथमस्य असाधुत्वमर्थतः। द्वितीयस्य तु शब्दतोऽर्थतश्च साधुत्वम्।

एतदग्रे—'तस्यारम्भ' इति 'यस्यारम्भ' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न युक्तः यच्छब्दार्थपरामर्शकस्य तच्छब्दस्य पूर्वत्र उत्तरत्र वाऽभावात्।

एतदग्रे—'प्रशब्देन' इति 'प्रशदन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्या शब्दाशुद्धया चायुक्तः।

एतदग्रे—'अवदानग्रहणपर्यन्तस्य' इति, 'अवदानतनोदस्य' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धया विवक्षितार्थाप्रतीत्या चायुक्तः।

एतदग्रे—'तदुत्तरस्य' इति, 'तदुत्तररय' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु नार्थसंगतिर्न वा शब्दशुद्धिरित्यसाधुत्वम्।

एतदग्रे—'प्राकरणिकस्य' इति, 'प्राकरणेकस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठे तु तदुभयाभाव इति न स युक्तः।

अत्रैव—'अङ्गकलापस्य' इति, 'अङ्गकलपस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु विवक्षितार्थासिद्धिः।

अत्रैव—'अनुरोध' इति, 'उपरोध' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्त, पूर्वत्र असावनुरोध्य इति दर्शनात्। अत एव द्वितीयपाठो न युक्तः। अनुरोधोपरोधयोः स्वरूपभेदाच्च।

एतदग्रे—'अथमत्र' इति, 'अथ कथमत्रेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'पक्षद्वयेऽप्याशय' इति, 'पक्षद्वयथाशय' इति, 'पक्षद्वये आशय' इति, 'पक्षद्वयाद्यादायः' इति पाठचतुष्टयं दृश्यते। अत्र प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः। द्वितीयचतुर्थौ तु शब्दाशुद्धया विवक्षितार्थाप्रत्यायकत्वेन चायुक्तौ।

एतदग्रे—'यदि नामजातेरिति' 'यदि नामजात' इति, 'यदि नामज्ञाते' इति, यदि नामज्ञातेरिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'शक्त्यवच्छेदकत्वेनोपात्तायाः' इति, 'शक्त्यवच्छेदेनोपात्ताया' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शक्तेरवच्छेद्याया इत्यग्रिमग्रन्थदर्शनेन जातौ शक्त्यवच्छेदकत्वस्यैव सम्प्रत्ययात्।

एतदग्रे—'प्रत्ययार्थस्य शक्तेरिति', 'प्रत्ययार्थशक्तेरिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—'अवच्छेद्याया अपि, इति, 'अवच्छेद्या अपि' इति, 'रवच्छेद्या अपि' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'त्यागो न युक्त' इति, 'त्यागो न मुक्त' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एवार्थसंगत्या साधुः। द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे—'अपि त्वन्यगताऽपि' इति, 'अपि त्वन्यत्वन्यगताऽपि' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे – 'माभूत्तद् वाचिन' इति, 'माभूद् वाचिन' इति, 'साभूद् वाचिन' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वयन्तु अर्था-संगत्याऽयुक्तम्।

एतदग्रे—'पदस्यानर्थक्यम्' इति, 'पदधस्यानर्थक्यम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु एतद्द्वयाभावः।

एतदग्रे—'गामालभेतेत्यादौ' इति, 'नामाभेरातेत्यादौ' इति, 'गालभेत्येत्यादौ' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्था-संगत्या शब्दाशुद्धया चायुक्तम्।

संश्लेषमात्रं बध्नातिरिति ॥ ५।

कारिकाया अवतरणिकायां हेलाराजीये—'इदानीमत्रैव' इति, 'तदानीमत्रैव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्था-संगत्याऽयुक्तः।

अत्रैव—लिङ्गेनापि' इति, 'लिङ्गनोऽपि' इति पाठो दृश्यते। अत्रापि आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदनन्तरम् —'प्रतिनिधिमुपपादयति' इति, 'प्रतिमेनापिपादयति' इति पाठद्वयं दृश्यते। अत्राप्याद्यपाठ एद युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु शब्दा-शुद्धयाऽर्थासङ्गत्या चायुक्तः।

अस्या एव कारिकायाः प्रथमे पादे—'संश्लेषमात्रं बध्नाति' इति 'संश्लेष-मात्रं वध्नातिरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीय-पाठस्तु शब्दाशुद्धयाऽयुक्तः।

अस्या एव कारिकायास्तृतीयपादे —'तता' इति, 'ततो' इति पाठद्वयं दृश्यते। तत्र प्रथमपाठो न युक्तः, अर्थासङ्गतेः। द्वितीयपाठस्तु अर्थसङ्गत्या युक्तः।

एतस्या एव कारिकाया व्याख्याने हेलाराजीये – 'बध्नातिः इत्युक्तः' इति. 'बध्नातिरित्युक्तम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, बध्नात्यर्थ उप-चारादिति पूर्वग्रन्थानुरोधेन अर्थशब्दस्य पुंस्त्वेन च पुंप्रयोगस्यैवौचित्यात्। यद्वा, 'बध्नातिरिति' इति शब्दस्वरूपस्यैव वचि कर्मत्वान्नपुंसकप्रयोगो युक्तः।

एतदग्रे—'तदेवास्वातन्त्र्यलक्षणफलानपेक्षम्' इति, 'तदेव स्वातन्त्र्यलक्षण-फलानपेक्षम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव —'तदेवास्वातन्त्र्यलक्षणफलानपेक्षमिति', 'तदेवास्वातन्त्र्यलक्षणं फलानपेक्षम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव —'तदेवास्वातन्त्र्यलक्षणफलानपेक्षम्' इति, 'तदेवास्वतन्त्रलक्षण-फलानपेक्षम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव 'फलानपेक्षम्' इति, 'फलापेक्षम्' इति, 'फलापेक्षयम्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

अत्रैव –'तन्मात्रम्' इति, 'ततेन्मात्रम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्ध्या चायुक्तः।

एतदग्रे –'बध्नात्यर्थोऽभिमत' इति, बन्ध्यर्थोऽभिमत' इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः। तथा हि आद्यपाठस्तिपा निर्देशः, द्वितीयपाठे तु इका निर्देश इति पाठभेदेऽपि अर्थैक्यमेव।

अत्रैव –'अयिमतः' इति, 'अभिमतः' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु अर्थसंगत्या युक्तः।

एतदग्रे हेलाराजीये—'सम्पाद्यत्वसम्भवे' इति, 'सम्पाद्यत्वात् सम्भवे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'कदरोपादाने' इति, 'कदरेऽपादाने' इति पाठद्वयं दृश्यते। 'कदरोपासने' इति तृतीयपाठोऽपि दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'संश्लेषादुत्तरकालं प्रमाणादीनाम्' इति, 'संश्लेषादुत्तरं प्रमाणादीनाम्' इति संश्लेषानुत्तरं प्रमाणादीनाम्' इति, 'संश्लेषादुत्तरं प्रमाणादिनाम्' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽर्थासङ्गत्या चायुक्तम्।

एतदग्रे —'हृदयेऽवद्यति' इति, 'हृद्यदयेऽवद्यति' इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासङ्गत्या चायुक्तः।

एतदग्रे—'अथ वक्षसि' इति, 'अपचसी' इति, 'अपवजसी' इति, 'अथ वक्षसी' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽर्थासङ्गत्या चायुक्तम्।

एतदनन्तरम्— 'इत्यादिवचनेन' इति, 'इत्यादिवचने' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः।

एतदग्रे—'अथवा पूर्वं बन्धिरेव लिङ्गमासीत्। इदानीं यदि संश्लेषमात्रं बध्नातिस्ततः प्रमाणाद्यनुशासनं लिङ्गमित्यर्थ' इति, 'अथवा पूर्वं·········प्रमाणाद्यनुशासनं लिङ्गमित्यर्थं' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्त', वाक्यपरिसमाप्तेः। द्वितीयपाठे तु वाक्यापरिसमाप्तिर्दोषः।

अत्रैव वाक्ये—'बन्धिरेव' इति, विधेरेव' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव वाक्य – 'इदानीं यदि' इति, 'यदि इदानीम्' इति पाठद्वयं दृश्यते। तदुभयं साधु, पदयोः पौर्वापर्येऽर्थभेदाभावात्।

एतदग्रे 'पशुविशसनाङ्गस्य हि' इति, 'पशुविशनाङ्गस्य एव' इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसङ्गतेः।

एतदनन्तरम् – 'बन्ध्यर्थस्य' इति, 'बन्धनार्थस्य' इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसङ्गतेः।

अत्रैव – 'अत्रोपादानम्' इति 'अन्यत्रोपादानम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदनन्तरम् – 'असमर्थश्च' इति, 'असमर्थस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे – 'एकप्रकरणोपात्तेति', 'पकप्रकरणोपात्तेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे – पर्यालोचनालभ्यः प्रतिनिधिः' इति पर्यालोचनालभ्यः प्रतिनितिः' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे – सम्प्रति' इति, संगति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदनन्तरम् – प्रकरणसामर्थ्यादिति', करणसामर्थ्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त।

एतदग्रे – 'शक्तिः कार्यस्य' इति, 'शक्तः कार्यस्य' इति, 'शक्ति कार्यस्य' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽसाधु।

अत्रैव – 'कार्यस्य निर्वर्तक' इति, 'कार्यनिर्वर्तक' इति, 'कार्यस्य निवर्तक' इति पाठत्रयं समुपलभ्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु विवक्षितार्थविरुद्धार्थप्रत्यायकत्वादयुक्तः।

एतदग्रे – 'दर्शनभेद' इति, 'दर्शन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे – 'नियममात्रबाधश्चेति' इति 'नियमात्रबाधश्चेति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे – 'यज्यर्थत्वात्' इति, 'यज्यर्थता' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव – 'यजति' इति 'यति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव – 'क्रियैक' इति, 'क्रियैक' इति पाठद्वयं दृश्यते। अत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। प्रथमपाठस्तु शब्दाशुद्ध्याऽयुक्त।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--'भावापन्नं द्रव्यमात्रम्' इति, भावायत्तं द्रव्यमात्रम्' इति, 'भावानं द्रव्यमात्रम्' इति, 'भावापन्नद्रव्यमात्रम्' इति, 'भावापन्नं द्रव्यैकमात्रम्' इति पाठपञ्चकं दृश्यते। तत्र प्रथमचतुर्थपाठौ युक्तौ, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु शब्दाशुद्ध्याऽयुक्तौ। पञ्चमपाठे त्वेकपदमधिकम्।

एतदग्रे—'सामर्थ्यातिप्राप्तम्' इति, 'सामर्थ्यातिप्राप्तानेव' इति, 'सामर्थ्यप्राप्तम्' इति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये —'यज्यर्थं' इति 'यन्नर्थं' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्या अर्थासगत्या चायुक्तः।

एतदग्रे — द्रव्यापक्षेपस्यायोगात्' इति, 'द्रव्यापक्षमायोगात्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्या अर्थासंगत्या चायुक्त।

एतदग्रे —'इत्थ च' इति, च इत्थम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे —'क्रियाप्रधानत्वेऽप्याख्यातस्य' इति, 'क्रियाप्रधानत्वेनाख्यातस्य' इति, 'क्रियाप्रधानत्वे व्याख्यातस्य' इति पाठत्रयं दृश्यते। तत्र द्वितीयः प्रथमश्चेति पाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे — द्रव्यसामान्यं श्रुतिप्राप्तसन्निधानम्' इति, 'द्रव्यसामान्यश्रुतिप्राप्तसन्निधानम्' इति पाठद्वयं दृश्यते। तत्र प्रथमः पाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु समासे पूर्वनिपातासंगत्याऽयुक्त।

अत्रैव 'शाब्दमेव' इति 'शब्दमेव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

अत्रैव — शाब्दमेव' इति, 'शाब्दमेवम्' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न युक्तः, इत्थं च इति पूर्वया उक्त्याऽर्थपौनरुक्त्यात्।

एतदनन्तरम्—'एवञ्च व्रीहिभिः' इति, 'तत्र व्रीहिभिः' इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसङ्गतेः।

अत्रैव—'तत्र प्रसिद्धिः' इति, 'तत्र व्रीहिभिः' इति, 'तत्र व्रीहिनिः' इति पाठत्रयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसङ्गतेः। प्रथमतृतीयपाठौ तु अर्थासंगत्या शब्दाशुद्ध्या चायुक्तौ।

एतदनन्तरम्—'व्रीहित्वेनाविरुद्धैकार्थसमवायेन' इति, 'व्रीहित्वनाविरुद्धैकार्थसमवायेन' इति, व्रीहिमित्येकार्थसमवायेन' इति, 'व्रीहित्वेनावरुद्धैकार्थसमवायेन' इति 'व्रीहित्वेनैकार्थे समवायेन' इति, 'व्रीहित्वेनैकार्थसमवयेन' इति पाठषट्कं दृश्यते। तत्राद्यपञ्चमपाठावेव युक्तौ, अर्थसगतेः। इतरत्पाठचतुष्टय तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

एतदनन्तरम्--'विशेषेण परिपोष इति, 'विशेषणपरिपोष' इति, 'विशेषणं परिपोष' इति, 'विशेषेण परिपोषाद्' इति पाठचतुष्टयं समुपलभ्यते। तत्राद्यपाठ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्। 'विशेषेण परिपोषम्' इति, 'विशेषेण परिशेष' इति पाठद्वयमप्ययुक्तम्, अर्थासंगतेः।

एतदग्रे—'अध्यावापार्था हि' इति 'अध्यावापात्यहि' इति, 'अध्यावापार्थस्य हि' इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—'शब्दसामर्थ्यप्राप्तं द्रव्यत्वमात्रमविरोधान्न बाधते' इति, 'शब्दसामर्थ्यमविशेषान्न बाधते' इति, 'न बाधेत' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'श्रुतिसामर्थ्यप्राप्तमिति', 'श्रुतिसामर्थ्यं प्राप्तमिति', 'श्रुतिसारर्थ्यप्राप्तमिति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्।

एतदग्रे—'अर्थसामर्थ्यायातमिति', 'अर्थसामर्थ्यात् प्राप्तमिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'द्रव्यत्वमात्रस्य' इति, 'द्रव्यमात्रस्य' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, जातिजातिमतोरभेदोपचारेणार्थसंगतेः।

एतदग्रे—'अंगभावश्चोदित' इति, 'अंगभावच्चोदित' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽसाधुः।

एतदग्रे—'व्रीहित्वस्य' इति, 'व्रीहितस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, स्वार्थे विवक्षिते शब्दशुद्धेः। द्वितीयपाठस्तु तदभावादयुक्त।

एतदग्रे—सामान्यमात्रस्य परिपोषे' इति, 'सामान्यमात्रस्यापरिपोषे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्पष्टैव।

एतदग्रे—'प्रतिनिधिविषये चोदितस्य' इति, 'प्रतिनिधिविषयचोदितस्य' इति पाठद्वयं दृश्यते। अत्रासन्धिग्धार्थत्वादाद्यपाठ एव युक्तः। द्वितीयपाठे तु समासे सन्देह इति स पाठो न युक्तः।

एतदग्रे—ननु चाध्यावापे' इति, 'ननु वाच्यापिपे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। प्रथमपाठेऽध्यावापोऽध्याहारः, स च प्रतिनिधेर्बोध्यः।

एतदग्रे—'व्रीहिभिर्द्रव्यत्वस्य' इति, 'व्रीहिद्रव्यम्' इति, 'व्रीहिभिर्द्रव्यम्' इति, 'व्रीहित्वेन द्रव्यम्' इति, 'व्रीहिभिर्द्रव्यत्वम्' इति पाठपञ्चकं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। इतरत्पाठचतुष्टयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—'श्रुतिसामर्थ्यप्राप्तम्' इति, 'श्रुतिसामर्थ्यप्राप्तेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'ब्रीहिश्रुत्या विशेषान्तरादवच्छेद' इति, 'ब्रीहिश्रुत्यविशेषान्तरादवच्छेद' इति 'ब्रीहिश्रुत्या विशेषान्तरावपेऽवच्छेद' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—'तदा तदपि' इति, 'यदा तदाऽपि' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'प्राप्तसन्निध्येवेति' इति, 'प्राप्तन्निध्यम् इति, 'प्राप्तम्' इति, 'सन्निध्यावेति' इति 'न्निध्येति' इति पाठपञ्चकं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठचतुष्टयं तु यथायथं शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—'ब्रीहिश्रुतेरानर्थक्यम्' इति, 'ब्रीहिश्रुत्योरानर्थक्यम्' इति, 'ब्रीहिश्रतेरानर्थक्यम्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'ब्रीहित्वेन द्रव्यत्वे' इति, 'ब्रीहित्वे द्रव्यत्वे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासगत्याऽयुक्तः।

एतदग्रे—'वस्तुसामर्थ्यादिति', 'वक्तृसामर्थादिति' पाठद्वयं दृश्यते। तत्राद्यपाठेऽर्थसंगतिरिति स युक्तः। द्वितीयपाठे तु तदभाव इति स दुष्टः।

एतदग्रे—'न हि यत्र' इति, 'तथा हि यत्र' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'यत्र ब्रीहित्वैकार्थसमवायि' इति, 'यत्वैकार्थसमवायि' इति, 'यवत्वैकार्थसमवायि' इति पाठत्रयं समुपलभ्यते। अत्र प्रथमपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—'यवत्वैकार्थसमवायि सम्भवति' इति, 'यवत्वैकार्थसमवायि न' इति पाठद्वयं दृश्यते। तत्र यद्येतद्वाक्यस्यारम्भे 'न हि यत्र' इति पाठः, तदा प्रथमपाठः साधुः। यदि तु एतद्वाक्यारम्भे 'तथा हि यत्र' इति पाठः, तदा द्वितीयपाठः साधुः।

एतदग्रे—'कश्चिच्छब्दसामर्थ्यायात' इति, 'कश्चिच्छब्दं सामर्थ्यायात' इति, 'कश्चिच्छब्दसामर्थ्याद् यात' इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासङ्गत्याऽयुक्तम्।

एतदनन्तरम्—'भवति यत्र' इति, 'न भवति यत्र' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदनन्तरम्—'पक्षे प्राप्तौ' इति, 'पक्षप्राप्तौ' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदनन्तरम्—'सत्याम्' इति, 'सेत्याम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे —'एकचोदना' इति, 'एका चोदना' इति, 'एकचोदन' इति, 'चोदना' इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, एकस्य चोदना इति षष्ठीतत्पुरुषेऽर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः। अर्थासङ्गतिस्तु तदन्यनिवृत्तिफला' इत्यग्रिमग्रन्थेन सह विरोधात्। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। चतुर्थपाठस्तु विवक्षितार्थासिद्ध्याऽयुक्तः।

एतदनन्तरम्—'तदन्यनिवृत्तिफलेतीति', 'तदन्यनिवृतिफलेतीति', 'तदन्यनिवृत्तिफलेपिति' पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त। तृतीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदनन्तरम्—'पदार्थस्वरूपविमर्शायातोऽसम्भवनियम' इति, 'पदार्थस्वरूपिविमर्शायातोऽसम्भवनियम' इति, 'पदार्थस्वरूपविमर्शनातोऽसम्भवनियम' इति, 'पदार्थस्वरूपविमर्शाणतोऽसम्भवनियम' इति 'पदार्थस्वरूपविमर्शायात सम्भवनियम' इति पाठपञ्चकं समुपलभ्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठोऽपि युक्त एव, अर्थसंगतेः। चतुर्थपाठस्तु शब्दाशुद्ध्याऽयुक्तः एवं पञ्चमपाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे —'अखण्डेऽपि हि' इति, 'अखण्डि हि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे —'वाक्यार्थनये' इति, 'वाक्यार्थे' इति, 'वाक्याष्टनये' इति पाठत्रयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, वाक्यस्याखण्डत्वसम्भवात्। प्रथमपाठस्तु न युक्तः अर्थासंगतेः। नहि वाक्यार्थनयस्याखण्डत्वं सम्भवति। तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे 'अपोद्धारदशागतो भेदसंसर्गादिविकल्प' इति, 'अयोद्धारदशागतो भेदसंसर्गादिविकल्प' इति 'अपोद्धारः शास्त्रतो भेदसंसर्गादिविकल्प' इति पाठत्रयं दृश्यते। तत्र प्रथमपाठ एव शब्दशुद्ध्याऽर्थसंगत्या च युक्त इति। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्त। तृतीयपाठस्तु अर्थासगत्याऽयुक्तः।

एतदग्रे —'तत्र व्याडिमते' इति 'तत्र व्यक्तिमते' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे —'तात्पर्येणाभिधेयत्वात्' इति, 'तात्पर्येणानिस्तद् विषयत्वात्' इति पाठद्वयं दृश्यते। तत्र प्रथमपाठोऽर्थसंगत्या युक्तः। द्वितीयपाठस्तु शब्दाशुद्धेरर्थासंगतेश्चायुक्तः।

एतदग्रे —'जातिवादिनः' इति, 'जातितवादिनः' इति पाठद्वयं दृश्यते। तत्र प्रथमपाठ एवार्थसंगत्या युक्तः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासगत्या चायुक्तः।

एतदग्रे —'संसर्गो वाक्यार्थः' इति, संसर्गो वाक्यार्थम्' इति, संसर्गो वाक्यार्थेति' पाठत्रयं दृश्यत। तत्राद्यपाठ एव युक्त, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः। तृतीयपाठोऽप्ययुक्तः, शब्दाशुद्धेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे —'सामान्यानां पदार्थानाम्' इति, 'पदार्थानाम्' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, पदार्थानामसंश्लिष्टानां सामान्यरूपत्वेनार्थसंगतेः।

एतदनन्तरम् —'संश्लेषमात्ररूपत्वात्' इति, 'संश्लेषणमात्ररूपत्वात्' इति, 'सुश्लेषमात्ररूपत्वात्' इति पाठत्रयं दृश्यते। तत्त्रितयमपि साधु, अर्थसंगतेः।

एतदग्रे – इयति चरितार्थे' इति, 'दयति चरितार्थे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्यार्थासंगत्या चायुक्तः।

एतदग्रे —'एकस्मिन्नर्थे' इति, एवस्मिन्नर्थे' इति, 'एकस्मिन्नर्थेति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तौ।

एतदग्रे—'तानि निवर्तन्ते' इति, 'तानि वर्तन्ते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। इतः पूर्वम् एकस्मिन्नर्थे समवाय' इत्यत्र 'असमवाय' इति छेदः कार्यः। तथैव ह्यर्थसंगतिः।

एतदग्रे —'वस्तुमामर्थ्यायातस्य' इति, 'वक्तसामर्थ्याथातस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव—'वस्तुसामर्थ्यायातस्य' इति, 'वस्तुसामर्थ्ययातस्य' इति, वस्तु-सामर्थ्यपातस्य इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठ-द्वयं तु तदभावादयुक्तम्।

एतदग्रे—'नियमस्य' इति, 'नियस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदनन्तरम्—'बाधेऽपि' इति, 'अबाधेऽपि' इति पाठद्वयं दृश्यते। अत्रा-प्याद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे —'द्रव्यत्वमात्रस्याबाधितत्वात्' इति, 'द्रव्यत्वमात्रस्यालाधितत्वात्' इति, 'द्रव्यत्वमात्रस्य बाधितत्वात्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु यथायथं शब्दाशुद्ध्यार्थासंगत्या चायुक्तम्।

अत्रैव 'द्रव्यत्वमात्रस्याबाधितत्वान्न चोदितार्थत्याग' इति, 'द्रव्यत्व-मात्रस्याबाधितत्वादचोदितार्थत्याग' इति, 'द्रव्यत्वमात्रस्याबाधिततत्वामवेदि-तार्थत्याग' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे हेलाराजीय एव—'ननु च निर्विशेषस्य' इति, 'ननु स्वनिर्विशेषस्य' इति, 'न तु वनतिति विशेषस्य' इति, 'ननु च तदुच्यते—निर्विशेषस्य' इति पाठ-चतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। चतुर्थपाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे —'सामान्यस्यासम्भवात्' इति, 'सामावायवच्छिन्ना' इति, 'यजिना' इति, याजिन' इति, 'विशेषनिष्ठमेव' इति, 'विनिष्ठमेव' इति, 'विशेषनिष्ठमेव'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति, 'विशेषनिष्ठमेवेति' इति, 'विशेषनिष्ठमेव । एवं च सति द्रव्यत्वमाक्षिप्तमिति' इति पाठानां नवकं समुपलभ्यते । तत्र प्रथमे द्विके आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । द्वितीये द्विकेऽपि आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । तृतीये पाठत्रिकेऽपि आद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम् । चतुर्थे पाठद्विके तूभयमप्ययुक्तम्, अर्थासंगतेः ।

अत्रैव—'द्रव्यत्वमाक्षिप्तम्' इति, 'द्रव्यत्वमाक्षिप्तमिति' इति पाठद्वयं दृश्यते । अत्राद्यपाठो न युक्तः, अर्थासंगतेः । द्वितीयपाठस्तु युक्तः, अर्थसंगतेः ।

एतदग्रे—'सर्वविशेषाणाम्' इति, 'सर्वविशेषायाम्' इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—'व्रीहिभिः' इति, 'वाहिभिः' इति पाठद्वयं दृश्यते । तत्र द्वितीयपाठोऽर्थासंगत्याऽयुक्तः ।

एतदग्रे—'नियमफलैव' इति, 'नियम्यफलैव' इति पाठद्वयं दृश्यते । तत्र द्वितीयपाठोऽर्थासंगत्याऽयुक्तः ।

एतदग्रे—'श्रौतेनापि' इति, 'श्रोतेनापि' इति, 'सोतेनापि' इति पाठत्रयं समुपलभ्यते । तत्र द्वितीयतृतीयपाठौ न युक्तौ, शब्दाशुद्धेः ।

एतदग्रे—'न कथम्' इति, 'कथं न' इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदनन्तरम्—'श्रौतार्थत्याग इति, 'औनार्थं त्याग' इति पाठद्वयं दृश्यते । तत्र शब्दाशुद्धया द्वितीयपाठो न युक्तः ।

अत्रैव—'श्रौतार्थत्यागति' इति, 'श्रौतार्थत्याग' इति, श्रौतार्थराग इति पाठत्रयं दृश्यते । तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः । प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः । एवमर्थासंगत्यैव तृतीयपाठोऽप्ययुक्तः ।

एतदग्रे—'नैतन्न्याय्यम्' इति, 'नैतन्नाप्यम्' इति, 'नैतम्न्याय्यम् इति पाठत्रयं दृश्यते । तत्र द्वितीयपाठोऽर्थासंगत्याऽयुक्तः । तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—'वस्तुचिन्तनमनुसरति' इति, 'वस्तुचिन्तामनुसरति' इति पाठद्वयं दृश्यते । तदुभयमपि युक्तम्, अर्थसंगतेः ।

एतदग्रे—'तथा च' इति, 'तथा' इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः । द्वितीयपाठस्त्वयुक्तः, पूर्वं यच्छब्दाभावात् । पूर्वं यथाशब्दाध्याहारे तु अर्थासंगतिः ।

एतदनन्तरम्—'पतति शब्दस्य' इति, 'यजति शब्दस्य' इति पाठद्वयं दृश्यते । तत्राद्यपाठो न युक्तः, अर्थासङ्गतेः ।

अत्रैव—'यजति शब्दस्येत्येव इति, 'यजति शब्दस्येयस्त्येव' इति, 'यजति शब्दस्येयस्येव' इति पाठत्रयं दृश्यते । तत्र द्वितीयतृतीयपाठौ शब्दाशुद्धयाऽयुक्तौ । प्रथमपाठ एव युक्तः, अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे —'द्रव्यमात्राक्षेपे' इति, 'द्रव्यमात्राक्षेदे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदनन्तरम्—'न तु तद्विशेषे' इति, 'न तु द्विशेषे' इति, 'न तु द्वित्रोषे' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्या युक्तः। इतरत्पाठद्वयं तु यथायथमर्था-संगत्या शब्दाशुद्धया चायुक्तम्।

एतदग्रे—'अन्यथा निर्गुणस्य च' इति, 'अन्यथा च निर्गुणस्य' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'गुणस्याप्याक्षेपकोऽसौ' इति, 'गुणस्याप्यक्षेपकोऽसौ' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे—'किमितिर्न' इति, 'क्रिमिति न' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, शब्दाशुद्धेः। द्वितीयपाठस्तु शब्दशुद्धयाऽर्थसंगत्या च युक्तः।

एतदग्रे—'द्रव्यतुमात्रेति', द्रव्यत्वमात्रेति' पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, शब्दाशुद्धेः। द्वितीयपाठस्तु शब्दशुद्धयाऽर्थसंगत्या च युक्तः।

अत्रैव—'द्रव्यत्वमात्रस्यैव' इति, 'द्रव्यत्वसापस्यैव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदनन्तरम् —'आक्षेपः' इति, 'आक्षेपम्' इति, 'आक्षेपेति' पाठत्रयं समुप-लभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽर्था-संगत्या चायुक्तौ।

एतदनन्तरम्—'शाब्द' इति, 'शब्द' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदनन्तरम्—'तत्परिपोषाय' इति, 'तत्परिपोष' इति पाठद्वयं दृश्यते। तत्राद्यपाठः साधुरित्यत्र न विप्रतिपत्तिः। द्वितीयपाठोऽपि साधुरेव यदि कर्मण्यण् क्रियते।

एतदनन्तरम्—'विशेषान्तरावाप' इति, 'विशेषान्तराध्यावाप' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। अधिशब्दस्य वाक्यालङ्कारे प्रयुक्तस्यार्था-नाधिक्यात्।

एतदनन्तरम्—'न नियमफल' इति, 'निनयमफल' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधु., अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तः।

एतदनन्तरम्—'शास्त्रेणापर्युदस्तानाम्' इति, 'शास्त्रेणापर्युदेस्तानाम्' इति, 'शास्त्रेणापर्युदस्तावाम्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽयुक्तम्।

एतदग्रे—'प्रतिनिधिसिद्धिः' इति, 'प्रतिनिधिसिद्धिम्' इति, 'प्रतिनिधि-सिद्धीति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वय तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'तदित्थमसम्भवनियमत्याग' इति, 'तदित्थमसम्भवनियमभाग' इति, 'तत्सम्भवनियमत्याग' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासङ्गत्याऽयुक्तम्।

एतदनन्तरम् – 'वर्णित' इति, 'वर्णितेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदनन्तरम् –'नियममात्रबाधश्च' इति, 'नियमात्रबाधश्च' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—'इह सर्वत्रैव' इति, 'इति सर्वत्रैव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे—'वाक्यार्थः' इति, 'वाक्यार्थेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। नेतरस्तदभावात्।

एतदग्रे –'तया च' इति, 'तथा च' इति, 'तयाया' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयतृतीयपाठौ तु अर्थासङ्गत्याऽयुक्तौ।

एतदनन्तरम् –'स्वसिद्धचर्थम्' इति, 'सिद्धचर्थम्' इति, 'वसिद्धचर्थम्' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसङ्गतेः। द्वितीयपाठे तु नार्थसङ्गतिः। तृतीयपाठे तु शब्दाशुद्धिः।

एतदनन्तरम् 'योग्यद्रव्यमाक्षिप्यते' इति. 'योग्यद्रव्यगतमाक्षिप्यते' इति, 'योग्यद्रव्यं क्षिप्यते' इति पाठत्रयं दृश्यते। तत्र शक्तिमत्साधनमिति पक्ष आद्यपाठः साधु। शक्ति साधनमिति पक्षे द्वितीयपाठः साधु। 'क्षिप्यते' इत्यस्यैव 'आक्षिप्यते' इत्यर्थे तृतीयपाठोऽपि साधुः, धातूनामनेकार्थत्वात्, आङो द्योतकत्वात्।

एतदग्रे—'स्थिते यत्र' इति, 'स्थितेऽप्यत्र' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसङ्गते। द्वितीयपाठस्तु वक्ष्यमाणतत्रशब्दासङ्गत्याऽयुक्तः।

एतदनन्तरम् 'श्रुतस्य साधनस्य' इति, 'मतसाधनस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसङ्गतेः। द्वितीयपाठोऽपि युक्त एव, तत्र पाठे हि मत इत्यस्याभिमतेत्यर्थः।

एतदनन्तरम् -'प्रधानभूतक्रियासम्पत्त्यर्थम्' इति, 'प्रधानक्रियासम्पत्त्यर्थम्' इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसङ्गतेः।

अत्रैव -'प्रधानभूतक्रियासम्पत्त्यर्थम्' इति, 'प्रधानभूतक्रियासम्पत्त्यर्थत्वम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठे त्वप्रत्ययप्रयोगोऽसङ्गतः।

एतदनन्तरम्—'साधनान्तरं प्रतिनिधीयते' इति, 'साधनान्तरं प्रतिनिधायते' इति पाठद्वय दृश्यते। तत्र द्वितीयपाठः शब्दाशुद्धयाऽसङ्गतः।

एतदनन्तरम्—'क्रिया हि न प्रतिनिधीयते' इति, 'क्रिया हि न प्रतिनिधायते' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदनन्तरम् 'क्रियान्तराश्रयणे च' इति, 'क्रियान्तराश्रयणे व' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न यूक्तः शब्दाशुद्धेरर्थासङ्गतेश्च। आद्यपाठे तु एतद्दोषद्वयाभावः।

एतदनन्तरम्—'कर्मान्तरस्याचोदितस्य' इति, 'कर्मान्तरस्य चोदितस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु विरुद्धार्थाभिधायित्वादयुक्तः।

अत्रैव—'शास्त्रार्थोल्लङ्घनम्' इति, 'शास्त्रस्योल्लङ्घनम्' इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदनन्तरम्—'गुणभूतस्य साधनस्यैव' इति, 'गुणभूतस्य साधनत्वस्यैव' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न युक्तः, प्रतिनिधिराचरितः शिष्टैरिति वक्ष्यमाणेन सहान्वयानर्हत्वात्।

अत्रैव—'प्रतिनिधिराचरितः शिष्टैरिति', 'प्रतिनिधिराचरितं शिष्टैरिति' पाठद्वयं दृश्यते। तत्र द्वितीयपाठो लिंगविरोधादयुक्तः।

एतदग्रे—'शास्त्रचोदितस्य' इति, 'शास्त्रितस्य' इति, शास्त्रीतस्य इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठोऽपि तदा युक्तः, यदा शास्त्रेण 'चोदयति' इत्यर्थे 'शास्त्रयति' इति प्रयोगो भवेत्, तदा हि नामधातुना रूपसिद्धिः। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदनन्तरम्—'साधनमात्रस्य न त्याग' इति, 'साधनमात्रस्य त्याग' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न यूक्तः, अर्थासंगतेः।

एतदग्रे—'व्रीह्यादिपदोपात्तस्य द्रव्यविषयस्य' इति, 'व्रीह्यादिपदोपात्तद्रव्यविषयस्य' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—'नियममात्रस्य बाध' इति, 'नियममात्रस्य बाधम्' इति पाठद्वयं दृश्यते। तत्र बाधमिति 'घञजपः पुंसि' इति लिंगानुशासनसूत्रविरुद्धम्।

एतदग्रे— स च न दोषाय' इति, 'स्वदोषाय' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'शक्तिमात्रस्य साधनरूपस्य क्रियासामर्थ्याक्षिप्तस्य' इति, 'शक्तिरूपक्रियापदाक्षिप्तम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे – 'उपात्ताधाररूपद्रव्याभावे' इति, 'उपान्ताधाररूपद्रव्याभावे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'उपान्तया रूपद्रव्याभावे' इति तृतीयपाठोऽपि शब्दाशुद्धयार्थासंगत्या चायुक्तः।

एतदग्रे - 'तदपरतदाधारभूतद्रव्योपादानेऽपि' इति, 'तदपरताधारभूतद्रव्योपादानेऽपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--'चोदितार्थोल्लङ्घनाभावात्' इति, 'चोदितत्वोल्लङ्घनाभावात्' इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्र 'दर्थन' इति, 'दर्शन' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, शब्दाशुद्धेः। द्वितीयपाठस्तु युक्तः, अर्थसंगतेः।

एतदग्रे—'शब्देनाभिधीयमानायाम्' इति, 'शब्देनाभिधीयमानानाम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'अभिधायमानायाम्' इति तृतीयपाठोऽपि शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—निर्निमित्ता' इति, 'निन्निमित्ता' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव—'शब्दस्य प्रवृत्तिः' इति, 'शब्दप्रवृत्तिः' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगते.।

अत्रैव—'शब्दस्य प्रवृत्तिः' इति, 'शब्दस्य वृत्तिः इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसगतेः। शब्दस्य प्रवृत्तिर्हि प्रयोगः। वृत्तिस्तु अभिधादिलक्षणं शब्दस्य व्यापारत्रयम्। पदस्य प्रवृत्तिनिमित्त वाच्यार्थगतोऽसाधारणो धर्मः शक्यतावच्छेदकरूपः।

एतदग्रे—'प्रवृत्तिरायातेत्याशङ्कय' इति, 'प्रवृत्तिरापेतेत्याशङ्कय' इति, 'प्रवृत्तिरपि तेत्याशङ्कय' इति, 'प्रवृत्तिरायेतेत्याशङ्कय' इति पाठचतुष्टय दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

स्वजातिः प्रथमं शब्दैरिति ॥ ६ ।

कारिकायाः प्रथमे पादे—'स्वाजातिः' इति, 'स्वजातिः' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। 'स्वजातिप्रथमं शब्दैः' इति तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतस्या एव कारिकाया व्याख्याने हेलाराजीये– 'स्वा असाधारणी' इति, 'स्वानुसाधरणी' इति, 'स्वा असारणी' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'आत्मीया गोशब्दत्वादिका' इति, 'आत्मीया जातौ शब्देन······ रायातेत्याशङ्क्येति.' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अवतरणिकातो भ्रष्ट इहायातः, विच्छिन्नश्चेत्यसङ्गतः।

इहैव—'आत्मीया', इति, 'सर्वथा आत्मीया' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। द्वितीयपाठे हि यथाकथञ्चिदात्मीयाया व्यावृत्तये सर्वथापदमुपात्तम्। सर्वथा आत्मीया च असाधारणी जातिरेवेति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे —'सकलशब्दसाधारणी' इति, 'शकलशब्दसाधारणी' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये —'एवञ्चासाधारणीत्वेन' इति, 'एवञ्चासाधारणत्वेन' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, असाधारणत्वरूपस्य धर्मस्याधारणे असाधारण्याश्च साधारणत्वात्। यथा कुक्कुटत्वादिको धर्मः। पुंवद्भावस्तु न, "त्वतलोर्गुणवचनस्य" इति गुणवचनस्यैव तयोः पुंवद्भावात्।

एतदग्रे —'विशेषणात्तया' इति, 'विशेषणतया' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत्र पक्षे तया इत्यस्य जात्या इत्यर्थः। सहार्थे तृतीया। द्वितीयपाठे तु सम्बन्धप्रतियोगिनो न लाभ इति क्लेशः।

एतदग्रे—'सम्बन्धाव्यभिचारः शब्दस्य' इति, 'सम्बन्धाव्यभिचारशब्दस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'शब्दस्यार्थजात्या सम्बन्धव्यभिचारेऽपि' इति, 'शब्दस्यार्थजात्या सम्बन्धव्यभिचारोऽपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—'शब्दस्यार्थजात्या' इति, 'गोशब्दस्यार्थजात्या' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः, सामान्यविशेषाभ्यामुभयथा व्यवहारस्य दर्शनात्।

अत्रैव—'स्वाजातिरेव' इति, 'स्वजातिरेव' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे - 'मुख्यमभिधेयमित्युक्तं भवति' इति, 'मुख्याभिधेयमित्युक्तं भवति' इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदग्रे हेलाराजीये —'अत एव व्यभिचारिण्या' इति, 'अत एवाव्यभिचारिण्या' इति, 'अत एवाव्यभिचारिण्येति' पाठत्रयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, स्वरूपजातेरित्यनेन सह विशेषणतयाऽन्वयसम्भवात्।

अत्रैव—'स्वरूपजातेरिति', 'सारूप्यजातेरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। शब्दस्वरूपगतायाः गोशब्दत्वादिजातेरित्यर्थः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव —'अर्थजात्यभिधानेऽपि' इति, 'अर्थे जात्यभिधानेऽपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'अर्थजातेरभिधानेऽपि' इति तृतीयपाठोऽपि साधुः, अर्थसंगतेः।

एतदग्रे हेलाराजीये - 'नान्तरीयकमभिधानम्' इति 'नान्तरीयकमभिधायनम्' इति, 'नान्तरीयकमभिधानकम्' इति पाठत्रयं दृश्यते। तत्र प्रथमपाठो युक्तः, अर्थसंगतेः। तृतीयपाठोऽपि अत्यन्तस्वार्थिके कनि अर्थसंगत्या युक्त एव। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'यदभेदेन यत्प्रतिपत्तिरिति', 'यदभेदयत्प्रतिपत्तिरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे हेलाराजीये—इत्येतावताऽत्र प्राथम्यम्' इति, 'इत्येतावता तत्र प्राथम्यम्' इति, 'इत्येतावता न तत्र प्राथम्यम्' इति, पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, सन्निहितेऽर्थे इदंशब्दप्रयोगस्यैवौचित्यात्। तृतीयपाठस्तु विरुद्धार्थाभिधायित्वादयुक्तः।

एतदग्रे हेलाराजीये— न तु क्रमेणाभिधानात्' इति, 'न तु क्रमेणाभिधानम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः हेतुहेतुमद्भावेन पूर्वोत्तरवाक्ययोः परस्परसम्बन्ध एकवाक्यत्वसम्भवात्। द्वितीयपाठस्तु वाक्यभेदादयुक्तः।

एतदग्रे –'सम्बन्धव्युत्पत्तिकालापेक्षं प्राथम्यम्' इति, 'सम्बन्धव्युत्पत्तिकालापेक्षया प्राथम्यम्' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'तथा हि' इति, 'हि तथा' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'अत्यर्थजात्या नास्ति सम्बन्ध' इति, 'अर्थजात्या नास्ति सम्बन्ध' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसगतेः। प्रथमपाठे अतिपदमधिकम्, व्यर्थञ्च।

एतदग्रे—'तथात्वे वाचकत्वेन' इति, 'तत्त्ववाचकत्वेन' इति, 'तत्त्वे वाचकत्वेन' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वय तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'अनर्थकः स्यात्' इति, 'अनर्थता स्यात् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु स्वार्थस्य वाक्यार्थेऽनन्वयादयुक्तः।

एतदग्रे—'प्रतिपन्नत्वादिति सोऽर्थस्तावत्तेन शब्देन' इति, 'प्रतिपन्नत्वादिति सोऽर्थः तदा अनर्थकत्वात् तेन शब्देन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, वक्ष्यमाणेन ग्रन्थेन 'न प्रतिपन्न' इत्यनेन सम्बन्धसम्भवात्। द्वितीयपाठं तु अनर्थकत्वादित्यस्य न प्रकृतवाक्यार्थेऽन्वयसम्भव इति हेयः स पाठः।

अत्रैव—'तावत्तेन' इति, 'तावत्त्वेन' इति, 'तावतेन' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे अर्थासंगतिः, तृतीयपाठे शब्दाशुद्धिरर्थासंगतिश्च।

एतदग्रे हेलाराजीये - 'यदि च स्वजात्यभिधानम्' इति, यदि त्वस्य जात्यभिधानम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, 'स्वाजातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते' इत्युक्तेः। अत एव द्वितीयपाठो न युक्तः। अत्र पाठे अस्येति च अविज्ञातार्थकं स्यात्।

एतदग्रे हेलाराजीये—'तदानर्थकत्वाद् विभक्तियोगो न स्य दिति', तदानर्थक······न स्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, वाक्यपरिसमाप्तेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वितीयपाठस्तत्रपूर्णं इत्युपेक्ष्यः। 'तदानर्थकाद् विभक्तियोगो न स्यादिति' तृतीयपाठोऽपि क्वचिदुपलभ्यते। यद्यप्ययमपि भावप्रधाननिर्देशमाश्रित्य अनर्थकपदोपस्थापिते आनर्थक्ये वस्तुभूतं विभक्तियोगनिषेधे हेतुत्वमादाय वा पाठ समर्थयितुं शक्यते; किन्त्वेतावत्क्लेशसहनापेक्षया प्रथमपाठसमादर एव युक्तः।

एतदग्रे—'प्राक्संज्ञिनाऽभिसम्बन्धादिति', 'प्राक्संज्ञिनोऽभिसम्बन्धादिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे हेलाराजीये—'रूपपदार्थिका इत्युक्तमिति', 'रूपपदार्थिका भवति इत्युक्तमिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे हेलाराजीये—'स्वाजातिर्वा' इति, 'यद्वा जातिर्वा' इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, रूपपदस्य कर्मव्युत्पत्त्याऽभिधेयपरत्वेनैतत्पाठोपपत्तेः। द्वितीयपाठे तु वाशब्दद्वयानर्थक्यम्।

एतदग्रे—'इति दर्शनभेदेन' इति, 'इति दर्शने' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थोपपत्तेः।

एतदग्रे—'स्वरूपपरैरर्थपरैश्च' इति, 'स्वरूपैरर्थः पपरैरपरैश्च' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—'स्वरूपतया व्यवहारादिति', 'स्वरूपपरतया व्यवहारादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'तथा व्युत्पन्नैरपि' इति, 'तथा च व्युत्पन्नैरपि' इति, तथाऽव्युत्पन्नैरपि' इति पाठत्रयं दृश्यते। तत्र तृतीयपाठ एव युक्तः पूर्वं 'शब्दैरभिधीयते' इत्युक्तम्, इदानीं तु 'शब्दैरविनाभावात्प्रतिपाद्यते' इत्युच्यते, इत्येवमस्य पाठस्योपपत्तेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—'शब्दस्वरूपेणेति', 'शब्दस्वरूपत्वेन' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'प्रतिपद्यते' इति, 'प्रतिपाद्यते' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, शब्दैरित्यस्य कर्तृत्वात्। यदि त्वत्र प्रसिद्धत्वेन लोकस्य कर्तृत्वम्, तदा त्वाद्योऽपि पाठः साधुः, शब्दानां प्रतिपत्तौ कारणत्वात्।

एतदग्रे—'अर्थस्य झटित्येव' इति, 'अर्थस्य कृदित्येव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—'शब्दस्वरूपाभेदेनावबोधेऽपि' इति, 'शब्दस्वरूपाभेदेनावबोधोऽपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, उत्तरग्रन्थेन सहान्वयोपपत्तेः। द्वितीयपाठस्तु नाग्रिमग्रन्थेन सम्बन्धार्ह इति वाक्यार्थेऽनुपयोगाद् हेयः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'यथाप्रतिपादितक्रमाश्रयेण' इति, 'तथाप्रतिपादितक्रमाश्रयेण' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अत्र यथाशब्दस्य पदार्थानतिवृत्तौ प्रयोगेणार्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या हेयः, सादृश्ये यथाशब्दस्य पूर्वमप्रयोगाच्च।

अत्रैव—'यथाप्रतिपादितक्रमाश्रयेण' इति, 'यथाप्रतिपादितक्रमेण श्रयेण' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—'समारोपस्य कल्पना', इति, 'समारोपकल्पना' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'शब्दविवर्तत्वेन' इति, 'शब्दविवर्ततेन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्त्वर्थासंगत्याऽयुक्तः।

एतदग्रे—'शब्दात्तत्त्वतो भेदाभावादिति', शब्दातन्वतो भेदाभावादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे हेलाराजीये—'शब्दजातेरत्यन्तभेदात्सामानाधिकरण्यान्यथानुपपत्त्या' इति, 'शब्दजातेरत्यन्तसामानाधिकरण्यान्यथानुपपत्त्या' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सामानाधिकरण्यान्यथानुपपत्तौ अत्यन्तभेदस्य हेतुत्वेनार्थसंगतेः। द्वितीयपाठस्त्वत्यन्तसामानाधिकरण्यान्यथानुपपत्तौ हेत्वनुक्तेर्हेय।

एतदग्रे—'कल्पते' इति, 'कल्प्यते' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। प्रथमपाठे अभेदाध्यारोपस्य कर्तृत्वम्, द्वितीयपाठे तु कर्मत्वं तस्येतीयानेव भेदः।

एतदग्रे—'सङ्केतस्यैव कर्तुमशक्यत्वादिति', 'सङ्केतस्यैव कर्तुं तु शक्यत्वादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। तथा हि यद्यर्थजात्या सह शब्दजातेरभेदाध्यारोपो न स्यात्तदा अर्थजातेः शब्दादप्रतीत्या तत्र सङ्केतः कर्तुं शक्यो न स्यादिति। अत एव द्वितीयपाठ उपेक्ष्यः।

एतदग्रे—'यथा चायमिति', 'च यथाऽयमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, तथापाठस्यैव सर्वत्र काव्येषु शास्त्रेषु च लेखकसम्प्रदायसिद्धत्वात्। द्वितीयपाठस्त्वर्थासंगत्याऽयुक्तः।

एतदग्रे—'तथाऽध्यारोपोऽपि' इति, 'यथाऽध्यारोपोऽपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, पूर्वं ह्युपमानगतसादृश्यवाचकस्य यथाशब्दस्योल्लेखेनात्रोपमेयगतसादृश्यवाचकस्य तथाशब्दस्योल्लेखौचित्यात्। अत एव द्वितीयपाठो न युक्तः।

एतदग्रे—'दृश्यविकल्पार्थैकीकारः' इति, 'दृश्यबिकल्पार्थैकीकारे' इति, दृश्यविकल्पार्थैकाकार' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, तदर्थमुद्दिश्य विधेयस्य भेदानध्यवसायलक्षणत्वस्य वाचके पदे प्रथमान्तत्वदर्शनात्, उद्देश्यविधेययोः समानविभक्तिकत्वस्य औत्सर्गिकत्वात्। इतरत्पाठद्वयं त्वर्थासगत्याऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—'ननु' इति, 'न तु' इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अग्रे निषेधानुल्लेखात्। द्वितीयपाठस्तु युक्तः, अत्रैव निषेधोल्लेखात्।

एतदग्रे—'पुरुषेच्छयाऽध्यारोप' इति, 'पुरुषेत्वाया अध्यारोप' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—'व्यवहारे शब्दार्थयोरिति', 'व्यवहारशब्दार्थयोरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्त्वर्थासङ्गत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'प्रतिवर्णमनभिव्यक्ता' इति, 'प्रतिवर्णनभिव्यक्ता' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—'साधारणी जातिरिति', 'साधारणजातिरिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, जातिमुद्दिश्य साधारणीत्वस्य विधेयत्वेनोद्देश्यविधेययोः पृथगुल्लेखस्यैवौचित्यात्।

एतदग्रे हेलाराजीये—'असमसमयभाविभिरिति', 'असमसमयभावविभिरिति', 'असमवायैरिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु वर्णाधिक्येन शब्दाशुद्धिरर्थाभावश्च। तृतीयपाठे त्वर्थासंगतिः, प्रकृतवाक्यार्थेऽनुपयोगात्।

एतदग्रे- 'वर्णैरभिव्यज्यते' इति, 'वर्णैर्भिव्यज्यते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे हेलाराजीये—'यथोत्क्षेपणत्वादिजातिरिति', 'यथोत्क्षेपणजातिरिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसगतेः। यद्यप्युत्क्षेपणं न जातिः, तथापि तद्गता उत्क्षेपणत्वजातिरस्त्येवेति न कोऽपि दोषः, षष्ठीसमासेन सप्तमीसमासेन वा निर्वाहात्।

इतः पूर्वम्—असमसमयभाविभिरित्यत्र—'अयुगमगमयभाभिरिति' पाठोऽपि क्वचिद् दृश्यते। स तु शब्दाशुद्धयाऽऽनर्थक्येन च हेयः।

एतदग्रे हेलाराजीये—'कर्मक्षणानामिति'; 'कर्मलक्षणानां क्षणानामिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'यः प्रथम' इति, 'य प्रथम' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठे तु शब्दाशुद्धिरिति।

एतदग्रे—उत्क्षेपणक्षण' इति, 'स उत्क्षेपक्षणक्षण' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, अग्रे 'स' इति पदस्य दर्शनाच्च। द्वितीयपाठे तु यः प्रथमः, स उत्क्षेपक्षणक्षण इत्युक्तिर्भ्रान्तिप्रलापरूपत्वेनोपेक्षणीया।

एतदग्रे—'स परमाणुमात्रदेशाक्रमणमात्ररूपत्वादिति', 'स परमाणुमात्रवदेशाक्रमेण' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव—'परमाणुमात्रदेशाक्रमणमात्ररूपत्वादिति', 'परमाणुमात्रदेशाक्रमणमात्मरूपत्वादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्या शब्दाशुद्धया च हेयः।

अत्रैव—'भ्रमणादिति', 'भ्रमणलक्षणत्वादिति', 'भ्रमणक्षणादिति' पाठत्रयं दृश्यते। तत्र तृतीयपाठ एव युक्तः, क्षणयोरेव सारूप्यसम्भवात्। अत एव सारूप्यवशादनवधार्यलाणभेद इति ग्रन्थस्य वक्ष्यमाणस्योपपत्तिः। वक्ष्यमाणैतद्ग्रन्थविरोधाच्चेतरत्पाठद्वयं न युक्तम्।

एतदग्रे–'सारूप्यवशादिति', 'सारूप्यवसादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, स्वार्थे शब्दशुद्धेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—'अनत्रधार्यमाणभेद एकैक' इति, 'अनवधार्यमाणभेद एक' इति पाठद्वयं दृश्यते। तत्र प्रथमपाठ एव युक्तः, नियतजात्यभिव्यञ्जने एकैकस्यैवासामर्थ्यप्रतिपादनेऽस्य वाक्यस्य तात्पर्यात्। अत एव द्वितीयपाठो न युक्तः।

एतदग्रे 'नियतजात्यभिव्यञ्जने' इति, 'नियतजात्यभिव्यञ्जक' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एतदग्रे–'भ्रमणक्षणाद्विशेष इति, 'भ्रमणक्षणाणुशेक' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्त्वर्थासिंगत्या शब्दाशुद्धया चायुक्तः।

एतदग्रे—'नास्ति' इति, 'नासि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शेषे प्रथमाभ्युपगमात्। अत एव द्वितीयपाठो न युक्तः, उपपदस्य प्रसक्तस्य वा युष्मदोऽभावात्।

एतदग्रे—'एवोत्क्षिपामि' इति, 'द्योक्षिपामि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्त्वर्थासिंगत्याऽयुक्तः।

एतदग्रे—'इत्येवमिति', 'इत्ययमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिगत्याऽयुक्तः।

एतदग्रे—'गानगगनशब्दजनकादिति', 'ज्ञ नं गगनशब्दजनकादिति', 'गानं गगनशब्दजनकादिति' पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासिंगत्याऽयुक्तम्।

एतदग्रे हेलाराजीये—'हेतुर्भेदाच्चेति', 'हेतुभेदाद्यो इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये—'गकारयोरपि' इति, 'गकारणयोरपि' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एत:ग्रे—'सादृश्यादसो' इति, 'सादृश्यामसो' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे 'व्यञ्जकोऽपि सन्निति', 'व्यञ्जकोपाधिसन्निति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, उत्तरग्रन्थानुरोधात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे – सन् प्रथम' इति, 'स न प्रथम' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'न विशदतरसामान्यविशेषाभिव्यक्तौ हेतुरिति, 'न विशदतरसामान्यविशेषाभिव्यक्तिहेतुरिति', 'न विशदतरसामान्यविशेषाभिव्यक्तो हेतुरिति' पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे - 'यदा त्ववयवप्रबन्ध' इति, यदा अवयवप्रबन्ध' इति, 'यदा त्वरवयवप्रबन्ध' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, पूर्वस्माद् वैलक्षण्यावद्योतकस्य तुशब्दस्यावश्यकत्वात्। अत एव द्वितीयपाठोऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव—'अवयवप्रबन्ध' इति, 'अवयवबन्ध' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। तथा हि प्रबन्धोऽत्र नैरन्तर्येणावयवानामुपन्यास इति, प्रस्तुतो बन्धः प्रबन्ध इति व्युत्पत्तेः। अत एव द्वितीयपाठो न युक्तः, ततस्तदर्थानवगमात्।

एतदग्रे—'क्रमेणोपलम्भो भवति' इति, 'क्रमोपलम्भो भवति' इति, 'प्रक्रमेणोपलम्भो भवति' इति पाठत्रयं दृश्यते। तत्राद्य पाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु न युक्तः, प्रशब्दस्य वैयर्थ्यात्।

एतदग्रे—'क्रमेणोपलम्भो भवति' इति, 'क्षणोपलम्भो भवति' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः,।

एतदग्रे— अथ शब्दजातिविशेषोपाधियुक्ता' इति, अथ शब्दे जातिविशेषोपाधियुक्ता' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु 'सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न' इति वचनविरुद्धः।

अत्रैव—'शब्दविशेषाधियुक्ता' इति, 'शब्दविशेषोपयुक्तया' इति पाठद्वयं दृश्यते। तदुभयमप्ययुक्तम्, अर्थासंगतेः।

एतदग्रे— 'तदानीं साहचर्यादिति', 'तदानीमसाहचर्यादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः।

एतदग्रे—'सकृत्पठ्यमान' इति, 'सकृत्प्रतिपद्यमान' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—'चरमचेतसि' इति, 'चरमत्वेन' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत्र चेतःपदं तत्कार्यबुद्धिपरम्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे हेलाराजीये—'चकास्ति रत्नतत्त्ववत्' इति 'विचकास्ति रत्नतत्त्ववत्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे विपदमधिकम्।

एतदग्रे—'रत्नतत्त्ववत् स्फोटतत्त्वम इति, 'रत्नतत्त्वतत्स्फोटतत्त्वम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। 'रत्नतत्त्ववत्स्फोटतत्त्वप्रथमाक्षरेण' इति तृतीयपाठोऽप्ययुक्तः, अर्थासंगतेः।

एतदग्रे - 'तदुत्तरोत्तरवर्णकलापेन तु' इति, 'तदुत्तरोत्तरवर्णकालापेनु' इति पाठद्वयं दश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे --'स्फुटतरस्फुटतम' इति, 'स्फुटनपरस्फुटतम' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव---'समासरूपे पदे परिच्छेदाधानमिति', 'परिच्छदाधानमिति', 'परिच्छेदाधानः' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्त्वविवक्षितार्थसमर्पकतयाऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः, आधानशब्दस्य भावल्युडन्तस्य नित्यनपुंसकत्वात्।

एतदग्रे हेलाराजीये—'संस्कारविशेषोत्पादनद्वारेणेति', 'सग्नुदारविशेषोत्पादनद्वारेणेति', 'सस्मारविशेषोत्पादनद्वारेणेति', 'स्वाकारविशेषोत्पादनद्वारेणेति', 'संस्कारविशेषोत्पादेन' इति पाठपञ्चक समुपलभ्यते। तत्राद्यपञ्चमपाठावेव युक्तौ, अर्थसंगतेः। इतरत्पाठत्रयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

अत्रैव---'अभिव्यक्तिविशेषस्य' इति, 'अभित्यतिविशेषस्य' इति, 'रत्नतत्त्वादौ' इति, 'चरमतत्त्वादौ' इति, 'दृष्टेरिति', 'दृष्टे' इति, 'दृमे' इति पाठाः समुपलभ्यन्ते। तत्र प्रथमे द्विके आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। द्वितीये द्विकेऽप्याद्यपाठ एव युक्तः, अर्थसंगतेः। तत्र द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीये तु पाठत्रये आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु वाक्यार्थेऽनन्वयित्वादयुक्तः। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे - 'व्यवहाराद् वर्णानामिति', 'व्यवहाराद् वर्णा नो' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे –'अर्थावसायजनकत्वानुपपत्तेरिति', 'अर्थावसायकत्वानुपपत्तेरिति', 'अर्थावसायजनकत्वानुवपतेरिति' पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः, एचार्थकत्वाच्च। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्त।

एतदग्रे —'प्रक्रियाभङ्गस्येति', 'प्रक्रियानङ्गस्येति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे—'निरवयवमिति', 'निरवयवकमिति' पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे –'भिन्नं स्फोटस्वभावमिति', 'भिन्नस्फोटस्वभावमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु न युक्तः, विशेषणतया विवक्षितस्य विधेयत्वस्य वृत्तावेकार्थीभावाभ्युपगमेन प्रतीत्यनुपपत्तेः।

अत्र क्वचित्पुस्तके 'भिन्नमेव' इति, क्वचित्पुस्तके तु 'स्फोटस्वभावमेव' इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्त', 'न तु ध्वनिस्वभावमिति' व्यवच्छेद्य-प्रतीतिसम्भवात्। प्रथमपाठे तु 'न त्वभिन्नमिति' व्यवच्छेद्यं प्रतीयते। स चाप्रसक्त-प्रतिषेधः स्यात्, शब्दतत्त्वेऽभेदाप्रसक्तेः। भिन्नपदोत्तरेवकार इति पक्षे च स्फोट-स्वभावपदोत्तरं चकारः क्वचिद् दृश्यते। स तु न युक्तः, एवकारपाठस्यैवात्र पूर्वोक्त-रीत्या युक्तत्वात्।

स्फोटस्वभावमेवाङ्गीकार्यमित्येतदुत्तरम्—'गौरयमर्थ इति च इत्यतः प्राक्—व्यधिकरणत्वेन कथमर्थजातिभेदेन व्यपदिशेदित्याशङ्क्य निदर्शनेनैतद् व्यत्यां व्यप-देशाय कल्पते' इति पाठः क्वचिद् दृश्यते। स तु जरद्गवादिवाक्यवदनर्थकः, लेखक-प्रमादात् सम्पातायातः।

एतदग्रे 'तदध्यासखचितवपुः' इति, 'तदनुध्यासचर्चितवपुः' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। तथा हि—तदध्यासः शब्दस्वरूपेऽर्थ-स्याध्यासः, तेन खचितं शब्दस्वरूपे प्रतिविम्बितम्, वपुःस्वरूपं यस्य व्यवहार्य-स्यार्थस्य, स तथाभूत इति व्युत्पत्तावर्थसङ्गतिः सम्भवति। द्वितीयपाठस्तु अर्था-सङ्गत्याऽयुक्तः। तथा हि—अनुध्यासपदमध्यासेन क्वचिद् दृष्टम्, चर्चितपदश्च प्रतिविम्बितार्थकं न दृष्टमित्यर्थासंगतिः।

अत्रैव—'व्यवहार्योऽर्थे' इति 'अर्थे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थविशेषपरिग्रहसम्भवात्। व्यवहार्यस्यैवार्थस्य शब्दे प्रतिविम्बितत्वं सम्भ-वति, न बाह्यस्येति। अत एव द्वितीयपाठो न युक्तः।

एतदग्रे –'तत्र च' इति, 'तत्र' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, द्विधा लेखस्य सम्भवात्।

अत्रैव—'स्वरूपस्य वाच्यता' इति, 'स्वरूपवाच्यता' इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

यथा रक्ते गुणे तत्त्वमिति, तथा शब्दार्थसम्बन्धादिति ॥ ७८।

कारिकयोरवतरणिकायां हेलाराजीये –'शब्दसमवायिसामान्यमिति', 'शब्द-समवायी सामान्यमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सामान्यशब्दस्य नित्यनपुंसकत्वात्। अत एव द्वितीयपाठो न युक्तः।

एतदग्रे—'अर्थजातिम्' इति, 'जातिरर्थे' इति, 'जातीरर्थे' इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं त्वर्थासङ्गत्याऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे —'इत्याशङ्क्यमिति', 'इत्याशङ्क्येति' पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, तस्य वाक्यार्थेऽनन्वयात्। द्वितीयपाठस्तु वाक्यार्थेऽन्वयसम्भवाद् युक्तः।

एतदग्रे —'निदर्शनेनैतदिति', 'निदर्शनैतद्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त।

एतत्कारिकाद्वये—'रक्ते गुणे' इति, 'रेके गुणे' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे —'कषाये' इति, 'कर्षाय' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—'संयोगिसन्निकर्षाच्चेति', 'संयोगिसंत्रिकत्वाच्चेति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, हेलाराजीये तस्यैव व्याख्यानदर्शनात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे एतत्कारिकाद्वय एव—'शब्दार्थसम्बन्धादिति', 'शब्दोऽर्थसम्बन्धादिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त।

एतदग्रे कारिकायामेव—'जातिकार्याय' इति, 'जातिकार्यायम्' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे कारिकायामेव—'कल्पते' इति, 'कल्प्यते' इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, जातेः कर्तृत्वात्। जातेः कर्मत्वे तु द्वितीयः पाठः किन्तु तत्र प्रयोक्त्रर्थकं कर्तृपदमध्याहार्यमिति प्रतिपत्तिगौरवम्।

एतत्कारिकाद्वयव्याख्याने हेलाराजीये -'रक्ते गुणे तत्त्वमिति', रक्ते गुणे लौहित्यसामान्यमिति' पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अग्रे तत्त्वपदस्यैव 'तस्य रक्तस्य गुणस्य भाव' इत्यादिना व्याख्यायमानत्वात्। अत एव द्वितीयपाठो न युक्त।

एतदग्रे —'तस्य रक्तस्य' इति, 'तत्त्वान्तरस्य' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, तत्त्वपदस्य व्याख्यानरूपत्वात्। अत एव द्वितीयपाठो न युक्तः, अर्थासंगतेः।

एतदग्रे—'गुणस्य भाव' इति. 'गुणस्वभाव' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, तत्त्वपदस्य व्याख्यानरूपत्वात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे —'लौहित्यसामान्यमिति', 'लौहित्यं सामान्यमिति', 'लोहिते सामान्यमिति' पाठत्रयं दृश्यते। तत्त्रितयमपि साधु अर्थसंगतेः।

एतदग्रे—'गुणव्यक्तिसमवेतमुच्यते' इति, 'गुणसामान्यसमवेतमुच्यते' इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। सायान्यं हि न सामान्यसमवेतं भवतीति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—कषाये रक्तगुणाधारे इति, कषायोक्तगुणाधारे इति कषाये रक्त रूपाधारे इति पाठत्रयं दृश्यते । तत्राद्यतृतीयपाठौ युक्तौ, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—व्यपदिश्यते इति, व्यपदेशाय कल्पते इति, व्यपदिश्यते व्यपदेशाय कल्पते इति पाठत्रयं दृश्यते । तदेतत्पाठत्रयमपि साधु, अर्थसंगतेः । किन्तु पाठत्रयेऽपि यः प्रातिस्विको विशेषः स वारयितुं न शक्यते । तथा हि–व्यपदिश्यते इत्यस्य व्याख्येयत्वमेव, व्यपदेशाय कल्पते इत्यस्य व्याख्यानत्वमेव । व्यपदिश्यते व्यपदेशाय कल्पते इत्यस्य उभयरूपत्वमिति ।

एतदग्रे तद् विशेषणभूतं हि इति, तद् विशेषणभूतमिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः । तथा हि—अत्र तद् विशेषणभूतपदे बहुब्रीहिः षष्ठ्यर्थे । कषायद्रव्यश्चान्यपदार्थः हि शब्दःप्रसिद्धौ ।

एतदग्रे—लोहितालाक्षा इति, लोहिताक्षा इति, पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—केन संयोगिन इति, ते पुनः संयोगिन इति, तेन संयोगिन इति, ते न संयोगिन इति, तेनिसंयोगिन इति पाठपञ्चकं दृश्यते । तत्रद्वितीयतृतीयपाठावेव साधू, अर्थसंगतेः इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—वस्त्रादय इति, तस्त्रयः इति पाठद्वयं दृश्यते । अत्राद्यपाठः साधुः; अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—संनिकर्ष इति, सन्निकर्ष इति पाठद्वयं दृश्यते । तदुभयं साधु, परसवर्णविकल्पेन सिद्धेः ।

एतदग्रे—तस्मान्निमित्तात्तत्रापि इति, तस्मान्निमित्तत्ता अत्रापि इति, तस्मान्निमित्तत्ता तत्रापि इति, तस्मान्निमित्तादत्रापि इति, पाठचतुष्टयं दृश्यते । तत्र प्रथमचतुर्थपाठावेव युक्तौ, अर्थसंगतेः द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

एतदग्रे—तल्लौहित्यमिति तद् लौहित्यमिति पाठद्वयं दृश्यते । तदुभयमपि साधु तोर्लि इत्यस्य वैकल्पिकत्वात् ।

एतदग्रे—लौहित्यनिमित्त इति, लौहित्यनिर्मित इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः । तथा हि—प्रथमपाठे सप्तम्यर्थे बहुब्रीहिः द्वितीयपाठे तृतीया तत्पुरुषः ।

एतदग्रे—लोहितगुणकषायद्रव्यसम्बन्धस्थानीयात् इति, गुणद्रव्यसंबन्धस्थानीयादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः । यद्यपि द्वितीयपाठे न संबन्धप्रतियोग्यनुयोगिविशेषलाभस्तथापि उत्सर्गवाक्यत्वेन सामान्यविषयकत्वंयुक्तमेव । न चैवं प्रथमपाठासंगतिः उदाहरणपरत्वेनोपपत्तेः ।

एतदग्रे—समानाधिकरणतयाऽत्रस्थितात् इति; समानाधिकरस्थनियावस्थिता च इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तथा व्युत्पत्तिकाले इति, केवलं व्युत्पत्तिकाले इति, तथा केवलं व्युत्पत्तिकाले इति पाठत्रयं दृश्यते। तदेतत् त्रितयमपि साधु, अर्थसंगतेः।

एतदग्रेऽत्रैव—निर्ज्ञातादिति, निज्ञति इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सम्बन्धादित्यस्य विशेष्यत्वात्। अतएव द्वितीयपाठोऽयुक्तः।

एतदग्रे—सम्बन्धादेव इति, संबन्धां देव इति, शंबन्धां देव इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—शब्दजात्याव्यपदेशः इति, शब्दजात्याव्यपदेशे इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु प्रकृते वाक्यार्थेऽनन्वायादयुक्तः।

एतदग्रे—अर्थोऽत्रार्थजातिरिति, अत्रोक्तार्थजातिरिति, अथात्रार्थजातिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्। अत्रैव—अर्थोऽत्रार्थजाति इति विसर्गरहितपाठः क्वचिद् दृश्यते। स तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—हेलाराजीये—तस्या एव वाच्यत्व प्रक्रमादिति, तस्या एवावाच्यत्व प्रक्रमादितिपाठद्वयं दृश्यते। तस्या एव वाच्यत्वं प्रक्रमादिति, तस्या एव वाच्यत्वं प्रक्रव्यव्यपदेशे इति, तस्या एव वाच्यत्वं प्रक्रम्येद् व्यपदेशे इति पाठत्रयमपि अत्रैव दृश्यते अत्र पाठपञ्चके प्रथमपाठ एव युज्यते। तस्य चायमाकारः—तस्या एव वाच्यत्वप्रक्रमात्। व्यपदेशे कल्पते स्वरूपाभेदेन, इति। द्वितीयपाठे विवक्षितार्थविरोधः। तृतीयपाठस्तु युज्यते। अत्रप्रक्रमादित्यस्य प्रकरणादित्यर्थः। चतुर्थपाठे शब्दाशुद्धिः। पञ्चमपाठे शब्दाशुद्धिरर्थासंगतिश्चेति। तत्र शब्दाशुद्धिः, प्रक्रश्येदित्यत्र अर्थासंगतिश्चात्र वाक्ये।

अत्रैव—व्यपदेशे कल्पते इति, व्यपदेशकल्पने इति, व्यपदेशकल्पके इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे हेलाराजीये—जातिकार्याय कल्पते इति, जातिकार्या कल्पते इति, जातिकार्यात्कल्पते इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—जात्यादिशब्देन इति, जात्यादि शब्दे इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्थिताजातिरिति स्थिताभातिरिति पाठद्वयं दृश्यत। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—यावज्जातिकार्याय च इति, यावज्जातिकार्या ए च इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे हेलाराजीये--जातिकार्याय इति, जातिः कार्याय इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। तथा हि--प्रथमपाठे पूर्ववाक्योक्ता जातिः अत्र वाक्ये कल्पतेः कर्त्री। द्वितीयपाठे तु कार्याय इत्यस्य-जातिकार्याय इत्यर्थः।

एतदग्रे हेलाराजीये— इत्यर्थजातीनां स्वत इति, इत्यर्थंजातीनां स्वत इति, इत्यर्थजातिनां स्वत इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्।

एतदग्रे-- तत्कार्यं शब्दप्रत्ययानुवृत्तिलक्षणमिति, तत्कार्यंशब्दप्रत्ययानुवृत्ति-लक्षणमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्यायुक्तः। तथा हि-अत्र-पाठे-तत्कार्ये उद्देश्यत्वं, शब्दप्रत्ययानुवृत्तिलक्षणे चार्थे विधेयत्वं विवक्षितं न सिद्धयति, वृत्तौ एकार्थीभावेन उद्देश्यविधेय-भावाप्रतीतेः।

एतदग्रे—शब्दप्रत्ययानुवृत्तिलक्षणं शब्दार्थयोरिति, शब्दप्रत्ययानुवृत्तिलक्षण-शब्दार्थयोरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, संपादयन्ती इत्यनेनान्व-यादर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--शब्दसमवायिनी इति, शब्दसमवायिना इति, शब्समवायिनो इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अर्थसंगतिश्च जातिविशेषणतया बोध्या। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—अर्थेनाध्यारोपिताभेदा इति, अर्थेनाधारोपिता इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, 'द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—संपादयन्ती इति, संपदयन्ती इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, 'द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—तदात्मना संपद्यते इति, तदात्मानसपद्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः 'द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दे जातेः समवाय इति शब्दजातेः समवाय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्यक्तिरूपे इति विशेषणदर्शनात्। द्वितीयपाठस्तु तस्य विशेषणपदस्य वैयर्थ्यापत्त्या हेय।

एतदग्रे हेलाराजीये—यौगपद्याभावादिति, येऽनुत्पाद्याभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः 'द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे हेलाराजीये--शब्दजातेः समवाय इति, शब्दजाते समवाय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, 'द्वितीपाठस्तु अर्थासंग-त्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--केवलं स्फोटस्येति, केवलस्फोटस्येति पाठद्वयं दृश्यते । तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः । तथा हि- केवलस्फोटस्येत्यस्य ध्वनिरूपारूषितस्येत्यर्थः । तद्रूपरूषितस्यानन्तभेदसंभवात् । प्रथमपाठस्त्वर्थासंगत्याऽयुक्तः ।

तथा हि—केवलमित्यस्य दर्शनद्वयमित्यनेनान्वयः संभवति । तथात्वे चार्थासंगतिः । वर्णपदवाक्यभेदेन अन्यस्यापि दर्शनत्रयस्य संभवात् ।

इतः पूर्वं – समवायः स्यादिति, समवायं स्यादिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त ।

एतदग्रे --जातिव्यक्तिभेदेन दर्शनद्वयमिति, जातिव्यक्तिभेदेन द्वयमिति पाठद्वयम् दृश्यते । तत्राद्यपाठ एव युक्त. अर्थसंगतेः । द्वितीयपाठे तु द्वयविशेषाप्रतीत्याऽर्थासंगतिः ।

एतदग्रे--व्यक्तिस्फोटे जातिरिति, व्यक्तिस्फोटजातिरिति पाठद्वयम् दृश्यते । तत्राद्यपाठ एव युक्तः जातिव्यक्तिस्फोटे समवेता इत्येवमन्वयेनार्थसंगतेः । द्वितीयपाठे तु नास्यार्थस्यलाभ इत्यसंगतः ।

एतदग्रे--भिन्नस्य नित्यस्य शब्दस्येति, भिन्नस्य नित्यशब्दस्येति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । न हि नित्यत्वविशिष्टे शब्दे भिन्नत्वं बुबोधयिषितं वैयर्थ्याद् इति । अत एकत्र द्वयमितिरीत्यैव विशेष्यविशेषणभावोऽत्र विविक्षित इति प्रतिभाति ।

एतदग्रे--अभिन्नाभिधानप्रत्ययहेतुर्जातिरिति, अभिन्नाभिधानप्रत्ययहेतुजातिरिति पाठद्वयम् दृश्यते । तत्राद्यपाठ एव युक्तः जातौ अभिन्नाभिधानप्रत्ययहेतुत्वस्य विधेयत्वात् । तस्य च वृत्तावेकार्थीभावेन संभवाभावात् ।

एतदग्रे—जात्याच्छुरिताया इति जात्याच्छुरितया इति पाठद्वयं दृश्यते । जात्यच्छुरिताया इति तृतीयोऽपि पाठः क्वचिदुपलभ्यते । तत्राद्यपाठ एव युक्तः, व्यक्तेर्विशेष्यत्वात् । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे-- व्यक्तेरेव वाचकत्वमिति, व्यक्तेरेव वाचत्वमिति पाठद्वयम् दृश्यते । तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—कथमत्राननुयायिन्या इति कथं तत्राननुयायिन्या इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः अत्र अननुयायिन्या इत्यस्य अननुगताया इत्यर्थः ।

एतदग्रे हेलाराजीये—शब्दार्थसंबन्धश्चात्रेति, शब्दार्थसंबन्धस्यात्र इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः अर्थसंगतेः, । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे – शब्दः संज्ञात्वेन इति, शब्दः संज्ञात्वे इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे - नियुज्यमान इति, विनियुज्यमान इति पाठद्वयं दृश्यते तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः, प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—शक्त्यवच्छेदमात्रे संज्ञाकर्तुर्व्यापार इति, शक्त्यवच्छेदमात्रं संज्ञाकर्तुर्व्यापार इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव--संज्ञाकर्तु र्व्यापार इति, संज्ञाकतुरव्यापार इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

इतः पूर्वं—शब्दः संज्ञात्वेन इत्यस्य स्थाने शब्दः संज्ञातेन इत्यपि पाठः क्वचिद् दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे--नत्वपूर्वसंकेतकरणे इति, नत्वनर्थभूतसंकेतकरणे इति, न तु पूर्वसंकेतकरणे इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—इत्थं चादैक्षु इति, एवश्चादैक्षु इति पाठद्वयं दृश्यते। एवश्चादिक्षु इति, एवमादैक्षु इति पाठद्वयमपि अत्र दृश्यते। अस्मिन् पाठचतुष्टये आद्यं पाठद्वयमेव साधु, अर्थसंगतेः। एवमादैक्षु इति चतुर्थपाठोऽपि साधुः, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे— वक्तृभेदाद्वा इति, वक्तृभेदाद्वा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तथा हि अत्र पाठे—वक्त्रभेदो नानेकत्वे हेतुः संभवति इति।

एतदग्रे—अनेकत्वे समानाकारप्रत्ययनिबन्धनजातिरिति, अनेकत्वसमानाकारप्रत्ययनिबन्धनजातिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव--समानाकारत्वं प्रत्ययनिबन्धनजातिरिति पाठोऽपि क्वचिद् दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

क्वचित्तु—समानाकारप्रत्ययनिबन्धनं जातिरिति पाठो दृश्यते। स तु युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च।

क्वचित्--समानाकारप्रत्ययनिबन्धनजातिरेषणीया इति, क्वचित्--समानाकारप्रत्ययनिबन्धजातिरेषणाया इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--आकाशस्य संयोगीभेदेन इति, आकाशस्य संयोगिभेदेन इति पाठद्वयं दृश्यते। तत्राद्यपाठोन युक्तः, अर्थासंगतेः, द्वितीयपाठस्तु युक्तः, अर्थसंगतेः।

एतदग्रे--कलितभेदस्येति, कल्पितभेदस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः, द्वितीयपाठस्तु अर्थसंगत्या युक्तः।

एतदग्रे--अनेकत्वे सति इति, अनेकत्वे हि सति इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--आकाशत्वमिति, आकाशजातिरिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—लक्ष्यते इति, वक्ष्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, आकाशत्वजातेर्वक्ष्यमाणत्वाभावात् ।

एतदग्रे--न चैवं सर्वस्मादिति, न च सर्वस्मादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—कुत्रचित् कस्यचित्प्रसिद्धत्वादिति, कुत्रचित् प्रसिद्धत्वादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे--अर्थप्रकरणादयो विभागहेतव इति प्रकरणादयो विभागहेतव इति, पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—तद् यथा इति, ततयथा इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे- गो शब्देन इति, गोशब्दे इति, भो शब्देन इति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयमेव युक्तम्, अर्थसंगतेः । तृतीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः ।

एतदग्रे--नवस्वर्थेषु इति, नवस्त्वर्थेषु इति, नवस्वर्थेन्न इति, न नस्वर्थेषु इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठत्रयं तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम् ।

एतदग्रे—संनिहितेष्वपि इति, ह्यं निहितेष्त्रपि इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठ॰तु शब्दाशुद्धाऽयुक्तः ।

एतदग्रे—प्रतिनियतार्थावसाय इति, प्रतिनिपातार्थावसाय इति पाठद्वयं दृश्यते तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—वाचिका इति, वाचिकाः इति पाठद्वयं दृश्यते । तत्राद्य पाठो युक्तः शब्दव्यक्तिरिति विशेष्ये एकवचनदर्शनात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे—प्रथममभेदेन इति, प्रथमभेदेन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—ततोऽर्थजातिरिति, ततोऽर्थजाति इति, पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—प्रत्यायने त्वक्रमतैव इति, प्रत्यायनं त्वक्रमतैव इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—यथा ह्यालोकाच्छुरितोऽपि इति, तथा ह्यालोकाच्छुरितोऽपि इति, यथा सालोकाच्छुरितोऽपि इति, यथा ह्यारोकाच्छुरितेऽपि इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, एवं शब्दस्वरूपोपरक्तोऽर्थ इति वक्ष्यमाणग्रन्थानु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रोधात् । तत्र हि—तथा शब्दसमानार्थकः एवं शब्दो दृश्यते इति । इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—शब्दस्वरूपोपरक्तोऽर्थ इति. शब्दस्वरूपोपात्तोऽर्थ इति, शब्दस्वरूपोपरकोऽर्थ इति पाठत्रयं दृश्यते तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—अर्थप्रकाशकत्वस्य इति, अर्थप्रकाशतत्त्वम् इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे एवं विधस्य दृष्टेरिति, एवं विधस्य दृष्टे इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--यथा च गौर्वाहीक इति, यथा च गौर्वाहाक इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः । क्वचित्तु गौर्वाल्हीक इति पाठोऽपि दृश्यते । अयमपि पाठो युक्तः ।

तथा हि--यथा वाहीकदेशः स्मर्यते—

नदीनां सिन्धुषष्ठानामन्तरं ये समाश्रिताः ।
वाहीकानाम् ते देशा न तत्र दिवसं वसेत् इति ।।

तथैव वाल्हीकदेशोऽपि स्मर्यते ।।

एतदग्रे—यथा च गौर्वाहीक इत्यत्र न गोत्वमात्रं प्रतीयते इति, यथा च गौवाहीक इत्यत्र गोत्वमात्रं प्रतीयते इति, यथा च गौर्वाहीक इत्यत्र न गोत्वत्वमात्रं प्रतीयते इति, चथा च गौर्वाहीक इत्यत्र न गोत्वमात्रं प्रतीयतेः इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगयतेः । इतरत्पाठत्रयन्तु अर्थासंगत्याः शब्दाशुद्धया चायुक्तम् ।

एतदग्रे—अध्यारोपित गोरूप इति, अध्यारोपित गोरूण इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—वाहीक इति, वाल्हीक इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—एवमिहापि इति, एवमहापि इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः' अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—शब्दजातेः समावेश इति, शब्दजातेः संवेश इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः ।

तथा हि—अत्र पाठे समावेशपदस्य समारोपोऽर्थः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । तथा हि--अत्र पाठे संवेशपदस्य शयनमर्थः । स चात्रानन्वितः ।

तथा च रघुः—क्रमेण सुप्तामनुसंविवेशसुप्तोत्थितां प्रातरनूदतिष्ठत् इति (२ सर्गे) ।

संवेशाय विशांपतेरिति च (१ सर्गे) ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तस्यैव इति, तस्यै इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्वाभाविकश्चायमर्थप्रत्यायने इति, स्वाभाविकांश्चायमर्थप्रत्यायने इति, स्वाभाविकस्वमर्थप्रत्यायने इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—अभ्युपाय इति, ह्युपाय इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—प्रतिपाद्योऽपि इति, प्रतिपाद्येऽपि इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः। अत्र पाठे- प्रतिपाद्यपदस्य श्रोताऽर्थः, न तु प्रतिपाद्यो विषयः। प्रतिपाद्यस्यार्थस्य प्रतिपद्यते इति वक्ष्यमाणप्रतिपत्तिकर्तृत्वासंभवात्। अतएव प्रतिपाद्येऽपि इति द्वितीयपाठो न युक्तः।

एतदग्रे—प्रतिपद्यते इति, प्रतिपाद्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, प्रतिपाद्योऽपि इत्यत्रत्यापिशब्दबलेन प्रपिाद्यप्रतिपादकयोरुभयोरपि वक्तृश्रोत्रोः प्रतिपत्तिकर्तृत्वसंभवात्। द्वितीयपाठे तु नोभयोः कर्तृत्वस्य कर्मत्वस्य वा संभव इति समुच्चयार्थकापिशब्दप्रयोगविरोधः।

एतदग्रे—न हि पुरुषधीनिमेतत् इति, न हि पुरुषार्थानधीनमेतत् इति, न हि पुरुषाधानं तदिति, न हि पुरुषाधीन्यमेतदिति, पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्या युक्त। इतरत्पाठत्रयं तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्।

एतदग्रे—अनादौ इति, आनादाविति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—संबन्धव्युत्पत्तेरिति, संबन्धव्यत्पत्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धाऽयुक्तः।

एतदग्रे—कोऽत्र नियत इति, को जनियत इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—नियतोऽध्यारोपयिता इति, नियमतोऽध्यारोपयिता इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। नियताध्यारोपयिता इति तृतीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे—कल्प्यताम् इति, कल्पते इति पाठद्वयं दृश्यते। तदुभयमपि, साधु, अर्थसंगतेः।

एतदग्रे—अध्यारोपिताऽस्तु इति, अध्यारोपयिताऽस्तु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

इतः पूर्वम्—अभिन्न प्रत्ययोत्पत्तेरिति, अतिन्नप्रत्ययोत्पतेरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एवयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अध्यारोपिताऽस्तीति पाठोऽपि क्वचिद् दृश्यते । स तु अर्थासंगत्याऽयुक्तः । लोडन्तपाठस्यैव युक्तत्वात् ।

एतदग्रे—शाब्दी चेयमिति, शाब्दी इयमिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—चाक्षुषेण इति, चक्षुषेण इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—रक्तादिप्रत्ययेन इति, रक्तादिप्रत्ययेम इति, रक्तादिप्रत्ययार्थेन इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयं तु शब्दाशुद्ध्या अर्थासंगत्या चायुक्तम् ।

एतदग्रे—निदर्शनभूतेन इति, दर्शनभूतेन इति, निदर्शनेनैव इति पाठत्रयं दृश्यते । तत्राद्यतृतीयपाठावेव युक्तौ, अर्थसंगते । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अयमनादिरध्यारोप इति, अर्थानादिरयमध्यारोप इति, अयमनादिध्यारोप इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम् ।

अत्रैव—अत्र यो रूढ इति, अध्यारोपो रूढ इति पाठद्वयं दृश्यते । तत्राद्यपाठो न युक्तः, अर्थासंगतेः । द्वितीयपाठस्तु युक्तः, अर्थसंगतेः ।

एतदग्रे—प्रतिभानादिति, प्रतिज्ञानादिति, प्रतिभानां इति पाठत्रयं समुपलभ्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयं तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम् ।

एतदग्रे—मिथ्याज्ञानमिदमिति, मिथ्याज्ञानं तयिदमिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्त, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—प्राक् च संबन्धसंवेदनसमयादिति, प्राक् संबन्धसंवेदनसमयादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

अत्रैव—प्राक् च संबन्धसंवेदनसमयादिति, प्राक् च संबन्धसंभेदनसमयादिति, प्रांक् च संब्रन्धसंवेदनसमवायां इति, प्राक् च संबन्धसंवेदनसमयां इति, एतत्पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, । इतरत्पाठत्रयन्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तम् ।

एतदग्रे—भेदेनात्रभान्त्येत्र इति, भेदेनावभान्त्योव इति, भेदेनावभावन्त्येव इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम् ।

एतदग्रे—अव्युत्पन्नसंकेतस्य इति, अव्युतपत्त्यं संकेतस्येति, अव्युत्पन्नसंकेतस्य हि इति, पाठत्रयं दृश्यते । तत्राद्यतृतीयाठावेव युक्तौ, अर्थसंगतेः द्वितीय पाठस्तु शब्दाशुद्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—भिन्नः प्रत्यय उत्पद्यते इति, भिन्नज्ञं प्रत्यय उत्पद्यते इति, प्रत्यय उत्पद्यते इति, अभिन्नः प्रत्यय उत्पद्यते इति पाठचतुष्टयं दृश्यते। तत्र चतुर्थपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्।

एतदग्रे—वाचकसंनिधानाभावादिति, वाचासंनिधानाभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अर्थजातिरवधार्यते इति, अर्थजातिरिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। द्वितीयपाठे हि—अस्तीति क्रियापदमध्याह्रियते। अस्तिर्भवन्तीपरः सर्वत्र प्रयुज्यते इत्यभ्युपगमात्।

एतदग्रे—भेदेनानिर्धारितायामिति, भेदेन तदनिर्धारितायामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दजातिरिति, शब्दजाति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेः। द्वितीयपाठस्तु विभक्त्यभावादयुक्तः।

एतदग्रे—समारोप्यते इत्यादि इति, समारोप्येतेत्यादि इति, समारोप्येतेत्पादि इति, समारोप्यते इति पाठचतुष्टयं दृश्यते। तत्र प्रथमपाठः, चतुर्थपाठश्च युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु कथमिति पूर्वोक्तपदविरोधादयुक्तः। तृतीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

जातिशब्दैकशेषे सा—९

अस्याः कारिकाया अवतरणिकायां हेलाराजीये-जातिकार्याय कल्पते इति जातिःकार्याय कल्पते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अष्टमकारिकायाः पूर्वोक्तायाश्चतुर्थे पादे आद्यपाठस्यैव दर्शनात्, युक्तत्वेन व्याख्यानाच्च। अतएव द्वितीयपाठो न युक्तः।

अस्या एव कारिकाया प्रथमे पादे जातिशब्दैकशेषे सा इति, जातिः शब्दैकशेषे सा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अतएवैतत्कारिकाव्याख्याने हेलाराजीये—जातिशब्दैकशेषे प्रसक्ते इति उक्तम्। द्वितीयपाठस्तु अर्थासंगत्या न युक्तः।

अस्या एव कारिकाया द्वितीये पादे—जातीनां जातिरिष्यते इति, जातिनां जातिरिष्यते इति पंठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

अस्या एव कारिकायाश्चतुर्थे पादेतज्जातिः शब्दजातिषु इति, न जाति शब्दजातिषु इति, त जातिः शब्दजातिषु इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वयं तु अर्थासङ्गत्या शब्दाशुद्धया चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत्कारिकाव्याख्याने हेलाराजीये—आकृत्यभिधानाद्वा इति, अकृत्यभिधानाद्वा इति, आकृत्यभिमताद्वा इति पाठत्रयं—ततः परम्-वाजप्यायन इति; वाजाप्यायन इति पाठद्वयम्।

ततः परम्—इत्युक्तं जातिपक्षे, इति, इत्युक्तो जातिपक्षे इति, इति जातिपक्षे इति पाठत्रयं दृश्यते।

तत्राद्ये पाठत्रये—आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्। ततः परस्मिन् पाठद्वयेऽपि आद्यपाठ एव युक्तः, शब्दशुद्धेः।

तथा हि—वाजं पाति वाजपः, आतोऽनुपसर्गे कः। वाजपस्य गोत्रापत्यं वाजप्यः, युवापत्यं वाजप्यायनः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। वाजपेये पेयोऽन्नविशेषो वाजम्। पेयाविलेपी इत्यायुर्वेदे। लप्सी इति भाषायम्। तृतीयेपाठत्रये तृतीयपाठ एव युक्तः। अत्रैकशेष उक्त इति वक्ष्यमाणग्रन्थानुरोधात्। इतरत्पाठद्वयं तु वक्ष्यमाणैतद् ग्रन्थविरोधाद् अयुक्तम्।

एतदग्रे—अत्रैकशेष उक्त इति, अत्रैकशेष इत्युक्त इति, अत्रैकशेष इत्युक्तमिति पाठत्रयं दृश्यते। तत्रादितः पाठद्वयमेव साधु, अर्थसंगतेः। तृतीयपाठस्तु एकशेषशब्दस्य पुंस्त्वादयुक्तः। एकशेष इति पदस्य वचनकर्मत्वे तु अयमपि युक्त एव।

एतदग्रे—सह विवक्षा चैकशेषेण लक्ष्यते इति, स हि विवक्षा चैकशेषेणलक्ष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः सह विवक्षया वैकं शेषेण लक्ष्यते इति, सह विवक्षा चैकं शेषेणलक्ष्यते इति, सह विवक्षं वैकशेषेण लक्ष्यते इति, सह विवक्षा वैकशेषेण लक्ष्यते इति पाठचतुष्टयन्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्।

एतदग्रे—जातिशब्दैकशेषे इति जातिशब्दोकशेषे इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते, द्वितीयपाठे तु शब्दाशुद्धिः।

अत्रैव—प्रसक्त इति, असक्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। प्रसक्त इति च सप्तम्यन्तं पदं बोध्यम्, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इति वा योजनीयम् इति, इति चायोजनीयम् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। विकल्पस्य विवक्षितस्याबोधकत्वात्। इति वा योजनीय इति निर्विभक्तिकपाठोऽपि अयुक्तः असाधुत्वात्।

एतदग्रे—सा इति शब्दजातिरिति, एवं सति शब्दजातिरिति पाठद्वयं दृश्तते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अर्थजातीनामभेदेन प्रत्यवस्यमाना इति, अर्थजातीनामभेदेना-प्रत्यवस्यमाना इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अर्थजातीनामनध्यप्रत्यास्यमाना इति, अर्थजातीनामभेदेन प्रत्यवध्यास्यमाना। इति, अर्थजातीनामभेदेन प्रत्याध्यमाना इति, अर्थजातीनामभेदेनाध्यस्यवे प्रात्याय्यमाना इति पाठचतुष्टयमपि अत्र दृश्यते। किन्तु एष सर्वोऽपि पाठः शब्दाशुद्धेरर्थासंगतेश्चायुक्तः।

एतदग्रे—जातिरेकशब्दत्वमिति, जातिशब्दवत्त्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—संपादयति जातिकार्यमिति, संपादयति शब्दकार्यमिति, संपादयति कार्यमिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—तद् यथा गावौ वृक्षा इति, तद् यथा गावौ वृक्षमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, उत्तर वाक्येन सह समन्वयात्। द्वितीयपाठे तु वृक्षमित्यत्र प्रथमातिक्रमे कारणाभावात् अनौचित्यम्।

एतदग्रे—इत्यादिरभिन्नसामान्यनिबन्धन इति इत्यादिरभिन्नस्य सामान्यनिबन्धन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—समाश्रितविशिष्टसंख्य इति, समाश्रितविशिष्टसंख्याकृत इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—एकशब्दप्रयोग इति, एकशब्द इति पाठद्वयं दृश्यते। तदुभयमपि साधु। जातय इमा इति, अथा जातय इमा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगतेरयुक्तः।

अत्रैव—तथा जातय इमा इति, तथा इमा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जात्याश्रयापरजात्यभावादिति, जात्याश्रयपरजात्याभावादिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—वाचकजात्यभावादिति, जात्यभाववािति पाठद्वयं दृश्यते। तदुभयमप्यसाधु, अर्थासंगतेः।

एतदग्रे—वाचकजात्यध्यासाश्रयइति, वाचकजात्याध्यासाश्रय इति, वाचकजातात्यध्यासाश्रय इति, पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्यात्ऽयुक्तम्।

एतदग्रे—इति उपपद्यते इति, उपपद्यते इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव—वाचकजात्यध्यासाश्रय इति जात्यध्यासाश्रय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—उपचरतीत्युच्यते इति, उपरचयतीत्युच्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत्रोपचार आरोपः।

एतदग्रे—कुतो नियमः केनचित् क्रियते इति, नियमः केनचित् क्रियते इति, पाठद्वयं दृश्यने। किञ्च नियमो येनकेन क्रियते इति, नियमः केनचित् कृत इति पाठद्वयमपि उपलभ्यते क्वचित्-क्वचित्। एवमस्मिन् पाठचतुष्टये द्वितीयपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—प्रत्याय्याः तदा इति, प्रत्याय्याः तथा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। यदा इति पदस्य पूर्वमुपन्यासाच्च। द्वितीय-पाठस्तु न युक्तः, अर्थासंगतेः, यथा पदस्य पूर्वमनुपन्यासाच्च।

एतदग्रे—आस्वप्यभिधानगतमिति, आष्वप्यभिधानगतमिति, तास्वप्यभि-धानगतमिति, आस्वप्यभिधाननं गतमिति पाठचतुष्टयं दृश्यते। तत्राद्यतृतीयपा-ठावेव युक्तौ, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्।

एतदग्रे—एवेत्याह इति, एवेत्याकि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—इत्यत्र इति, इति, इत्यत्र इत्यादि इति पाठद्वयं दृश्यते। तदुभय-मपि साधु, अर्थसंगतेः।

एतदग्रे—तज्जातिः शब्दजातिः, शब्दगतं सामान्यमिति, शब्दजातिः शब्दगतं सामान्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु व्याख्येयस्य तज्जातिपदस्य अनिर्देशादयुक्तः।

एतदग्रे—शब्दजातय इमा इत्यत्रेति, इमा इत्यत्रेति, जातय इमा इत्यत्रेति, जातिपदमा इत्यत्रेति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्।

एतदग्रे—एकशब्दप्रयोगे इति, दृष्टशब्दप्रयोगे इति पाठद्वयं दृश्यते। तदु-भयमपि साधु अर्थसंगतेः।

एतदग्रे—उच्चरितस्य शब्दजातिशब्दस्य इति, उच्चरितशब्दजातिशब्दस्य इति, उच्चरितशब्दजातिः शब्दस्येति, उच्चरितया जातिः……निबन्धनमित्यर्थ इति पाठचतुष्टयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थगतेः। इतरत्पाठद्वयन्तु अर्था-संगतया शब्दाशुद्धया चायुक्तम्।

एतदग्रे—गो शब्दत्वादिकासु इति, गो शब्दत्वादिका नु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—व्यक्तिस्थानीयासु इति, व्यक्तिस्थानायासु इति पाठद्वयं दृश्यते। तत्राद्य पाठ एव युक्तः। द्वितीय पाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—प्रतिपाद्यास्वभिन्नशब्दप्रयोगे इति; प्रतिपाद्या इति भिन्नशब्दप्रयोगे इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अभिन्नशब्दप्रयोगे निबन्धनमित्यर्थं इति, अभिन्नशब्दप्रयोगनिबन्धनमित्यर्थं इति, अभिन्नशब्दप्रयोगे बन्धन इत्यर्थं इति, अभिन्नशब्दप्रयोगे बन्धनमित्यर्थं इति पाठचतुष्टयं दृश्यते। अत्राद्यं पाठद्वयमेव साधु. अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

या शब्दजातिः शब्देषु—१०

अस्याःकारिकाया अवतरणिकायां हेलाराजीये यद्येवमिति यद्येयमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—शब्दजातिरिति, शब्दजाति इति, शब्द इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

एतदग्रे—शब्दगतानामपि, जातीनामन्या इति, शब्दजातीयामन्या इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तइति।

एतदग्रे—वाचकजातिरिति, वाचकः जातिरिति, वाचकाजातिरिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्ध्याऽयुक्तम्।

एतदग्रे तासामप्यन्येत्यनवस्थाप्रसंग इति, तासामप्यन्नेत्यं नवस्थाप्रसङ्ग इति। पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—इत्याशङ्क्याह इति, यद्येवं……………इत्याशङ्क्याह इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव कारिकायाः प्रथमे पादे—या शब्दजातिः शब्देषु इति, या शब्दजातिशब्देषु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव कारिकाया द्वितीये पादे-शब्देभ्यो भिन्नलक्षणा इति, शब्देभ्यो जातिः लक्षण इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव कारिकायाश्चतुर्थे पादे मप्यतिक्रम्य वर्तते इति अथातिक्रम्य वर्तते, इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽपि युक्त एव, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत्कारिकाया व्याख्याने हेलाराजीये गोशब्दत्वादिशब्दजातिवर्गान्तः पातिनी इति, गोशब्दत्वादिवत् शब्दजातिवर्गान्तः पातिनी इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

इतः पूर्वम्—प्रयोक्तृभेदादिति, प्रयोज्यभेदादिति पाठद्वयं दृश्यते। तत्राद्य-पाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--शब्दजातिशब्देषु इति, शब्दजातिः शब्देषु इति, शब्दजातिभेदेषु इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्था-संगत्याऽयुक्तम्।

एतदग्रे--अभिन्नप्रत्ययनिबन्धना इति, अभिन्नाप्रत्ययनिबन्धना इति अभिन्नं प्रत्ययनिबन्धना इति, अभिन्नप्रत्ययनिबन्धनमिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु शब्दाशुद्धयाऽयुक्तम्।

अत्रैव—अभिन्नप्रत्ययनिबन्धना या जातिरिति, अभिन्नप्रत्ययनिबन्धना जातिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अग्रे सा इत्यस्य दर्शनात्।

अत्रैव—या जातिस्तेभ्य एव शब्देभ्य इति, या जातिरेव शब्देभ्य इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः।

एतदग्रे—सा गो शब्दत्त्वादिजातिवर्गान्तःपातिनी न तु व्यपदेशान्तरार्हा इति, सा गोशब्दत्वादिजातिवर्गान्तःपातिनीजातिर्न तु व्यपदेशान्तरार्हा इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—गो शब्दत्वादिवत् शब्दजातय इति, शब्दत्वादिवत् शब्दजातय इति, गो शब्दत्वादिवत् शब्दत्वादिजातय इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—एकशब्दप्रयोगेण इति, एकशब्दप्रयोगे इति पाठद्वयं दृश्यते। तदुभय-मपि साधु, अर्थसंगतेः।

एतदग्रे—साऽपि प्रत्याय्यते इति, प्रत्याय्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु प्रत्यायनक्रियाकर्मानिर्देशादयुक्तः।

एतदग्रे—न प्रयोगानवस्थापत्तिरिति, न प्रयोगानयस्थापतिरिति, न प्रयोगानवस्थापत्यभिप्राय इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

अर्थं जात्यभिधानेऽपि—११

अस्याः कारिकाया अवतरणिकायां हेलाराजीये—तदेवमिति, तदेव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—स्वनिकायसिद्धाध्यासदर्शनाश्रयेण इति, स्वनिकायसिध्यांस दर्शनाश्रयेण इति, स्वनिकायसिद्धाध्यासदर्शनाश्रयणे इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः तृतीयपाठोऽपि युक्त एव, अर्थसंगतेः।

एतदग्रे—यद्येवं··········· इत्याशङ्कयाह इति, तदग्रे—प्रयोक्तृ········ गो शब्दत्त्वादिवत् इति पाठद्वयं दृश्यते। तत्तु नात्रोपयुज्यते, किन्तु अन्यत्रत्यमत्र संपातायातमिति बोध्यम्।

एतदग्रे—दर्शिता स्वरूपभूता हि इति, दर्शिता स्वरूपश्रुता हि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः; द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दानामन्तरङ्गत्वादिति, शब्दानां मंतव्यांत्वादिति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—प्रतिपाद्या इति, प्रतिपाद्य इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे अध्यासानाश्रयेणापि इति, अध्यासानाश्रयणाऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्त्वयुक्तः, स्वान्वययोग्यार्थाप्राप्तेः।

एतदग्रे—प्रौढवादितयेति, प्रत्यक्षवादितयेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु नार्थसंगतिरित्ययुक्तः सः।

एतदग्रे—जातिपदार्थव्याप्तिमिति, जातिपदार्थव्यक्षिप्तमिति, जातिपदार्थव्याप्तमिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तम्।

अस्या एव कारिकायाः प्रथमे पादे—अर्थजात्यभिधानेऽपि इति, शब्दजात्यभिधानेऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, यदा विशुद्धा एवार्थजातयः शब्दैरभिधीयन्ते इति हेलाराजीये व्याख्यादर्शनाच्च।

अस्या एव कारिकाया द्वितीये पादे—सर्वे जात्यभिधायिन इति, सर्वे कात्यभिधायिन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अस्या एव कारिकाया व्याख्याने हेलाराजीये—अन्यथा चात्र इति, अन्यथा वा इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु न युक्तः, पक्षान्तराभावेन वा शब्दस्य वैयर्थ्यात्।

एतदग्रे—शब्दजातेरर्थजातीनामिति, जातिशब्दे जातेरर्थजातीनामिति, शब्दजातेरर्थजातियानामिति, शब्दजातेरर्थजातीयानामिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--जातिकार्यमिति, जातिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः,। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--संबन्धव्युत्पत्तिस्तु इति, संबन्धिव्युत्पत्तिस्तु इति पाठद्वयं दृश्यते। तत्र द्यपाठ एव युक्तः, अर्थसंगतेः। संबन्धव्युपत्तिरित्यस्य हि संकेतग्रह इत्यर्थः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त :।

एतदग्रे--स यत्र संकेतस्तत्र इति, यत्र हि संकेतस्तत्र इति पाठद्वयं दृश्यते। तत्र द्वितीय पाठ एव युक्तः, अर्थसंगतेः। प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दजातिरध्यस्यते इति, शब्दजातिरध्यस्यतैः इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अर्थजातीनां सामान्यान्तरमन्तरेण इति, अर्थजातीनां'' ...शुद्धा एवार्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—सामान्यान्तरमन्तरेण इति, सामान्यान्तरेण मन्तरेण इति, सामान्यं तरमन्तरेण इति, पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

एतदग्रे—न संभवतीत्याह इति, संभवतीत्याह इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अर्थजात्यभिधानेऽपि इत्यादि इति, अर्थजात्यभिधानेऽपीत्यादि इति पाठद्वयं दृश्यते। तदुभयमपि साधु, संधिविसंधिभ्यां भेदात्।

एतदग्रे—यदा विशुद्धा एवार्थ जातय इति, यदाऽपि शुद्धा एवार्थं जातय इति, यदा एवार्थ जातय इति पाठत्रयं समुपलभ्यते। तत्राद्य पाठद्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे—शब्दैरभिधीयन्ते इति, शब्दैरधिधीयन्ते इति, शब्दैरधिधीयते इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—इत्याश्रीयते इति, इत्याश्रियते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे--तदाऽपि सर्वे इति, तदा सर्वे इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—तदा जातिवाचिन एव इति, तदा जातिवाचिन ए इति, तदा जातिवाचिन एक इतिपाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—ननु निस्सामान्यानि इति, नु नु निस्समान्यानि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चायुक्तः । क्वचित्तु–ननु सामान्यानि सामान्यानि इति पाठो दृश्यते । स तु न युक्तः, पुनरुक्तेः अर्थासंगतेश्च ।

एतदग्रे—अभिदध्युरित्याह इति, अभिदध्यरित्याह इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः, ।

एतदग्रे—व्यापारलक्षणा इति, व्यापारलक्षण इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, पदार्थाः समवस्थिता इति विशेष्ये बहुवचनदर्शनात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे—कार्यं प्रयोजनमिति, कार्यप्रयोजनमिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, विवरणविक्रियमाणयोः पृथक्पाठ एव उद्देश्यविधेयभावप्रतीतेः । अतएव द्वितीयपाठो न युक्तः । क्वचित्तु—इति प्रयोजनमिति पाठो दृश्यते । स तु अयुक्तः, अर्थासंगतेः ।

एतदग्रे—ते तथा इति, ते तथा हि इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—नियतस्वरूपा इति, नियमितस्वरूपा इति पाठद्वयं दृश्यते । तदुभयमपि साधु अर्थसंगतेः ।

अत्रैव क्वचित्पुस्तके—कार्यप्रयोजनं तदेव लभ्यते तेन स्वरूपाः इति पाठो दृश्यते स तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अयमाशय इति, सममाशय इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः इति ।

एतदग्रे—वैशेषिकादीनामिति, शेषिकादीर्स्या इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—भवन्तु निःसामान्यानि सामान्यानि इति, भवन्तु सामान्यानि, इति, भवन्तु व्यक्तिजानि सामान्यानि इति, भवन्तु सामान्यानि तानि इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगते, इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—तानि ह इति, तानि हि इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । अत्रैव—तानप्यनूद्य इति पाठोऽपि क्वचित् दृश्यते । स तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—व्यक्तिष्वन्वयप्रत्ययावसेयानि इति, व्यक्तिष्वनयप्रत्ययावधेयानि इति, व्यक्तिष्वन्वयप्रत्ययावसे यानि इति पाठत्रयं समुपलभ्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयं तु अर्थासंगत्या हेयम् ।

एतदग्रे—परोपाधिरूपाणि इति, परोपाधिरूपेणेति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--स्वतंत्रव्यक्तिवदिति, स्वनंत्तव्यक्तिवदिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्रैव—स्वतन्त्रव्यक्तिवदिदन्तावभासित्वाभावादिति, स्वतन्त्र व्यक्तिवादिदन्तावभासित्वाभावादिति, स्वतंत्रव्यक्तिवदिदन्तावभासि तत्त्वाभावादिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याशब्दाशुद्धचा चायुक्तम्। स्वतन्त्रव्यक्तिवदिदन्ता क्वासिद्धाभावादिति पाठोऽपि, क्वचिद् दृश्यते। स तु शब्दाशुद्धचाऽर्थासंगत्या चायुक्तः।

एतदग्रे—न सामान्यान्तरेणोपाधीयन्ते इति, सामान्यान्तरेण नोपाधीयन्ते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। सामान्यान्तरेण नोपधीयन्ते इति पाठोऽपि क्वचिद् दृश्यते। स तु न युक्तः, आङुपसर्गं बिना उपाधिना व्यावर्त्यन्ते इत्यर्थस्येष्टस्यालाभात्। सामान्यान्तरेण नोपाधीयन्तो इति पाठस्तु शब्दाशुद्धयाऽयुक्तः। सामान्यान्तरेणे नोपाधीयन्तु इति पाठोऽपि शब्दाशुद्धचाऽयुक्त एव।

एतदग्रे--वैयाकरणानामिति, वैय्याकरणानामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेः, अर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—शब्दार्थोऽर्थं इति शाब्दोऽर्थार्थं इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--इत्यभ्युपेयतामिति इत्यभ्युपगतानामिति इत्यभ्युपेयिनामिति, इत्यभ्यपेयनामिति इत्यभ्युपयतामिति पाटपञ्चकं दृश्यते। तत्र पञ्चमपाठ एव युक्तः। इतरत्पाठचष्तुष्टयन्तु शब्दशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे-अन्वयिरूपावच्छेदेन इति, अन्वधिरूपावच्छेदेन इति, अन्वयरूपावच्छेदेन इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धचाऽयुक्तः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे-शाब्दस्य प्रत्ययस्योत्पत्तेरिति, शाब्दस्य प्रत्ययस्योत्पाते इति पाठद्वयं दृश्यते। शाब्दस्य प्रत्ययस्योत्पत्तं इति, शाब्दस्य प्रत्ययस्योत्पत्त इति पाठद्वयमपि अपरं दृश्यते। अत्र पाठचतुष्के आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याशब्दाशुद्धचाचायुक्तम्।

एतदग्रे—जातिरविरुद्धाऽभ्युपगम्यां इति, जातिरविरुद्धाभ्युपगमा इति, जातिरविरुद्धाऽभ्युपगभ्य इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्, अर्थसंगतेः। तत्र द्वितीयपाठे अविरुद्धाऽभ्युपगमा इत्यत्र षष्ठ्यर्थे बहुव्रीहिः। तृतीयपाठस्तु शब्दाशुद्धचाऽर्थासंगत्याचायुक्त इति।

एतदग्रे—एतदेव इति, तदेव इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम् अर्थसंगतेः।

एतदग्रे—निमित्तमिति, निमितमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव—निमित्तमित्यत्रापि इति, निमित्तमात्रमत्रापि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—कः प्रद्वेष इति, कः प्रत्येष इति, कः प्रद्वेषष्टम् इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

एतदग्रे—प्रत्यक्षा इति अप्रत्यक्षा इति, उत्प्रेक्षा इति, वृक्षा इति पाठचतुष्टयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—स्वकार्यमिति, स्वजार्थमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे – विज्ञानादिकं कुर्वन्त इति, विज्ञादिकं कुर्वन्त इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—कुर्वन्त इति, कुर्वशीतिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—व्यवह्रियन्ते इति व्यवह्रियते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, पदार्था इति कुर्वन्त इति सन्तीति कर्तृपदेषु बहुवचनस्यैव दर्शनात्।

एतदग्रे—सामान्यवचनाद् द्रव्यादयोऽपि इति, सामान्यवचना द्रव्यदयोऽपि इति पाठद्वयं दृश्यते। सामान्यवचना अपि द्रव्यादय इति तृतीयपाठोऽपि क्वचिद् दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः। इतरत्पाठद्वयन्तु अर्थसंगत्या युक्तम्।

एतदग्रे—लक्ष्यन्ते इति, लक्ष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, द्रव्यादय इति बहुवचनान्तस्य कर्तृपदस्य दर्शनात्। अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—यच्छब्द आह इति, यच्छब्द अह इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—गुणोऽप्यभिधीयमानो जातिरेव इति, गुणोऽप्यधीयमानो जातिरेव इति, गुणोऽप्यभिधीयमानानां जातिरेव इति, पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—गुणोऽप्यभिधीयमानो जातिरेव। यथोपमानसमासे श्यामादिः इति, गुणोऽप्यमिधीयमानो जातिरेव यथोपमानं अभिधीयमाना जातिः स श्यामादिः इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। द्वितीयपाठ एव स श्यामादि इति विसर्गरहितोऽपि पाठः क्वचिद् दृश्यते। सोऽपि असंगत एव। स इति पुलिङ्गस्य सामानाधिकरण्येन निर्देशात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—क्रियाऽप्यभेदेनाभिधीयमाना जातिरिति, क्रियाऽप्यभेदेनभिधीयमाना जातिरिति, क्रियाऽप्यभेदेनाभिधीयमाना वा जातिरिति, क्रियाऽप्यभेदेन जातिरिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः इतरत्पाठत्रयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्। अत्रैव—क्रियाऽप्यभेदेनाभिधीयमानानामिति पाठोऽपि क्वचिद् दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—तथेदं तदिति इति, यथेदं तदिति इति, तथैदं तदिति इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्।

एतदग्रे—स्वातन्त्र्येण विशेष्यतयेति, स्वातन्त्र्यविशेष्यतया इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यथावसरमग्रे निर्णेष्यते इति, यथावसरमग्ने निर्णेष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्यायुक्तः। इतरत्पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—निर्णेष्यते एव इति, निर्णेष्यते एवा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अन्यपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—एतच्च लौकिकव्यवहारानुगुण्येन इति, तच्च लौकिकव्यवाहारानुगुणेन इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। अत्रैव यतस्त इति पठोऽपि क्वचिद् दृश्यते स तु अयुक्तः शब्दाशुद्धेः।

अत्रैव लौकिकव्यवहारानुगुण्येन इति, लौकिक····व्यवस्थानुगुण्येन इति, लौकव्यवहारानुगुण्येन इति, लौहिकानुगुण्येन इति, लौकिकवावहारानुगुण्येन इति, लौकिकव्यवहारानुगुणेन इति पाठषट्कं दृश्यते। तत्राद्यतृतीयपाठावेव युक्तौ, अर्थसंगतेः। इतरत्पाठचतुष्टयं तु यथायथं शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—शास्त्रान्तरप्रसिद्धा इति, शास्त्रान्तरप्रप्रसिद्धा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तोऽर्थसंगतेः। द्वितीयपाठे तु एकः प्रशब्दोऽधिकः।

एतदग्रे—लोकविरुद्धा इति, लोकविरुद्धो इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्यवस्थायाः स्त्रियाविशेष्यत्त्वात्। इतरत्पाठस्तु शब्दाशुद्धचाऽयुक्तः।

एतदग्रे—तथैव इति, तर्थेव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, द्वितीयपाठस्तु शब्दाशुद्धचाऽयुक्तः। अत्रैव—व्याकरणेऽप्याधारसप्तमी इति, व्याकरणोऽप्याधरसप्तमी इति, इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धचाऽयुक्तः।

एतदग्रे—शास्त्रान्तरे इति, शाखान्तरे इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्याकरणस्य शास्त्रत्त्वात्। यदि तु व्याकरणं शाखा स्यात्तदा द्वितीयपाठोयुक्तः, स्यात्। अत्रैव—शास्त्रान्तरे तु इति, शास्त्रान्तरे इति पाठद्वयं दृश्यते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्राद्यपाठ एव युक्तः । पूर्वस्माद् विशेषप्रतिपादनाय तु शब्दस्यावश्यकत्वात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे--अवयविनि इति, अवयवीति इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः ।

एतदग्रे—शृङ्गे गौरिति, शृङ्गे गौ इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—शाखायां वृक्ष इति शारद्वयां वृक्ष इति, शाखापां वृक्ष इति पाठत्रयं दृश्यते । । तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः । इतरत्पाठद्वयं तु अर्थासङ्गत्याऽयुक्तम्, शब्दाशुद्धेश्च ।

एतदग्रे--इत्थश्च इति, एवञ्च इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसङ्गतेः ।

एतदग्रे--शब्दाभिधेयस्य इति, शब्दाभिधायस्येति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः द्वितीयपाठस्तु शब्दाशुद्धया अर्थासङ्गत्या चायुक्तः ।

एतदग्रे—पदार्था लक्ष्यन्ते इति, पदार्थलक्ष्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—बहिर्वस्तूनि न सन्ति इति, वस्तूनि न सन्ति इति, बहिर्भूतवस्तूनि न सन्ति इति पाठत्रयं दृश्यते । तत्राद्यपाठः तृतीयपाठश्च युक्तौ । अर्थसंगतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः ।

एतदग्रे--तथाः प्रत्याय्यन्ते इति, तथा प्रत्याय्यन्ते इति पाठद्वयं दृश्यते । तथा आप्यायन्ते इति तृतीयपाठोऽप्यत्र क्वचिद् दृश्यते । तत्र द्वितीयपाठ एव युक्तः, अर्थसङ्गतेः, प्रथमपाठस्तु शब्दाशुद्धयाऽयुक्तः, तृतीयपाठस्तु अर्थासङ्गत्याऽयुक्तः ।

एतदग्रे--अभिधाव्यापारवशादिति, अभिधानव्यापारवशादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसङ्गतेः ।

एतदग्रे--प्रत्यायनाद् व्याप्ताप्तिरिति प्रत्यायमाना व्याप्तिरिति, प्रत्यायनाद् व्याप्ताप्तिरिति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं युक्तम् । अर्थसंगतेः, किन्तु व्याप्तिरित्यस्य स्थाने व्यक्तिरिति पाठो युक्तः, व्याप्तेरत्रानपेक्षितत्वात् । तृतीयपाठस्तु अर्थासङ्गत्याऽयुक्तः ।

एतदग्रे—पदार्थे सिद्धयेत्येषोऽप्यर्थ इति, पदार्थोक्ति इत्येषोऽप्यर्थं इति, पदार्थोऽप्योथोऽर्थं इति, पदार्थे सिद्धेत्येषो (अ) र्थंज इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठत्रयन्तु अर्थासङ्गत्याशब्दाशुद्धया चायुक्तम् ।

जातौ पदार्थे जातिर्वा—१२

इति कारिकाया अवतरणिकायां हेलाराजीये—अभिधालक्षणव्यापारत्वमेव इति, अभिधाव्यापारलक्षणत्वमेव इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अर्थसङ्गतेः । अभिधारूपस्य व्यापारस्य स्वरूपमिति हि तदर्थः । द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः । न हि अत्र अभिधाव्यापारस्य लक्षणत्त्वमुच्यते । किं तर्हि लक्षणमिति तत्तु स्वरूपं वा भवतु असाधारणधर्मो वा इति ।

एतदग्रे—व्यक्तयति इति, व्यक्तौ यदि इति, जातेन पदार्थे जातिर्वा विशेषो वा विजातिवत् शब्दैरपेक्ष्यते यस्मादतस्ते जातिवाचिनः व्यक्तयति इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः । द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः । तृतीयपाठस्तु उन्मत्तवाक्यवदनर्थकत्त्वादुपेक्षणीयः ।

प्रकृतकारिकायाः प्रथमे पादे--जातौ पदार्थे जातिर्वा इति, जातेन पदार्थे जातिर्वा इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः । जातौ पदार्थे इति पक्षावच्छेदं करोति इति हेलाराजीये पाठदर्शनाच्च । छन्दोऽनुरोधाच्च । द्वितीयपाठस्तु एतत् त्रितयस्याभावादयुक्तः ।

अस्या एव कारिकायाश्चतुर्थे पादे—दतस्ते जातिवाचिन इति, दस्ते जातिवाचिन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, छन्दोऽनुरोधाच्च । द्वितीयपाठस्तु शब्दाशुद्धेश्छन्दोभङ्गाच्चायुक्तः ।

एतत्कारिकाया व्याख्याने हेलाराजीये—सर्व एव शब्द इति, स एव शब्द इति सर्व एव हि शब्द इति, स एव हि शब्द इति पाठचतुष्टयं दृश्यते । तत्राद्य तृतीयपाठावेव युक्तौ, अर्थसङ्गतेः, द्वितीयचतुर्थपाठौ तु अर्थासंगत्याऽयुक्तौ ।

एतदग्रे—जातिवाचीत्यभ्युपगन्तव्यमिति, जातिवाचित्त्यभ्युपगन्तव्यमिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः । शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—भवतु इति, भक्त इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च । द्वितीयपाठे तु एतद्द्वयाभाव इति हेयः सः ।

एतदग्रे--मावाभूदिति, वामाभूदिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, विकल्पमानस्य प्रागुपन्यासौचित्यात् । अत्रैव—वाभूदिति, भावा भूदिति पाठद्वयमपि दृश्यते । तदुभयमप्ययुक्तम्, अर्थासंगतेः शब्दाशुद्धेश्च ।

अत्रैव—जातिषु जातिरिति, जातिजातिरिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—शब्दैस्तु इति, शब्देस्तु इति, शब्दैस्त इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः अर्थसंगतेः, शब्दशुद्धेश्च । इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम् ।

एतदग्रे—शब्दैस्तु जातिर्व्यतिरिक्तया इति, शब्दैस्तु जातिव्यतिरिक्तया इति, पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अपेक्षतेः कर्मनिर्देशसंभवात् । द्वितीयपाठस्तु तदभावादयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—एकस्वभावैव इति, एकस्वभावेव इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--प्रत्याय्यत्वेनाङ्गीक्रियते इति, प्रत्यायत्वेनाङ्गीक्रियते इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

अत्रैव—प्रत्याय्यत्त्वेनाङ्गीक्रियते इति, प्रत्याय्यत्त्वेनाक्रियते इति प्रत्याय्यत्वेनाक्रियतः इति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—स्वालक्षण्येन इति, स्वालक्ष्येण इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। स्वालक्षण्येन इत्यस्य हि स्वरूपेणेत्यर्थः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

एतदग्रे—वस्तूनां भेदः शब्दैरिति, वस्तूनां शब्दैर्भेदे इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु तदभावादयुक्तः। एतदग्रे—स्प्रष्टुमिति, स्पष्टमिति पाठद्वयं दृश्यते तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—न शक्यते इति, न शक्यतः इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—सत्त्वेऽपि इति, मत्त्वेऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे--अन्वयिरूपावेशेन संबन्धव्युत्पत्तौ इति, अन्वयिरूपावेशेन संबन्धः व्युत्पत्तौ इति, अन्वयिसंबन्धव्युत्पत्ताविति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगते :। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे--शब्दस्य वाचकत्वादिति, शब्दस्य अवाचकत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते : द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। यद्वा भेदस्य इत्यस्याध्याहारेण भेदस्यावाचकत्वादित्यर्थस्य संगतिः संभवत्येव इति द्वितीयपाठोऽपि युक्तः ।

एतदग्रे—जातीनामितरेतर भेद इति, जातिनामितरभेद इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—वस्तुसन्नाभिधीयते इति, वस्तुसत्त्वां नाभिधीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—अपि तु अभेदकल्पनेन, इति, अपि तु अभेदकल्पेन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः; द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र—अभेदं कल्पनेन इति तृतीयपाठोऽपि क्वचिदुपलभ्यते। स तु अयुक्तः, अर्थासंगतेः।

एतदग्रे—अभेदश्च सामान्यमिति, अभेदः स्वसामान्यम् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—एकशब्दत्वाज्जातय इति, एकशब्दत्वं जातय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तथा योऽपि विशेषः इति, तवायोऽपि विशेषः इति, तथा अपि विशेष इति। पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठे हि यच्छब्दाभावे वक्ष्यमाणेन सोऽपि इत्यनेन कस्य परामर्शः स्यात्।

एतदग्रे—वाच्यः प्रतीतिनियत इति, वाच्यप्रतीति नियत इति, वाच्यप्रतिः नियत इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—तुल्यमेव वक्ष्यते इति, तुल्यमेत्र च वश्यते इति, तुल्यमपेक्ष्यते इति पाठत्रयं दृश्यते। तत्र तृतीयपाठ एव युक्तः, अर्थसंगतेः। प्रथमपाठस्तु अर्थासंगत्या- द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—तत्रापि इति, तवापि इति पाठद्वयं दृश्यते। क्वचित् तत्रापि हि इति पाठोऽपि दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु हि शब्दस्य वैयर्थ्याद् दुष्टः।

एतदग्रे—वाल्यकौमाराद्यवस्थाभेद इति, तुल्यकौमाराद्यवस्थाभेद इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु तुल्यत्वप्रतियोगिनोऽनुपादानादर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्देन न स्पृश्यते इति, शब्देन न स्पश्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अनुगतं तद्धि इति, अनुगतद्धि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव—तद्धिप्रत्यभिज्ञा प्रत्ययनिमित्तमिति, असिद्धं प्रत्यभिज्ञा प्रत्ययनिमित्तमिति, अप्रसिद्धप्रत्यभिज्ञा प्रत्ययनिमित्तमिति, न सिद्धं प्रत्यभिज्ञा प्रत्ययनिमित्तमिति, प्रसिद्धं प्रत्यभिज्ञा प्रत्ययनिमित्तमिति, अत्र सिद्ध प्रत्यभिज्ञा प्रत्ययनिमित्तमिति पाठषट्कं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठपञ्चकन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—प्रत्यभिज्ञा प्रत्ययनिमित्तमिति, प्रत्यभिज्ञा प्रत्ययनिमितमिति, तत्रावश्याभ्युपगन्तव्यमिति, तत्रावस्थाभ्युपगन्तव्यमित्ति, तत्रावश्याभ्यपं गन्तव्यमिति पाठपञ्चकं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युक्तः । इतरस्मिन् पाठत्रिकेऽपि प्रथमपाठ एव युक्तः, अर्थसंगतेः । द्वितीयतृतीयपाठौ तु शब्दाशुद्ध्याऽयुक्तौ ।

एतदग्रे—सर्वमपेक्ष्यते इति, सर्वं वक्षते इति, संबन्धमपेक्ष्यते इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । अन्यत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—जातिं विशेषं वा इति, जातिविशेषं वा इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, वा शब्दार्थानुरोधात् । क्वचित्तु वा शब्दोऽत्र न दृश्यते । तत्तु न युक्तम् कारिकायां विशेषो वाऽपि इति वाशब्ददर्शनात् । क्वचित्तु विशेषपदे विभक्तिर्न दृश्यते । सोऽपि पाठो न युक्तः, अपरिनिष्टितत्वात् ।

एतदग्रे – सर्वे जात्यभिधायिन इति, सर्वं जात्यभिधायिन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—इति जात्यभिधान इति, इति जात्यभिधानव्याप्तिमिति, इति जात्यभिधानव्याप्ति इति पाठत्रयं दृश्यते । तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः, अन्यत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—इत्थञ्च इति, एवञ्च इति, द्रव्यञ्च इति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं युक्तम्, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे – इत्येकैव इति, इत्यवे इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—शब्दानां प्रवृत्तिरिति, शब्दानां प्रवृत्ति इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तु अविभक्तिकत्वेन शब्दाशुद्ध्याऽयुक्तः ।

द्रव्यधर्मापदार्थे तु—१३

इति कारिकाया अवतरणिकायां हेलाराजीये – दर्शनान्तरेऽपि इति, दर्शनान्तरेऽपि इति पाठद्वयं दृश्यते । तत्राद्यपाठो न युक्तः । शब्दाशुद्धेः, द्वितीयपाठस्तु युक्तः, शब्दशुद्धेरर्थसंगतेश्च ।

एतदग्रे—शब्दव्यापाराश्रयण एव इति, शब्दव्यापाराश्रयेणैव इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे - व्याप्तिसिद्धिरिति, व्याप्तिप्रसिद्धिरिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

प्रकृतकारिकायाः प्रथमे पादे—द्रव्यधर्मा पदार्थे तु इति, द्रव्यधर्मपदार्थे तु इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, द्रव्यधर्मा सर्वोऽर्थ उच्यते इति हेलाराजीये तद् व्याख्यादर्शनात् ।

अत्रैव – द्रव्यधर्मापदार्थे तु इति, द्रव्यधर्मा पदार्थेन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, ।हेलाराजीये न केवलं मयैव जातिपदार्थवादिना इत्यादि व्याख्यानुरोधात् । अतएव द्वितीयपाठो न युक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्या एव कारिकाया द्वितीये पादे—द्रव्ये सर्वोऽर्थं इति, द्रव्यो सर्वोऽर्थं इति पाठद्वयं दृश्यते तत्राद्यपाठ एव युक्तः। हेलाराजीये द्रव्ये अपि पदार्थे इति तद् व्याख्या दर्शनात्। द्वितीयपाठस्तु अतएव न युक्तः, शब्दाशुद्धेश्च।

अत्रैव—सर्वोऽर्थं इति, सर्वार्थं इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अस्या एव कारिकायास्तृतीये पादे—द्रव्यधर्माश्रयाद् द्रव्यमिति, द्रव्याश्रया द्रव्यम् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः हेलाराजीये द्रव्यधर्माणामाश्रयणात् इति तद् व्याख्या दर्शनात्।

अस्या एव कारिकायाश्चतुर्थे पादे—सर्वोऽर्थं इति, सर्वार्थं इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—यिष्यते इति, इष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, शब्दाशुद्धेः। द्वितीयपाठस्तु युक्तः, शब्दशुद्धेरर्थसंगतेश्च।

एतत्कारिकाव्याख्याने हेलाराजीये—न केवलं मयैव इति, नकेवलं जमयौव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—जातिपदार्थवादिनैतदङ्गीकृतमिति, जातिपदार्थवादितो तदङ्गीकृतमिति, जातिपदार्थवादिः नौतदङ्गीकृतमिति, जातिपदार्थवादिनैतङ्गाकृत्तमिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। इतरत् तु पाठत्रयं शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—सर्वोऽर्थो जातिरिति, सर्वार्थो जाति इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—यावता द्रव्ये अपि इति, यावद् द्रव्ये अपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, यावता इत्यस्य येन हेतुना इत्यर्थकतयाऽर्थासंगतेः, अग्रे तावता इत्यस्यानुक्तेश्च। द्वितीयपाठस्तु युक्तः, अर्थसंगतेः। यावदित्यस्य हि अत्र किं तर्हि इत्यर्थः।

एतदग्रे—द्रव्यधर्मो इति, द्रव्यं धर्मा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—सर्वोऽर्थं इति, सर्वार्थं इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—सर्वोऽर्थं इष्यते इति, सर्वार्थं इष्यते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—भवतीत्यर्थं इति, भवती इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—द्रव्यवादिनाऽपि इति, द्रव्यवाचिनाऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अभ्युपेतव्यं व्याप्तिसिद्धये इति, अभ्युपेतव्यव्याप्तिसिद्धये इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—व्याप्तिसिद्धये इत्यस्य स्थाने व्याप्तिसिद्धेन इत्ययं पाठ उपलभ्यते। सोऽपि न युक्तः, अर्थासंगतेः।

एतदग्रे—द्रव्यधर्मयुक्त एवेति, द्रव्यधर्मप्रक्रमयुक्त एवेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यथा तव इति, यथा च तव इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः; द्वितीयपाठे चकारो वाक्यालंकारे।

एतदग्रे—द्रव्यवादिन इति, द्रव्यवाचिन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः,।

एतदग्रे—केचिदेव इति, के चिच्छेव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः,।

एतदग्रे—शब्दा इति, शब्द इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—मुख्यद्रव्याभिधायिन इति, मुख्या द्रव्याभिधायिन इति, मुख्यद्रव्यवाचिन इति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठावेव युक्तौ, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तदन्ये तूपचरितद्रव्याभिधायिन इति, तदन्यत्तूपचरितद्रव्याभिधायिन इति, तदन्यतूपचरितद्रव्याभिधायिन इति, तदन्ये तूपचरितद्रव्याकाराभिधायिन इति पाठचतुष्टयं दृश्यते। तत्राद्यचतुर्थपाठावेव युक्तौ अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तौ।

एतदग्रे—ममापि जातिवादिन इति, ममापि जातिवादिनीम् इति, ममापि जातिवाचिन इति, पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः। जातिवाचित्वं हि जातिविषयक शक्तिमत्त्वं तच्च शब्दे एव प्रसिद्धम्, न तु मानवे इति।

एतदग्रे—मुख्यां जातिमिति, मुख्या जातिमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

एतदग्रे—अभिदधति इति, अभिदधीते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—इति केचिदिति, इति कंदुप इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—मतद्वयेऽपि इति, मभिद्वयेऽपि इति, मतद्वयमिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, अन्यत्पाठद्वयन्तुअर्थासंगत्याऽयुक्तम्।

एतदग्रे—साम्यम् इति, साम्यं न इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, वस्तुतस्तु द्वितीयपाठोऽपि युक्तः। शब्दानां मतद्वयेऽपि जातिबोधकत्वमादाय शक्त्या लक्षणया वा वृत्तिभेदेन जातिबोधकत्वे वैषम्यात्।

एतदग्रे—तत्र द्रव्यधर्मा इति, द्रव्यधर्मास्तत्र इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—प्रत्यवमर्शयोग्यत्वमिति, प्रत्यवमर्शयोग्यत्व इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति नपुंसकत्वस्यैवौचित्यात्। अतएव द्वितीयपाठोऽयुक्तः।

एतदग्रे—परिनिष्पन्नता इति, परिनिष्पन्ना इति, परिनिष्पं नाना इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—लिङ्गं संख्यायोगश्चेति, लिङ्गसंख्यायोगश्चेति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

अत्रैव—लिङ्गसंख्यायोगश्चेत्येवमादय इति, लिङ्गसंख्यायोगश्चेवमादय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—शुक्लादिगुणेष्वप्यन्यारोपादिति, शुक्लादिगुणेष्वप्यध्यारोपादिति, शुक्लादिगुणरवध्यारोपादिति, शुक्लादिगुणेभ्यध्यारोपादिति पाठचतुष्टयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयचतुर्थपाठौतु शब्दाशुद्ध्याऽयुक्तौ।

एतदग्रे—तेऽपि द्रव्यस्येव धर्मोयेषामिति, तेऽपि धर्मो येषामिति, तेऽपि द्रव्यस्येव धर्मायेषामिति, तेऽपि द्रव्यस्यैव धर्मो येषामिति पाठचतुष्टयं दृश्यते। तत्र प्रथमतृतीयपाठावेव अर्थसंगत्या युक्तौ। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। चतुर्थपाठोऽपि अर्थासंगत्याऽयुक्तः न हि द्रव्यस्यैव धर्माः गुणादीनां संभवन्ति। गुणादीनां द्रव्यतो भेदात्।

एतदग्रे—द्रव्यधर्माणः इति द्रव्यधर्मण इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—स्त्री पुं नपुंसकानि इति, स्त्री पुं नपुसकानि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—तथैकत्वादयश्चेत्यादिभिरिति, तथैकत्वादिभिरिति पाठद्वयं दृश्यते। तत्र पाठद्वयमपि युक्तम्, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—प्रत्याय्यमाना इति, प्रत्याय्युमाना इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—न गुणादय इति, गुणादय इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः, प्रथमपाठस्तु नञ् घटितः, अर्थासंगत्याऽयुक्तः।

एतदग्रे—द्रव्यधर्माण इति, तद् द्रव्यधर्माण इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु तच्छब्दार्थासंगतिः।

अत्रैव—द्रव्यधर्माणाः इति पाठोऽपि क्वाचिद् दृश्यते। स तु असंगतः। शब्दाशुद्धेः।

एतदग्रे—अवभासन्ते इति, अवभासते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च, द्वितीयपाटस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सर्वोऽर्थ इति, सर्वार्थं इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदग्रे—द्रव्यरूपेणाभिधीयते इति, द्रव्येऽभिधीयते इति, द्रव्यं रूपेणाभिधायते इति, द्रव्यरूपेणाभिधीयत इति, पाठचतुष्टय्यं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः तृतीय पाठस्तु शब्दाशुद्धयाऽयुक्तः। चतुर्थपाठोऽपि शब्दाशुद्धयाऽयुक्तः।

अनुप्रवृत्ति धर्मो वा—१४

इति कारिकाया अवतरिणिकायां हेलाराजीये—एवं शब्दव्यापाराश्रयेण व्याप्तिरुपपादिता इति, एवं व्याप्तिरुपपादिता शब्दव्यापाराश्रयेण इति पाठद्वयं दृश्यते। तदुभयमापि साधु, अर्थसंगतेः।

एतदग्रे—वैशेषिकदृष्ट्या इति, वैशेषीकदृष्ट्वा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अप्यर्थगतसमानधर्माश्रयेण इति पदार्थकाव्याप्तसमानधर्माश्रयेण इति पाटद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्याः कारिकायाः प्रथमे पादे—अनुप्रवृत्तिधर्मो वा इति, अनुप्रवृत्तधर्मो वा इति अनुपरतिधर्मो वा इति पाठत्रयं दृश्यते। अनुप्रवृत्तिधर्मा वा इत्यपि पाठः क्वचिद् दृश्यते।

अत्र पाठचतुष्टये—आद्यपाठ एव युक्तः, अनुप्रवृत्तिरूपो धर्म इति कर्मधारयेऽर्थसंगतेः। व्याख्यातश्च हेलाराजीये—जातीनामेतज्जातित्वं येयं स्वाश्रयानुवृत्तिः सर्वजातीनां साधारणो धर्मः इति। इतरत्तु पाठत्रयं शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्या एव कारिकाया द्वितीये पादे—जातिः स्यात् सर्वजातिषु इति, जातिस्यात्सर्वजातिषु इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, शब्दशुद्धेः तदभावाद् द्वितीयपाठो न युक्तः ।

अस्या एव कारिकाया उत्तरार्धे—व्यावृत्तिधर्मसामान्यं विशेषे जातिरिष्यते इति, व्यावृत्तिधर्मोऽसामान्यं विशेषे जातिरिष्यते इति, व्यावृत्तिधर्मः सामान्यं विशेषे जातिरिष्यते इति, व्यावृत्तिधर्मोऽसामान्यविशेषो जातिरिष्यते इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, व्यावृत्तिधर्मरूपं सामान्यमिति कर्मधारयेऽर्थसंगतेः । तृतीयपाठोऽपि अर्थसंगतया युक्त एव । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतद्व्याख्याने हेलाराजीये—जातीनामेतज्जातित्वमिति, जातीनामतज्जातित्वमिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--स्वाश्रयानुवृत्तिरिति, स्वाश्रयानुवृत्तिरिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु स्वाश्रयानु वरणार्थेऽत्र प्रयुक्त इत्यर्थासंगत्याऽयुक्तः ।

एतदग्रे--सादृश्यादभेदेन इति, सादृश्याभेदेन इति पाठद्वयं-दृश्यते । एतत्पाठद्वयमपि अर्थासंगत्याऽयुक्तम् । अतः सादृश्याद् भेदेन इति पाठो युक्तः ।

एतदग्रे—परामृष्टा इति, परमषा इति, परामृशती इति, परामृसती इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठत्रयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम् ।

एतदग्रे—स्वव्यक्तीरिति, स्वव्यक्तिरिति, सव्यक्तिरिति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तः । तृतीयपाठोऽपि अतएवायुक्तः । स्वव्यक्ता इति चतुर्थपाठोऽपि क्वचिद् दृश्यते । सोऽपि शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे--उपलक्षणं चैष इति, उपलक्षण चैष इति, उपलक्षणं चैव इति, उपलक्षणं चैव्य इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठत्रयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम् ।

एतदग्रे—धर्मः इति, धर्म इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च । द्वितीयपाठे तु विभक्त्यभावेन शब्दाशुद्धिः ।

एतदग्रे--तेन इति, नैन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—तद्रूपमाभाति इति, तद्रूपमाज्ञाति इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--स्वानुरूपाभिधानहेतुत्वमिति, स्वानुरूपाभिधाहेतुत्वमिति पाठद्वयं दृश्यते। स्वानुरूपाभिधानं हेतुत्वमिति तृतीयपाठोऽपि क्वचिद् दृश्यते। तत्राद्यपाठ एव युक्त:, अर्थसंगते:। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि अभिधाया: शक्तिरूपाया: कश्चनहेतु:, अनादित्वेन नित्यत्वात्।

एतदग्रे--तद्रूपाभिधानवाच्यं भवति इति, तद्रूपाभिधानवाच्यभवति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते:, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त:।

एतदग्रे--प्रत्याश्रयं च इति, प्रत्ययाश्रयं चेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त:, अर्थसंगते:, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त::। अत्रैव प्रत्याश्रयं व इति पाठो दृश्यते। स तु शब्दाशुद्धय्याऽयुक्त:।

एतदग्रे-- परिसमाप्तिरिति, समाप्तिरिति पाठद्वयं दृश्यते। तदुयमपि साधु, अर्थसंगते:।

एतदग्रे--यदि हि इति, यदि इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगते:। अत्र हि शब्दो वाक्यालंकारे।

एतदग्रे—जातिर्वर्तेत इति, जातिवर्तेत इति, जातिवर्त्तेत इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगते:, शब्दशुद्धेश्च। अन्यत्पाठद्वयं तु शब्दाशुद्धयाऽयुक्तम्।

एतदग्रे—भागश एवेति, भाग एवेतिपाठद्वयं दृश्यते। तदुभयमपि साधु-अर्थसंगते:।

एतदग्रे--संपूर्णश्च इति, समर्णश्चेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त:, अर्थसंगते:, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्त:।

एतदग्रे—विषाणाद्यवयवदर्शनेऽपि इति, विषाणाद्युवयवदर्शनेऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युवत:, अर्थसंगते:, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्त:।

एतदग्रे—झटिति गोत्वाकार: प्रत्यय: प्रसूयते इति, झटिति प्रत्यय: प्रसूयते इति, झटिति गोत्वाकारा प्रात्यय: प्रसूयते इति, झटिति गोत्वाकारप्रत्ययप्रसूयते इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्त:, अर्थसंगते: शब्दशुद्धेश्च। द्वितीयपाठस्तु अपरिसमाप्तत्वेन साकांक्ष इत्ययुक्त:। अन्यत्पाठद्वयं तु शब्दाशुद्धयाऽयुक्तम्।

एतदग्रे– प्रत्याश्रयपरिसमाप्ता इति, प्राप्ताश्रयपरिसमाप्ता इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त;, अर्थसंगते:, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त:।

एतदग्रे—प्रतिद्रव्यं भिन्ना इति, प्रतिद्रव्यभिन्ना इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त:, अर्थसंगते: शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्त:, अव्ययीभावेन सह समासस्यासाधुत्वात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव--प्रतिद्रव्यं भिन्नजातिस्तु इति पाठोऽपि क्वचिद् दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

अत्रैव—जातिस्त्वेकैव इति, जातिस्त्वे चेत्येव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव शब्दार्थशुद्ध्या युक्तः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अत्रैव--जातिस्त्वेकैवेत्यप्येवमादाय इति पाठोऽपि क्वचिद् दृश्यते। तत्र अपि शब्दस्य वैयर्थ्येन स पाठोऽयुक्तः।

एतदग्रे—असाधारणा इति, असाधारणम् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थाऽसंगत्याऽयुक्तः।

अत्रैव—धर्मा वाच्या इति, धर्मवाच्या इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थान्तरप्रतीत्याऽयुक्तः।

एतदग्रे—सर्वाव्यक्तीरिति, सर्वं व्यक्तिरिति, सर्वा व्यक्ता इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—व्यक्तीर्व्याप्नोति इति, व्यक्तीर्व्याप्नोति एव इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—तथा धर्मा इति, तथैते धर्मा इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। पूर्वं हि—एवमादयोऽसाधारणा धर्मा वाच्या इत्युक्तम्। तेनापि अस्यैव युक्तत्वं प्रतीयते। अतएव प्रथमपाठो न युक्तः।

एतदग्रे—सर्वा व्यक्तीरिति, ससर्वव्यक्तीरिति, सर्व व्यक्तीरिति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ, अर्थसंगतेः। द्वितीयपाठे तु स इत्यधिकम्।

एतदग्रे—सर्वा जातिरिति, सर्वजाति इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—व्याप्नुवन्तीति, व्याप्नुवन्तोऽप्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—तुल्यरूपत्वाज्जातिकार्याय इति, तुल्यरूपत्वाजातिकार्याय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—कल्पन्ते इति, कल्पते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, तथैते धर्मा इति कर्तरिबहुवचनदर्शनात्। अतएव द्वितीयपाठोऽयुक्तः।

एतदग्रे—एवमिति, एव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सर्व एव विशेषा इति, सर्वविशेषा इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सामान्यानि स्युरिति, सामान्यस्य इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्युर्न विशेषा इति, स्युर्निविशेषा इति, स्युर्न विशेष इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु विधेयसमानविभक्तिकत्वस्य निषेध्ये औचित्यान्न युक्तः, विधेये हि सामान्यानि इति बहुवचनं श्रूयते।

क्वचित्तु—स्युर्न विशेषणमिति पाठोऽपि दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः, अप्रसक्तप्रतिषेधात्।

एतदग्रे—व्यावृत्तिः सामान्यसम इति, व्यावृत्ति सामान्यसम इति, व्यावृत्तिसामान्यक्षम इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—भवंस्तेषु इति, भवस्तेषु इति, भावास्तेषु इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—नन्वेवमिति, नन्वेत्र इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सास्ना इति, सास्रा इति, स्वाम्ना इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे-लाङ्गूलखुरककुदविषाणाद्यवयवसंबन्धस्येति, लाङ्गूदककुदखुरविषाणाद्यवयवसंबन्धस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्रैव—कक्कुट इति, ककुद इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः, शब्दाशुद्धेश्च। द्वितीयपाठस्तु शब्दशुद्ध्याऽर्थसंगत्या च युक्तः।

एतदग्रे—साधारणत्वात् इति, साधारणात् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तदेवमिति, सैव इति, मैवमिति पाठत्रयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—उपलभ्यमानः मैवम् इति पाठस्तु युक्त एव।

एतदग्रे—साम्नादिमत्त्वेन इति, सास्नादिमत्त्वेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः, द्वितीयपाठस्तु अर्थसंगत्या युक्तः।

एतदग्रे—सास्नादिमानित्यादि प्रत्यय इति, सास्नादिमानित्यादिः प्रत्यय इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—न तु गौगौरिति, किन्तु गौगौरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अनुरूपं हि कार्यमिति, अनुरूपकार्यं हि इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—दण्डीति इति, दण्डिति, दण्डाति इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम् ।

एतदग्रे—प्रत्यये इति, प्रत्ययो इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—यद्येवमिति यथैवमिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः; अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अनुप्रवृत्तावपि इति, अनुवृत्त्याऽपि इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—युक्त इत्यतः, प्राक् गाययोरिति पाठो दृश्यते । स तु संपातायातः प्रकृतानुपयुक्तोऽशुद्धश्च ।

एतदग्रे—युक्तः व्यावृत्त्या इति, युक्तं व्यावृत्त्या इति, युक्तव्यावृत्त्या इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम् । युक्तः । व्यावृत्ता इति पाठचतुर्थोऽपि क्वचिद्दृश्यते । सोऽपि अर्थासंगत्याऽयुक्तः ।

एतदग्रे—विशेषो विशेष इति, विशेषा विशेषा इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—नैतदेवम् इति, नैतदे इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—दत्र सदृशा इति, दत्त सदृशा इति, दशद्दश इति, द्यमदशा इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठ एव युक्तः अर्थसंगतेः । गत्यन्तराभावादत्र सदृशा इति हि पाठाकारः स च युक्त एव । इतरत्पाठत्रयं तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम् ।

एतदग्रे—एव धर्मा जातिरिति, धर्मरूपाजातिरिति, धर्मोजातिरिति, सदृशायवधर्मो जातिरिति, यत्र धर्मो जातिरिति, एव धर्मा जातिः कल्पते इति, एव धर्मजातिः कल्प्यते इति । पाठा दृश्यन्ते तत्र प्रथमः पाठः षष्ठपाठश्च युक्तः, अर्थसंगतेः । इतरे पाठा अर्थासंगत्याऽयुक्ताः । कल्प्यते इति पाठे कर्तुरनुक्तिः । कल्पते इत्यस्य स्थाने क्वचित् कथ्यते इति पाठोऽपि दृश्यते । सोऽपि युक्त एव अर्थसंगतेः ।

एतदग्रे—मुख्ये जातिमत्वे इति, मुख्यजातिमत्वे इति, मुख्ये जातिमत्वमिति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं युक्तम्, अर्थसंगतेः, तृतीयस्तु पाठोऽर्थासंगत्याऽयुक्तः ।

एतदग्रे—बाधकोपपत्तेरिति, बाधकोपत्तेरिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तथा हि इति, तथा इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—सामान्येष्वपरसामान्यसमवाये इति, सामान्ये चापरसामान्यसमवाये इति, सामान्यष्वपरसामान्यसमवायें इति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयमेव युक्तम्, अर्थसंगतेः, तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—अपरसामान्यसमवायेऽनवस्थादि इति, अपरसामान्यसमवायेनादिवस्थादि इति पाठद्वयं दृश्यते । अपरसामान्यसमवायेन स्थादि इति तृतीयपाठोऽपि क्वचिद् दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । अन्यत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम् ।

एतदग्रे—अन्यत्र निर्णीतमिति, अन्यत् निर्णीतमिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे—नित्यद्रव्यवृत्तिषु इति, नित्यद्रव्यावृत्तिषु इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, विशेषाणां नित्यद्रव्यवृत्तित्वेनार्थसंगतेः । अतएव द्वितीयपाठो न युक्तः, अर्थासंगतेः ।

एतदग्रे—व्यावृत्तिप्रत्ययजनकेषु इति, व्यावृत्तप्रत्ययजनकेषु इति पाठद्वयं दृश्यते । तदुभयमपि साधु, षष्ठीतत्पुरुषाभ्युपगमेनार्थसंगतेः । व्यावृतिप्रत्ययजनकेषु इति पाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—संशयापनोदाय इति, संशयाय इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । संशयापनोदनाय इति तृतीयपाठस्तु युक्त एव, अर्थसंगतेः । संपर्यपनोदाय इति पाठस्तु अर्थासंगत्याऽयुक्तः । संशयापतोदाय इति पाठोऽपि अयुक्त एव अर्थासंगतेः ।

एतदग्रे—विशेषान्तरकल्पेन इति, विशेषानन्तरकल्पने इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—तेषामपि सामान्यसमवाये इति, तेषामितरसामान्यसमवाये इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे--विशेषान्तराभ्युपगमेऽनवस्थाप्रसङ्गः इति, विशेषान्तराभ्युपगमेऽवस्थाप्रसङ्ग इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । विशेषान्तराभ्युपगमे प्रसङ्ग इति पाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--निः सामान्य इति, निः सामान्ये इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, विशेषविशेषणत्वेनार्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे--इत्यन्यत्र इति, इति वाऽन्यत्र इति, इत्यत्र इति पाठत्रयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु वा शब्दस्य वैयर्थ्यम्, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--विस्तरेणोक्तम् इति, विस्तरेणोक्त इति पाठद्वयं दृश्यते । तत्राद्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाठ एव युक्तः, सामान्ये नपुंसकत्वस्यौचित्यात्, द्वितीयपाठस्तु सविसर्गो निर्विसर्गो वाऽयुक्तः।

एतदग्रे--गोपिण्डेषु तु सामान्याभ्युपगमे इति, गोपिण्डेषु सामान्याभ्युपगमे इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे--न किञ्चिदिति, न कीचिदिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे--तत्र न इति, न तत्र इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे--निमित्तं परिकल्प्यमिति, निमित्तपरिकल्यप्थमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्त इति।

एतदग्रे--तदेवं यत्र इति, तदेवं त्र इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे--प्रमाणबाधाऽस्ति इति, प्रमाणबाधोऽस्ति इति पाठद्वयं दृश्यते। तदुभयमपि साधु, शब्दशुद्धेरर्थसंगतेश्च।

एतदग्रे--सदृशधर्मरूपाजातिरिति, सदृशरूपाजातिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः सादृश्यप्रतियोगिनोऽनुक्तेः।

एतदग्रे- तथा चाभावेष्वपि इति, तथा च भावेष्त्रपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु--भावत्वापत्तेरिति वक्ष्यमाणग्रन्थासंगतिः।

अत्रैव--तथा चावेद्यापि इति, तथा चाभावेष्वधि इति, अपरमपि पाठद्वयमत्रोपलभ्यते। तदुभयमपि असाधु, अर्थासंगतेः।

एतदग्रे—अभवनात्मकधर्मसामान्यादिति, अभवनात्मकधर्मसाम्यादिति, अभावनात्मकधर्मसामान्यादिति, अभावात्मकधर्मसामान्यादिति, पाठचतुष्टयं दृश्यते। तत्राद्यंपाठद्वयं युक्तम्, अर्थसंगतेः। अन्यत्तु पाठद्वयमर्थासंगत्याऽयुक्तम्।

एतदग्रे—अन्वयिप्रत्ययविषयता इति, अन्वप्तिप्रत्ययविषयता इति, अन्वियिप्रत्ययविषयता इति, अन्वयिप्रत्ययविषयतयेति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः, तृतीयपाठोऽपि शब्दाशुद्धचैवायुक्तः, चतुर्थपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सैव तत्रापि इति, सैव तवापि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

संयोगि धर्मभेदेन—१५

इति कारिकाया अवतरणिकायां हेलाराजीये—कालाकाशदिशामिति, रालाकाशदिशामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—नित्यत्वेनावस्थाभेदाभावाच्चेति, नित्यत्वेनापस्थाभेदाभावां च्चेति, पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—कथं जातिरिति, तथं जातिरिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

अस्याः कारिकायाः प्रथमे पादे—संयोगिधर्मभेदेन इति, संयोनी। धर्मभेदेन इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धया-ऽयुक्तः ।

अस्या एव कारिकाया द्वितीयेपादे—परिकल्पिते इति, मरिकल्पिते इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धया-ऽयुक्तः ।

अस्या एव कारिकायास्तृतीये पादे--तेषु इति, तिषु इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

अस्या एव कारिकायाश्चतुर्थे पादे—विद्यते इति, विद्यतेरिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । शब्दा-शुद्धिस्तु नात्र श्तिपाऽस्य रूपस्य सिद्धेः ।

एतत्कारिकाव्याख्याने हेलाराजीये--यथा सामान्यविशेषाणामिति, यथा सामान्यविशेषणामिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीय-पाठस्तु विशेष्यानिर्देशादयुक्तः ।

एतदग्रे—अन्वयिधर्मोपाधिरभेदः इति, अन्वयिधर्मोपाधिभेदे इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—संयोगोपाधिर्भेद इति, संयोगोपाधिभेद इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु समासे उद्देश्यविधेयभावान-वगमादयुक्तः । अत्र हि आकाशभेदे संयोगोपाधित्वं विधीयते इति ।

एतदग्रे—इति प्रकृतापेक्ष इति । प्रतिप्रकृतापेक्ष इति पाठद्वयं दृश्यते । तत्राद्यपाठ एवयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

अत्रैव—प्रकृतापेक्ष इति, प्राकृतापेक्ष इति, कृताक्षेप इति, कृतापेक्षा इति, प्रकृतापेक्षा इति पाठपञ्चकं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, इतरे पाठास्तु अर्थासंगत्याऽयुक्ताः ।

एतदग्रे--संयोगो विद्यते इति, संयोगो विद्य ते इति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—येषामिति, तेषामिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, ते संयोगिन इत्यग्रे तत्पदप्रयोगदर्शनात् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—आकाशाधिकरणानां घटादीनामिति, आकाशाधिकरणानां रथादीनामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—मूर्तानामधिकरणमिति, मूतानामधिकरणमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः।

एतदग्रे—अवकाशदानादिति, आवकाशदानादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयायुक्तः।

अत्रैव-अवकाशदानाद्धि इति, अवकाशदानादि इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽयुक्तः, अर्थासंगतेः। द्वितीयपाठस्तु अर्थसंगत्याऽयुक्तः।

एतदग्रे—मूर्तास्तु इति, पतास्तु इति, पूर्तस्तु इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीयपाठस्तु अर्थासंगत्याशब्दाशुद्धया चायुक्तः।

एतदग्रे—भावा इति, भाव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, न तेऽवकाशदायिन इति अग्रे तत्पदेन बहुवचनान्तेन परामर्शात्।

एतदग्रे—परस्परं प्रतिबन्धका इति, परस्परप्रतिबन्धका इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, परस्परमुद्दिश्य प्रतिबन्धकत्वस्य विधेयत्वात्। समासे च एकार्थीभावेन उद्देश्यविधेयभावानवगमात्।

अत्रैव--परस्परं प्रतिबन्धका इति, परस्परं निवन्धका इति, परस्परं हि विबन्धका इति, परस्परं विबन्धका इति पाठचतुष्टयं दृश्यते। तत्राद्य पाठो युक्तः।

एतदग्रे--न तेऽवकाशदायिन इति, न तेष्कादायिन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्रैव--न तेऽवकाशदायिनामिति तृतीयपाठोऽपि दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—संयोगिनां धर्मभेदः इति, संयोगिनां धर्मयोग इति पाठद्वयं दृश्यते। तत्राद्यपाठ एक युक्तः कारिकायाः अस्याः प्रथमे पादे संयोगिधर्मभेदेन इत्युक्तेः।

एतदग्रे—प्रत्यक्षादिप्रमाणसिद्धमिति, प्रत्यक्षादिप्रमाणासिद्धमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--तद् वशाद्वा इति, यद्वशाद्वा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अग्रे तच्छब्देन परामर्शाभावादयुक्तः।

एतदग्रे—परिमितदेशवृत्तित्वमिति, परिमितदशवृत्तित्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः,।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—यत्र हि इति, यत्रे हि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—भवत्याकाशस्येति, भवत्वाकाशस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्यवहारानुरोधेन सिद्धवन्निर्देशस्यौचित्यात्। लोटः प्रयोगे तु आकाशस्यानेकप्रदेशभवनमाशास्यमसिद्धश्च।

एतदग्रे—कार्यं प्रति इति, कार्य प्रति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—मूर्तिपरिच्छिन्नवस्तुवृत्तिरिति, मूर्तिपरिच्छिन्नं वस्तुवृत्तिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। मूर्तिपरिच्छिन्नं वस्तुवृत्ति इति पाठोऽपि क्वचिद् दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः। मूर्तिपरिच्छिन्न वस्तुवृत्ति इति पाठोऽपि अयुक्त एव। संयोगस्य पुंस्त्वेन तद्विशेषणस्यास्य पुंस्त्वौचित्यात्।

एतदग्रे—सर्वदा इति, सदा इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदग्रे—संयोगस्य इति, संयोगिस्य इति, नियतदेशतया इति, नियतवेशेतया इति, संयोगिनोऽपि नियतदेशवृत्तय इति, संयोगिनो नियतदेशवृत्तय इति, नियतदेशवृत्तय इति, नियतदेशवत्तय इति, आकाशस्य भेदो इति, आकाशस्य देश भेदो इति पाठाः समुपलभ्यन्ते।

तत्र प्रथमद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। द्वितीये द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। तृतीये द्विके—उभयमपि साधु, अर्थसंगतेः। चतुर्थे द्विकेऽपि प्रथमः साधुः अर्थसंगतेः। पञ्चमेद्विके उभयंसाधु।

एतदग्रे—न स्वत इति, न स्वता इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—देशे च इति, देशं च इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः। परिकल्पिते इति, वरिकल्पिते इति पाठद्वयमपि अत्र दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—प्रत्ययाप्रवृत्तिलक्षणमिति, प्रत्ययानुवृत्तिलक्षणमिति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अभिन्नाभिधानप्रत्ययाप्रवृत्त्या आकाशसामान्यस्य अलक्षणीयत्वात्। अतो द्वितीयपाठ एवार्थसंगत्या युक्तः।

एतदग्रे—आकाशसामान्यमिति सामान्यमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—आकाशसामान्यमाकाशशब्दगोचरोऽस्ति इति, आकाशसामान्यः गाकाशस्य शब्द गोचरोऽस्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्रैव—आकाशपदं गोचरोऽस्ति इति पाठोऽपि क्वचिल्लभ्यते। स तु अयुक्तः, अर्थासंगतेः। किन्तु यदि आकाशपदगोचरोऽस्ति इति पाठः स्यात्, तदा समुचितः स्यात्।

एतदग्रे—एवमिति, एव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—समानन्यायत्वादिति, सामान्यादिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—उपवर्णनीयमिति, उपवर्णतीयमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—युधिष्ठिरादिसंयोगवशेन भेदे सत्यभिन्नं कालसामान्यं कालशब्दवाच्यमस्ति। एवं मेरुं प्रदक्षिणमावर्तमानस्य इति, युधिष्ठिरादि......मावर्तमानस्य इति पाठद्वयं दृश्यते। तत्राद्यपाठः पूर्णं इति उपादेयः, द्वितीयपाठस्तु त्रुटित इत्युपेक्षितव्यः।

युधिष्ठिरादिसंयोगवशेन इत्यस्याग्रे—भेदे सत्यभिन्नमिति, भेदेनाभिन्नमिति, पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। द्वितीयपाठे भेदेन इति तृतीयान्तस्य कालशब्दवाच्यमित्यत्रान्वयः। अत्र च कालपदं कालविशेषपरं बोध्यम्।

एतदग्रे—कालसामान्यमिति, कलि सामान्यमिति, कालसामान्यस्यापि इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे—कालशब्दवाच्यमस्ति इति, शब्दवाच्यमस्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दविशेषानुक्त्याऽयुक्तः। क्वचित्तु शब्दादि वाच्यमस्ति इति पाठोऽपि दृश्यते। सोऽपि आदिशब्दस्य वैयर्थ्येनायुक्तः।

एतदग्रे—मेरुं प्रदक्षिणमावर्तमानस्य इति, मेरोः प्रदक्षिणमावर्तमानस्येति पाठद्वयं दृश्यते। तत्राद्यपाठस्य युक्तत्वे न विप्रतिपत्तिः, अर्थसंगतेः। तत्र प्रदक्षिणमिति क्रियाविशेषणम्। मेरुमिति आवर्तनस्य कर्म। मेरोरिति पाठे तु नेदं संभवति इति अर्थासंगत्या स हेयः। प्रदक्षिणमित्यत्र संप्रदक्षिणमितिपाठस्तु न युक्तः। संपदस्य वैयर्थ्यात्।

अत्रैव—प्रदक्षिणमावर्तमानस्य इति, प्रदक्षिणं भ्रमत इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—(१) लोकपाल इति, लोकपाल इति, (२) गृहीतैरिति, ग्रहीतैरिति, परिगृहीतैरिति, (३) ये संयोगा इति, ते संयोगा इति, (४) दिशः संयोगे इति, दिशासंयोगे इति, (५) संयोगे इति, संयोगा इति, (६) सति इति, सन्ति इति पाठाः समुपलभ्यन्ते ।

(१) तत्राद्ये द्विके—आद्यपाठ एव युक्तः, सवितुरिति पूर्वत्र श्रुतस्य रेफस्य लकारोपरि दर्शनात् । (२) द्वितीये त्रिके—आद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । तृतीयपाठे तु परिशब्दवैयर्थ्यम् ।

(४) चतुर्थे द्विके तु—आद्यपाठ एव युक्तः, तदुपाधिना सूर्येण इति ग्रन्थेऽनाग्रे तस्य परामर्शात् । (५) पञ्चमे द्विके—आद्यपाठ एव युक्तः; सूर्येण इति पूर्वत्र सहार्थतृतीयान्तेन सह अस्य संबन्धात् । अतएव द्वितीयपाठोऽत्र न युक्तः ।

(६) षष्ठे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे—भेदेऽभिन्नमिति, भेदभिन्नमिति, भेदेन भिन्नमिति, भेदे भिन्नमिति, भदकमिति पाठाः ।

एतदग्रे—दिक् दिक् शब्दवाच्यमिति, दिक् सामान्यं दिक् शब्दवाच्यमिति पाठौ, ।

एतदग्रे—तत्रापि इति, क्रमा......अपि इति, तत्र इति पाठाः ।

तत्र प्रथमे पाठपञ्चके—आद्यपाठा एव चत्वारो युक्ताः, अर्थसंगतेः । पञ्चमस्तु पाठः शब्दाशुद्धयाऽयुक्तः ।

द्वितीये पाठद्विके—आद्यपाठो न युक्तः, समानाधिकरणयोर्द्वयोः समानलिङ्गकत्वस्यैवौचित्यात् ।

तृतीये पाठत्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु युक्त एव, अर्थसंगतेः ।

एतदग्रे—एवं संबन्धिभेदात् इति, एवं संबन्धिभिदात् इति, नानात्वोपचारे इति, नानोपचारे इति, रानात्वोपचरे इति, सर्वत्रेह इति सवित्रेह इति, बुद्धयनुवृत्तेर्जातिरिति, बुद्धावनुवृत्तेर्जातिरिति, बुध्यनुवृतिर्जातिरिति प्रकल्पनीया इति, परिकल्पनीयाइति इयन्तः पाठा उपलभ्यन्ते ।

तत्र प्रथमे पाठद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । द्वितीये पाठत्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त, तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । तृतीये पाठद्विके—आद्यपाठ एव युक्त अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः । चतुर्थे पाठत्रिके—आद्यौ पाठौ साधू, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः । पञ्चमे पाठद्विके-द्वयमपि साधु, अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—संयोगिदेशेनेति, संयोगदेशेन इति, संयोगिभेशेन इति पाठाः।

एतदग्रे—इह देशपरिकल्पः इति, देशपरिकल्प इति, देशः परिकल्प इति, देशः परिकल्प्य इति, दृशापरिकल्प इति, देशपरिकल्पनेन इति पाठाः।

एतदग्रे—तेन इति, केनेति पाठौ।

एतदग्रे—संयोगिनामितरेतराश्रयत्वमिति, संयोगिना इतरेतराश्रयत्वमिति, संयोगिनामाश्रयत्वमिति पाठाः।

एतदग्रे—इतरेतरव्यावृत्तिरूपतैव इति, इतरेतरव्यावृत्तिरूपान्तैव इति पाठौ।

एतदग्रे—रथादीनामिति, रव्यादीनामिति पाठौ।

एतदग्रे—प्रत्यक्षादिप्रमाणावसितरूपविरुद्धमिति पाठः।

इत्यतोऽग्रे—मूर्तत्वापरिच्छिन्न परिमाणत्वमिति, मूर्तत्वपरिछिन्नपरिमाणत्वमिति, पूर्वत्वात्परिच्छिन्नपरिमाणत्वमिति, मूर्तत्वात् परिछिन्नपरिमाणत्वमिति, मूर्तत्वापरिच्छिन्ने परिमाणत्वमिति, मूर्तत्वापरिच्छिन्नं परिमाणत्त्वमिति पाठाः।

एतदग्रे—कल्पितास्त्वाकाशदेशा इति, कल्पितात् स्वाकाशदेशा इति, कल्पिकास्वादेश इति, कल्पिता स्वाकाशदेशा इति पाठाः समुपलभ्यन्ते।

तत्र प्रथमेपाठत्रये—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

द्वितीये पाठषट्के—प्रथमः पाठो न युक्तः, इह शब्दस्यात्रानुपयोगात्। द्वितीय पाठस्तु युक्तः, अर्थसंगतेः तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः। चतुर्थपाठस्तु युक्तः, अर्थसंगतेः। पञ्चमपाठोऽपि अर्थासंगत्याऽयुक्तः। षष्ठपाठस्तु युक्त एव, किन्तु तस्मिन् पाठे—तेन इति, न पठनीयम्।

तृतीये पाठद्विके—तेन इति पाठो युक्तः, अर्थसंगतेः केन इति पाठस्तु अर्थासंगत्याऽयुक्तः।

चतुर्थे पाठत्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठोऽपि अर्थासंगत्यैवायुक्त इति।

पञ्चमे पाठद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

षष्ठेपाठद्विके—आद्यपाठो न युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। अतो रव्यादीनामिति पाठो युक्तः।

सप्तमे पाठक्रमे—प्रत्यक्षादिप्रमाणावसितरूपविरुद्धत्वमिति पाठः संपातायातः इति हेयः।

अष्टमे पाठषट्के—आद्यपाठो न युक्तः, रवेरपरिच्छिन्नपरिमाणत्वाभावात्। द्वितीयपाठस्तु समाहारद्वन्द्वे युक्तः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः। चतुर्थपाठस्तु अर्थसंगत्या साधुरेव। पञ्चमपाठस्तु अर्थासंगत्याऽयुक्तः। षष्ठपाठोऽपि न युक्तः, अर्थासंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नवमे पाठचतुष्टये—आद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः, चतुर्थपाठोऽपि अयुक्त एव अर्थासंगतेः।

एतदग्रे—संयोगिवस्तुगतां परिच्छिन्नदेशतामिति, संयोगि…देशतामिति। अत्रैव—संयोगि इति, संयोग इति, वस्तुगतामिति, वस्तुगतमिति, वस्तुगेति पाठाः समुपलभ्यन्ते। एषु पाठेषु आद्यपाठ एव युक्तः, अर्थसगतेः अन्ये तु पाठाः अर्थासंगत्या अयुक्ताः।

एतदग्रे—सामान्येन इति, सामान्यतया इति, सामान्यतथा इति पाठाः समुपलभ्यन्ते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—ह्याकाशदेशत्वे इति, आकाशदेशत्वे इति, पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—रथादीनामिति, रव्यादीनामिति पाठद्वयं दृश्यते। तत्राद्य पाठो न युक्तः, रथादीनामाकाशदेशत्वस्यासंभवात्। अतो द्वितीयपाठ एव युक्तः।

एतदग्रे—प्रत्यक्षादिप्रमाणावसितरूपविरुद्धं व्यापित्वमिति, प्रत्यक्षादिप्रमाणावसितरूपविरुद्धव्यापित्वमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—व्यापित्वमारोपयति इति, व्यापित्वमारोपितमिति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु युक्तः, अर्थसंगतेः।

अत्र पाठे हि आरोपितमिति निराकरणक्रियायाः कर्म इति न वाक्यभेदोऽपि। पूर्वपाठे तु स्यादेववाक्यभेदोदुरुद्धरः। व्यापित्वं सारोपयति इत्यपि पाठः क्वचिद् दृश्यते। स तु शब्दाशुद्धया दुरुद्धरयाऽत्यन्तमयुक्तः। सा इत्यस्य पृथक् करणे तु अर्थासंगतिः। एवम्—मारोपितेन इति पाठेऽपि अर्थासंगतिः।

एतदग्रे—परिमितत्वेन इति, परिमितत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, स्वगतेन इति विशेषणे तृतीयादर्शनात्।

एतदग्रे—आकाशस्य प्रदेशकल्पनया इति, आकाशप्रदेशकल्पनया इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—निराक्रियते इति, निराक्रियन्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, व्यापित्वमारोपितमिति कर्मणि एकवचनदर्शनात्।

एतदग्रे—स्वतो निरवयवस्य इति, यतो निरवयवस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अग्रे तत्पदेन परामर्शाभावादसंगतः।

एतदग्रे—देशभेदनिबन्धनं कार्यमिति, देशभेदनिबन्धनकार्यमिति पाठद्वयं दृश्यते। तत्रोभयमपि साधु-अर्थसंगतेः।

अत्रैव—कार्यं जातिप्रक्लृप्तिलक्षणमिति, कार्ये जातिप्रक्लृप्तिलक्षणमिति, कार्यजातिप्रक्लृप्तिलक्षणमिति पाठत्रयं समुपलभ्यते। तत्राद्यपाठ एव युक्तः,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कार्यस्य कुर्युरिति क्रियाकर्मत्वदर्शनात्, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—जातिप्रक्लृप्तिलक्षणमिति, जातिप्रकृतिलक्षणमिति, जातिप्रक्लृप्तिलक्षण इति, पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—जातिशब्दप्रवृत्तिलक्षणमिति, जातिप्रवृत्तिलक्षणमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, अर्थासंगतेः। न हि जातेर्निर्व्यापारायाः प्रवृत्तिलक्षणो व्यापारः संभवति।

अत्रैव—जातिशब्दप्रवृत्तिलक्षणं वा कुर्युः इति, जातिशब्दप्रवृत्तिलक्षणं कुर्युरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, कल्पभेदे वा शब्दपाठस्यौचित्यात्।

एतदग्रे—जातिरभिधीयेत इति, जातिरभिधीयेत् इति, जातिरभिधायेत इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च। द्वितीयपाठे तु शब्दाशुद्धिः, तृतीयपाठेऽपि शब्दाशुद्धिः।

एतदग्रे—अद्वैतदर्शने इति, अद्वैतदर्शनमिति, यथा सत्यत्वमिति, यथा सत्या इति, यथा समत्य इति, यथा असत्या इति पाठाः समुपलभ्यन्ते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः। तृतीयपाठः समुचितः, अर्थसंगतेः, चतुर्थपञ्चमषष्ठपाठास्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्ताः।

एतदग्रे—इहाकाशस्यापि इति, इहाप्याकाशस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठोऽपि अर्थसंगत्या साधुरेव इति।

एतदग्रे—व्यक्तीनामिति, व्यक्तिनामिति, व्यक्तानामिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—न व्यक्तीनामिति, व्यक्तीनेति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। पूर्वत्र परत्र वा नञः पाठेऽर्थभेदाभावात्।

आदेशानां घटादीनामिति ॥ १६ ।

कारिकाया अवतरणिकायां हेलाराजीये—मुख्या एवाकाशस्येति, मुख्याय वाकाशस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव साधुः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव कारिकायाः पूर्वार्धे घटादीनां देशा इति, घटादिनादेश इति;

द्वितीये पादे—देशाः सम्बन्धिनो यथा इति, देशादसंनिधिनो यथा, इति, देशस्य सम्बन्धिनो यथा इति पाठपञ्चकं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगतेरयुक्तः, छन्दोभङ्गाच्च। तृतीयपाठस्तु युक्तः, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्थ पाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः। पञ्चमपाठस्तु अर्थासंगत्याऽयुक्तः, छन्दोभङ्गाच्च।

अस्या एव कारिकाया व्याख्याने हेलाराजीये—निरवयवा इति, निवयवा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च, द्वितीय पाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—ये हि इति, एहि इति, त्येहि इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अवयवभूता इति, अवयवा इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—कपालादयस्तैस्ते इति, कपालादयस्ते इति, पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः, अर्थसंगतेः। प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः। न ह्यत्र पाठे तैरित्यस्य सार्थक्यं संभवति।

एतदग्रे—आरंभ इति, आरंभ आ इति, आरम्भका इति पाठत्रयं दृश्यते। तत्राद्यपाठः अर्थासंगत्याऽयुक्तः, द्वितीयपाठः शब्दाशुद्धयाऽयुक्तः; तृतीयपाठस्तु युक्तः अर्थसंगतेः।

एतदग्रे—व्यतिरिक्ता एवेति, ध्यतिरिक्ता एवेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—एवमाकाशमपि इति, एव आकाशमपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—केनचिदप्यनारब्धत्वादिति, केनचिदनारब्धत्वादिति पाठद्वयं दृश्यते तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—केनचिदरणारूपत्वादिति, केनचिदप्यनारद्धात्वादिति पाठद्वयमपि दृश्यते। एतद् द्वयमपि शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—अमूर्तं व्यापि इति, वतोऽपि व्यापि इति पाठद्वयं दृश्यते। तत्राद्य पाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—आत्मभूतदेशाभावाद् द्रव्यादय इति, आत्मभूतादेशाभावाद्रव्यादय इति, आत्मभूतदेशाभावाद्रथादय इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। किन्तु अत्र पाठे—आत्मभूतदेशाभावाद् रथ्यादय इतिच्छेदः। आकाशस्य रथसंयोगाभावात्। दकारस्य च द्वित्वं बोध्यम्। वस्तुतस्तु संयोगस्य द्वित्वाद्रथस्यापि आकाशसंयोगः संभवति भूमौ स्थितस्य।

एतदग्रे—एवास्य इति, यवास्य इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—तथा इति, तथा च इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। प्रथमपाठे हि अयमर्थः यथा आकाशस्य देशकल्पना तथा जातिपरिकल्प इति। द्वितीयपाठस्य युक्तत्वे तु न विप्रतिपत्तिः फलितार्थकथनपरत्वात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तद्भेदादाकाशभेदे इति, तददाकाशभेदे इति, तद् भेदेनाकाशभेदे इति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽनर्थक्येन चायुक्त इति।

एतदग्रे—सर्वत्राभिन्नप्रत्ययानुगमादिति, सर्वशाभिन्नप्रत्ययानुगमादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—जातिपरिकल्प्या इति, जातिः परिकल्प्या इति, जातिपरिकल्प इति पाठत्रयं दृश्यते। तत्राद्यपाठो न युक्तः, समासे उद्देश्यविधेयभावानवगतेः, द्वितीयतृतीयपाठौ तु युक्तौ, अर्थसंगतेः।

एतदग्रे--उपपादयितुमाह इति पाठः संपातायातः प्रकृते अनुपयोगात्।

एतदग्रे—आकाशं ह्यवच्छिन्दन्त इति, आकाशह्यवच्छिन्दन्त इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—अर्था इति, अर्थात् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—अर्थ इति, अश्य इति पाठद्वयमपि अयुक्तम्। भिन्नविभक्तिकत्वेन वाक्येऽनन्वयात्।

एतदग्रे—भवन्ति इति, भवति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः। कर्तरिबहुवचनदर्शनात्, द्वितीयपाठस्तु अतएवायुक्तः।

एतदग्रे—तत्कृतावच्छेदमिति, तत्कतावच्छेदमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थ संगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—चाकाशमपि इति, वाकाशमपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अत्र पाठे—विकल्पाभावेन वा शब्दस्यायुक्तत्वम्।

एतदग्रे—आधारभावापत्तेरिति, आधारभावापतम् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्यन्योऽन्यदेशत्वमिति, इत्यदेशत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—मूर्तास्त्वव्यापका इति, मूर्ता अव्यापका इति, मूर्तास्तव्यापका इति, मूर्तास्तव्यापक इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठे तु विशेषस्यावद्योतकः तु शब्दो नास्ति इति दोषः। तृतीयचतुर्थपाठौ तु शब्दाशुद्ध्याऽयुक्तौ।

एतदग्रे—तेषाम् इति, एषामिति, एतेषामित्ति पाठत्रयं दृश्यते। एतत् त्रितयमपि साधु, अर्थसंगतेः।

भिन्नवस्त्वाश्रया बुद्धिः ॥ १७॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतः संयोगिदेशानाम् ॥ १८ ।

इति कारिकाद्वयस्यावतरणिकायां हेलाराजीये--गौणव्यवहार इति, गौणत्वव्यवहार इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, पूर्वत्र देशे इति सप्तमीदर्शनात्। देशे इत्यस्य व्यवहारान्वये तु सोऽपि साधुः, द्वितीयपाठस्तु सर्वथा युक्त एव।

एतदग्रे—आत्मभूताः स्युरिति, आत्मभूतास्युरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—नान्यथेत्यत आह इति, नान्यथेत्त्य आह इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अत्र प्रथमकारिकायाः प्रथमे पादे–भिन्नवस्त्वाश्रया इति, भिन्नावस्त्वाश्रया इति, भिन्नवत्वाश्रया इति, भिन्नवस्त्वाश्रयाः इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्धया अयुक्तः। चतुर्थपाठस्तु विशेष्यभूताया बुद्धेरेकत्वेन बहुवचनानुपपत्त्याऽयुक्तः।

अत्रैव—वुद्धिरिति, बद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अस्या एव कारिकाया द्वितीये पादे– संयोगिष्वनुवर्तते इति, संयोगिन्यनुवर्तते इति, पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अस्या एव कारिकायास्तृतीयेपादे—समवायिषु इति, समवायिष्यु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अतः संयोगिदेशानामिति कारिकायाः प्रथमे पादे—अतः संयोगिदेशाना मिति, अतः संयोगीदेशानामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगतेश्छन्दोभङ्गाच्च अयुक्तः।

अस्या एव कारिकाया द्वितीये पादे—परिकल्प्यते इति, परिकल्पते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

द्वितीयपाठे हि परिकल्पते इत्यस्य परिक्लृप्तो भवति इत्यर्थः।

अस्या एव कारिकायास्तृतीये पादे—प्रदेशेभ्य इति, प्रदेशभ्या इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अस्य कारिकाद्वयस्य व्याख्याने हेलाराजीये—सिद्धे इति, सिद्धेत्र इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धया ऽर्थासंगत्या चायुक्तः।

एतदग्रे—अप्राप्तयोरित, आप्राप्तयोरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—प्राप्तिरिति, प्राप्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—पृथक् सिद्धपदार्थविषया इति, पृथक् सिद्धपदार्थविषया इति, पृथक् सिद्धपदार्थाविषया इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—संयोगबुद्धिरिति, संयोगसिद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न भेदस्य ग्रहणमिति, भेदस्य ग्रहणमिति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः, द्वितीयपाठस्तु अर्थसंगत्यायुक्तः।

एतदग्रे—अपृथक् सिद्धानामिति, अपृथक् सिद्धान्तानामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—समवायः इति, समवाये इति पाठद्वयं दृश्यते। तात्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अतः इति इति, अतः इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अनितिपरस्यापि अनुकरणस्य संभवात्।

एतदग्रे—समवाय इति, समवाहा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। अत्रैव—समवायि इत्यपि पाठः सोऽपि अयुक्तः, अर्थासंगतेः।

एतदग्रे—विवेक्तुमशक्यत्वादिति, विवक्तुमशक्यत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अत्रैव—विविक्तुम् इति पाठोऽपि क्वचिद् दृश्यते। स तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—समवायिनो न शक्यन्ते इति, न शक्यन्त…समवायि न इति, न शक्यत समवायिन इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽयुक्तौ।

एतदग्रे—कपालादिष्वेव इति, कपालादिष्विव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु इवार्थासंगत्याऽयुक्तः।

एतदग्रे—तदारब्धमिति, तदारब्धमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अवयवि द्रव्यमुपलभ्यते इति, अवयवि उपलभ्यते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—मुख्या इति, मुख्य इति, मुख्ये इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। समवायिनः व्यवस्थाप्यन्ते इति समानाधिकरणयोर्बहुवचनदर्शनेन अत्रापि बहुवचनस्यैवौचित्यात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—समवायिनः इति, समवायिना इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, मुख्या इति व्यवस्थाप्यन्ते इति समानाधिकरणयोर्बहुवचनदर्शनात्।

एतदग्रे—व्यवस्थाप्यन्ते इति, व्यवस्थाप्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, मुख्या इति, समवायिन इत्यनयोः समानाधिकरणयोर्बहुवचनदर्शनेन अत्रापि बहुवचनस्यैव युक्तत्वात्। अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—संयुक्तानामिति स युक्तानामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च, द्वितीयपाठस्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तः।

एतदग्रे—संयुक्तानां तु इति, संयुक्तानां ते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्त,: अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—गौणत्वमिति, गौणमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तत्र पाठे हि आकाशप्रदेशानामित्यस्य गौणमित्यनेनान्वयानुपपत्तिः।

एतदग्रे—अनेनौपचारिकत्वमिति, अनेनोपचरितत्वमिति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—घटादीनां संयोगिनामिति, घटादीनामिति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—परस्परसंयोगेऽपि इति, परस्परं संयोगेऽपि इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—परस्पर देशभाव इति, परस्परं देशभाव इति, परस्परं देशाभाव इति पाठत्रयं दृश्यते। तत्राद्यपाठद्वयमेव साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—नैतदस्ति, इति, नैतस्ति इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—यद्यपि आकाशेन सदा संबद्धा इति, आकाशेन सदा संबन्धा इति पाठद्वयं दृश्यते। तथापि अत्राद्यपाठ एव युक्तः, अर्थसंगते.। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैवाग्रे—यद्यपि रथादय इति पाठ उपलभ्यते तथापि अर्थसंगत्या-रव्यादय इति पाठ एव युक्तः। उपलभ्यतेऽपिक्वचिद् रव्यादय इति पाठः। रथादय इति पाठस्तु अत्यन्तमयुक्तः।

एतदग्रे—घटादीनामिति, घटादिनामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः

एतदग्रे—घटादीनामनियतसंयोगानामिति, घटादीनामपि नियतसंयोगानामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्था-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संगत्याऽयुक्तः। नहि घटादीनामाकाशेन सह नियतः संयोग उपपद्यते। रव्यादीनान्तु उपपद्यते स इति।

एतदग्रे—घटादिष्वाकाशानुगतः प्रत्यय इति, घटादिष्वाकाशानुगतप्रत्यय इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। क्वचित्तु--घटादिष्वाकाशानुगतप्रत्यये इति पाठो दृश्यते। स तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--घटाकाशः पटाकाश इति, पटाकाश इति पाठद्वयं दृश्यते। तदुभमपि साधु, उभयस्योदाहरणत्वोपपत्तेः।

एतदग्रे--इत्यादि इति, इति यदि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। इत्यादिः इति सविसर्गपाठोऽपि क्वचिद् दृश्यते। स तु युक्त एव, पूर्वत्र-अनुगतः प्रत्यय इति पुंसो विशेष्यस्यदर्शनात्।

एतदग्रे--अध्यारोपे च न इति, आधारोपेण च इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—न भेदविगलनमित्युक्तमिति, न भेदविगलममित्युक्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थ संगत्यायुक्तः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अनुप्रवृत्तिरूपां यामिति॥ १९।

कारिकाया अवतरणिकायां हेलाराजीये— तदेवमिति, तदैव, इति, त्वद्येवमिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः, तृतीय पाठस्तु शब्दाशुद्धयाऽसाधुः।

एतदग्रे—वैशेषिकदर्शनाश्रयेण इति, वैशेषिकपदार्थदर्शनेन इति पाठद्वयं दृश्यते। तदुभयमपिसाधु, अर्थसंगतेः।

एतदग्रे—जातिपदार्थव्याप्तिरुपपादिता इति, जातिपदार्थ उपपादित इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। प्रथमपाठे हि जातिपदार्थस्य स्वाश्रयेव्याप्तिरित्यर्थः।

एतदग्रे—इदानीमिति, इतादानीमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितियपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे--विज्ञानवादेनापि इति, विग्यान वादेनापि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयायुक्तः।

अस्या एव कारिकायाः प्रथमे पादे—अनुप्रवृत्तिरूपामिति, अनुप्रभृतिरूपामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः

अत्रैव—अनुप्रवृत्तिरूपां यामिति अनुप्रवृत्तिरूपाया इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, विवक्षितार्थे शब्दाशुद्धेश्च।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--प्रख्यातामाकृतिमिति, आकृतिप्रख्यातामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्चच्छन्दोभङ्गश्चेति दोषत्रयम।

एतदग्रे—व्यावृत्तिरूपामिति, व्यावृत्त रूपामितिपाठद्वयं दृश्यते। तदुभमपि साधु, अर्थसंगतेः। एतत्कारिकाव्याख्याने हेलाराजीये--

(१) सर्वं पार्षदमिति, द्रव्यपार्षदमिति,
(२) हीदमिति, हिदमिति,
(३) वादपदार्थव्यवस्थेयमिति, वा पदार्थव्यवस्थेयमिति,
(४) बुद्धिस्तस्यामिति, बुद्धिस्तस्या इति,
(५) तदाकारोऽर्थरूपतया इति, तदाकोऽर्थरूपतया इति, तदाकाशेऽर्थरूपतया इति,
(६) सामान्यमित्याहुरिति, सामान्यमाहुरिति,
(७) व्यावृत्ताकारेति, व्यादृत्ताकारेति,
(८) संनिवेशीत्वाकार इति, संनिवेशित्वाकार इति, संनिवेशाकाशे इति,
(९) अत्र च इति, एव च इति,
(१०) सामान्यस्याभावादिति, सामान्यस्यभावादिति,
(११) आकाशादावपि, इति, आकाशादवधि इति,
(१२) अनपह्लवनीया इति, अनपह्लवनाया इति,
(१३) भिन्नाकार इति, दिनाकार इति,
(१४) सर्वत्रैव इति, एव सर्वत्र इति,
(१५) विज्ञाननये इति, विज्ञानयैव इति, विज्ञाननये च इति,
(१६) शब्दादुच्चारिताद्वाकारवती इति, शव्दानुच्चारिताच्चाकारवती इति,
(१४) सर्वत्रैव इति, एवं सर्वत्र इति,
(१५) विज्ञाननये इति, विज्ञानयैव इति, विज्ञाननये च इति,
(१६) शब्दादुच्चारिताद्वाकारवती इति, शव्दानुच्चारिताच्चाकारवती इति,
(१७) शब्दार्थत्वमिति, शब्दार्थत्व इति,
(१८) न बुद्धेरिति, न वृद्धेरिति,
(१९) सह्याकार इति, सस्वाकार इति,
(२०) बाह्योऽस्तु इति, बाह्यास्ती इति,
(२१) न वा इति, न चा इति,
(२२) शब्दवाच्यत्वस्य इति, शब्दवाच्यस्तस्येति,
(२३) न काचिदित, न कदाचिदिति,
(२४) न क्षकु इति, न क्षतिरिति पाठाः समुपलभ्यन्ते।

तत्र प्रथमे द्विके--आद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वितीये द्विकेऽपि—प्रथमपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

तृतीये द्विके—आद्यपाठो न युक्तः, अर्थासंगतेः, द्वितीयपाठस्तु अर्थसंगत्यायुक्तः ।

चतुर्थे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

पञ्चमे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

षष्ठे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयः पाठस्तु शब्दाशुद्ध्याऽयुक्तः, सविशेषणस्य सामान्यपदस्य प्रथमान्तत्वेन वचनकर्मत्वासंभवात् ।

सप्तमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

अष्टमे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

नवमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

दशमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एकादशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

द्वादशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

त्रयोदशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

चतुर्दशे द्विके—पाठद्वयमपि साधु, अर्थसंगति संभवात् ।

पञ्चदशे त्रिके—प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

षोडशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

सप्तदशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

अष्टादशेद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकोनविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एकविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

द्वाविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

त्रयोविंशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठोऽपि युक्त एव, अर्थसंगतेः ।

चतुर्विंशे द्विके—आद्यपाठो न युक्तः, शब्दाशुद्धेः, द्वितीयपाठस्तु शब्दशुद्ध्याऽर्थसंगत्या च युक्तः ।

एतदग्रे—ननु च इति, च ननु इति,

(२) देशकालादिनिमित्त इति, देशकालादिनिमित्तमिति, देशकालादितिमित इति,

(३) भेद इति इति, भेद इति,

(४) तदनादरेणाभिन्नान्येव इति, तदभिन्नामेवेति,

(५) तदनादरेणाभिन्नान्येव तानि इति, तदनादरेणाभिन्नान्येत्रावनि इति,

(६) व्यतिरिक्तसामान्यकल्पनायामिति, सामान्यव्यतिरिक्तकल्पनायामिति,।

(७) प्रयस्यत इति, इति, त्यप्रयस्यत इति, पाठाः समुपलभ्यन्ते ।

तत्र प्रथमे द्विके—आद्यपाठ एव युक्तः, पदयोः क्रमौचित्यात् । तदभावाद् द्वितीयपाठो न युक्तः ।

द्वितीये त्रिके—आद्यपाठ एव युक्तः, भेदविशेषणत्वेन पुंस्त्वौचित्यात् । अतएव द्वितीयपाठो न युक्तः, तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

तृतीये द्विके—आद्यपाठे इतिशब्दपाठः सार्थकः, तत्र सत्येवार्थसंगतेः । अतएव द्वितीयपाठो न युक्तः ।

चतुर्थे द्विके—आद्यपाठ एव युक्तः, तथैवार्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

पञ्चमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयापाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

षष्ठे द्विके—आद्यपाठ एव युक्तः, वस्तुव्यतिरिक्तसामान्यकल्पनायामित्यर्थादर्थसंगतेः, द्वितीयपाठे तु नैषोऽर्थ इति अर्थासंगत्याऽयुक्तः सः ।

सप्तमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तुत्यशब्दाधिक्यादयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिन्ना इति परोपाधिरिति ।। २० ।

कारिकायाः तृतीये पादे—प्रपञ्चोऽयमिति मयं वीयम् इति, ।

चतुर्थे पादे—संसृष्टेष्वेव इति, त्यदृष्टेष्वेव इति पाठाः समुपलभ्यन्ते ।

तत्र प्रथमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु आनर्थक्येन शब्दाशुद्धया चायुक्तः ।

द्वितीये द्विकेऽपि—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः ।

एतत्कारिकाव्याख्याने हेलाराजीये—निरुपाधिनो वस्तुनोऽव्यवहार्यत्वादिति, निरुपाधिनो वस्तुनो व्यवहार्यत्वादिति, अव्यवहार्यत्वात्, सर्व एवेति, अव्यवहार्यत्वा अर्थ एवेति, परोपाश्रय इति, परोपाश्रयेण इति, व्यवहार इति, व्यवहार्य इति, सामान्यादौ इति, सामान्यादो इति, व्यतिरिक्तसामान्येति, व्यक्तिरिक्तस्य सामान्येति, कल्पनैवमिति, कल्पनेनैवमिति, अकारि इति, आकारि इति, अकारीत्यत्रेति, आकार्यत्रेति, अरा- र्यत्रेति पाठाः समुपलभ्यन्ते ।

अत्र प्रथमे द्विके—आद्यपाठ एव युक्तः, निरुपाधिकस्य वस्तुनोऽव्यवहार्यत्वेन अर्थसंगतेः । अतएव अर्थासंगत्या द्वितीयपाठोऽयुक्तः ।

द्वितीये द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । शब्दाशुद्धेश्च ।

तृतीये द्विके—उभयमपि साधु सर्थसंगतेः ।

चतुर्थे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु न युक्तः, व्यवहारस्यैव परोपाश्रयत्वात् । व्यवहार्यस्य वस्तुनस्तु न परोपाश्रयत्वमिति ।

पञ्चमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

षष्ठे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

सप्तमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

अष्टमे पाठपञ्चके—आद्यपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम् । पञ्चम पाठस्तुशब्दाशुद्धयाऽयुक्तः ।

नैकत्वं नापिनानात्वमिति ।। २१ ।

कारिकाया अवतरणिकायां हेलाराजीये—एतदेव इति, तदेव इति, पाठद्वयं दृश्यते तदुभयमपि साधु, अर्थसंगतेः । क्वचित्तु एतदेवापि इति पाठो दृश्यते । सतु अपि शब्दस्य वैयर्थ्यादयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—प्रपञ्चयति इति, विपञ्चयति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—एकत्व संख्याधीन इति, एकत्वं संख्याधीन इति, एकत्वेन व्यवहार इति, व्यवहार इति, पृथक्त्वनिबन्धन इति, पृथत्कनिबन्धन इति, व्यवहारो नानात्वेन इति, नानात्वेन इति, सता निबन्धन इति, सत्ता निबन्धन इति, स्वरूपसत्त्वेन इति, रूपसत्त्वेन इति, अभावोपाधिरिति, उभयोपाधिरिति, संसर्गदर्शने इति, संसर्गदर्शनेः इति, सर्वः परोपाश्रय इति, सर्व परोपाश्रय इति, परोपाश्रयाय इति, परोपश्रयोऽयमिति, प्रपञ्चो इति, प्रपञ्चौ इति, स्वशक्तय एवोपाधय इति, शक्तय एवोपाधय इति पाठाः समुपलभ्यन्ते।

तत्र प्रथमद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु पदानां परस्परान्वयासंगत्याऽयुक्तः।

द्वितीये द्विके—आद्यपाठ एव युक्तः स्वार्थबोधने वाक्यपरिसमाप्त्याऽनाकाङ्क्षत्वात्। द्वितीयपाठस्तु एकत्वेन इति पदमाकाङ्क्षते इति अयुक्तः।

तृतीये द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

चतुर्थे द्विके—आद्यपाठः स्वार्थेपरिपूर्णः पदान्तरानाकाङ्क्ष इति युक्तः, द्वितीयपाठस्तु व्यवहारपदमाकाङ्क्षते इत्ययुक्तः।

पञ्चमे द्विके—आद्यपाठः शब्दाशुद्ध्याऽयुक्तः, द्वितीयपाठास्तु शब्दशुद्ध्याऽर्थसंगत्या च युक्तः।

षष्ठे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु नानार्थकत्वेन भ्रामकत्वादयुक्तः।

सप्तमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

अष्टमे द्विके—आद्यपाठ एव युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

नवमे द्विके—आद्यपाठ एव युक्तः, उद्देश्यविधेयभावस्य स्पष्टं प्रतिपत्तेः। द्वितीयपाठे तु समासे एकार्थीभावेन तदप्रतीत्या स पाठो अयुक्तः।

दशमे द्विके—आद्यपाठो न युक्तः, स्वार्थे शब्दाशुद्धेः, अर्थासंगतेश्च। द्वितीयपाठस्तु युक्तः, शब्दशुद्धेरर्थसंगतेश्च।

एकादशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च, द्वितीयपाठस्तु स्वार्थे शब्दाशुद्ध्याऽयुक्तः।

द्वादशे द्विके—आद्यपाठ एव युक्तः, स्वशब्देन शक्तीनां नियमनात् तदभावे तु अनियताः शक्तय इति स पाठो हेयः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वशक्त्यात्मभूतत्वमिति ।। २२ ।

कारिकाया द्वितीये पादे—निर्णयः इति, निर्णये इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

अस्मिन्पाठे हि—भावानामात्मभेदस्य कल्पना मार्थिका इति प्रतीयते, तच्चाद्वैतसिद्धान्तविरुद्धम् ।

अस्या एव कारिकायास्तृतीये पादे—भावानामात्मभेदस्येति, भावानाभात्मभेदस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयायुऽक्तः ।

एतत्कारिकाव्याख्याने हेलाराजीये—सर्वशक्तीति, सर्वशक्तिति इति, सर्वशक्ताति इति, प्रमाणेन सिद्धे इति, प्रमाणसिद्धे इति, प्रमाणे सिद्धे इति, अविद्यापरिकल्पितस्येति, अविदापरिकल्पितस्येति, अविद्यापरिल्पितस्येति, अपारमार्थिकत्वादिति,पारमार्थिकत्वादिति, कार्यनानात्वोन्नीयमान इति, कार्यनानात्वोन्नायमान इति, एवैकस्य युक्त इति, एवैकस्योयुक्त इति, शक्तिभेद एवैकस्य इति आद्युभेदे एवैकस्येति ।

तस्माद् द्रव्यादयः सर्वाः ।। २३ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—तस्माद् द्रव्यादयः समीपदेशव्यक्तयो भिन्नलक्षणा इति, तथा च इति,

एतत्करिकायाः प्रथमे पादे—द्रव्यादयः सर्वा इति, द्रव्यादयोऽसर्वा इति,

अस्या एव कारिकायाः तृतीये पादे—संसृष्टाः पुरुषार्थस्येतिः संसृष्टापुरुषार्थस्येति ।

एतत्कारिकाव्याख्याने हेलाराजीये—लक्षणाः पदार्था इति, लक्षणपदार्था इति, एकस्यैव शक्तय इति, एकस्यैव स्वशक्तय इति, विलक्षण व्यापारानुमेया इति, लक्षणव्यापारानुमेया इति, लक्षव्यापारामेया इति, विलक्षणव्यापारान्दुभया इति, इति ता इति, ता इति उपगत समन्वया इति, उपयस्य समन्वया इति, उपगतसमन्वय इति, भागौ इत्यत्र इति, भागा इत्यत्र इति, वक्ष्यमाण इति, वक्ष्यते इति, नाकाशादीनामिति, नाकाशादिनामिति, नाशातादीनामिति, वैशेषिकाणामिति, वैशेषिकानामिति, चैशेग्यिकाणामिति, विश्वमूर्नेरिति, विश्वं मूर्तेरिति, विश्वस्वमूर्तेरिति, त्रिश्वस्य मूर्ते इति, सामान्यमेवमिति, सामान्यमेव इति, प्रसङ्गात्कथितमिति, कथिप्रसङ्गादित्ति, प्रसङ्गादित्ति, द्रव्यादीनामिति, द्रव्यादिनामिति, अर्थकारित्वे इति, अर्थकारित्वमिति, वरमिति, परमिति, एकमेव, इति अङ्कमेवेति, शक्तिमदस्त्वित्यर्थं इति, शक्तिमानस्तीत्यर्थं इति, शक्तिमनास्त्वित्यर्थं इति ।

यथैव चेन्द्रियादीनामिति ।। २४ ।

कारिकाया अवतरणिकायां हेलाराजीये—साधनत्वे तासामसामर्थ्यमिति साधनत्वेनासामर्थ्यमिति, संसर्गस्यैव इति, संसर्गस्य इति, तथात्वादिति, तथात्वा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिति, व्यतिरेके द्वैतापतिरिति, व्यतिरेके द्वैतापतिरिति, व्यतिरेके तापत्तिरिति, पाठाः समुपलभ्यन्ते ।

तत्र प्रथमे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽयुक्तम् ।

द्वितीये त्रिके—आद्यं पाठद्वयमेव युक्तम् अर्थसंगतेः, शब्दशुद्धेश्च । तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

तृतीये त्रिके—आद्यपाठ एव युक्तः, इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽयुक्तम् ।

चतुर्थे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

पञ्चमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

षष्ठे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

सप्तमे द्विके—आद्यपाठ एव युक्तः अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

अष्टमे द्विके—आद्यपाठोऽर्थासंगत्या हेयः । पूर्वापरग्रन्थाभ्यामसंबन्धाच्च । द्वितीयपाठस्तु परग्रन्थेन संबद्ध इत्युपादेयः ।

नवमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

दशमे द्विके—आद्यपाठ एव युक्तः शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एकादशे द्विके—पाठद्वयमपि युक्तम् अर्थसंगतेः ।

द्वादशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु स्वशब्दस्य वैयर्थ्यादयुक्तः तद्वैर्थ्यन्तु अद्वैतनये स्वशब्दव्यावर्त्यस्य द्वितीयस्याभावादिति ।

त्रयोदशे चतुष्के—आद्यपाठ एव युक्तः, इतरत्त्रयन्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तम् ।

चतुर्दशे द्विके—आद्यपाठ एव युक्तः, इति शब्दस्य हेत्वर्थकस्यावश्यकत्वात् । द्वितीयपाठस्तु तदभावादयुक्तः ।

पञ्चदशे त्रिके—आद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः । तृतीयपाठस्तु पूर्वग्रन्थे ता इति विशेष्ये बहुवचनदर्शनेन अत्रापि तस्यैवौचित्यादवयुक्तः ।

षोडशे द्विके—उभयमपि युक्तम् । द्वितीयपाठस्य सन्धिनासिद्धेः,

सप्तदशे द्विकेऽपि उभयं साधु, अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अष्टादशे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

एकोनविंशे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

विंशे पाठचतुष्के—आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम्।

एकविंशे द्विके—आद्यपाठो न युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु अर्थसंगत्या युक्तः।

द्वाविंशे त्रिके—आद्यपाठ एव युक्तः अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीयपाठस्तु कथितपदाभावेन साकाङ्क्षत्वादर्थासंगत्याऽयुक्तः।

त्रयो विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

चतुर्विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु वाक्यार्थे तदर्थस्यान्वयाभावादयुक्तः।

पञ्चविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। परशब्दस्य केवलार्थकत्वे तु सोऽपि युक्तः।

षड्विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीय, पाठस्तु शब्दाशुद्धयाऽयुक्तः।

सप्तविंशे त्रिके—आद्यपाठ एव युक्तः, एकमेवेति उद्देश्ये नपुंसकत्वदर्शनात्। अतएव द्वितीयपाठोऽयुक्तः तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अष्टाविंशे द्विके—उभयमपि साधु द्वितीयपाठे संसृष्टानामित्यस्य साधनत्वे असामर्थ्येचान्वयात्।

एकोनत्रिंशे द्विके—उभयमपि युक्तम्, अर्थसंगतेः पाठद्वयेऽपि हि एव पदस्य स्वपूर्वपदेनैवान्वयात्।

त्रिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एकत्रिंशे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः शब्दशुद्धेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

यथैव चेन्द्रियादीनामिति करिकायाः प्रथमे पादे—(१) यथैव चेन्द्रियादीनामिति, यथैव चेन्द्रियादिनामिति,

(२) अस्या एव कारिकाया द्वितीये पादे-आत्मभूता इति, आत्मभूवा इति,

(३) अस्या एव कारिकायास्तृतीये-पादे तथा इति, तया इति,

(४) एतत्कारिकाव्याख्याने हेलाराजीये—चक्षूरूपालोकमनस्कारा इति, चक्ष रूपालोकमनस्कारा इति,।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५) मिश्रिता इति, मिश्रितमिति,

(६) चक्षूरूपालोकमनस्कारा आत्ममन इन्द्रियार्था वा इति चक्षूरूपालोमनस्मराश्चात्ममन इन्द्रियार्था वा इति,।

(७) चक्षूरूपालोकमनास्मि आत्ममन इन्द्रियार्था वा इति।
(८) चक्षूरूपालोकमनस्ति आत्ममनइन्द्रियार्था वा इति।
(९) चक्षूरूपालोकमनमिते आत्ममन इन्द्रियार्था वा इति।
(१०) चक्षूरूपालोप्तमनस्कारा आत्ममन इन्द्रियार्था वा इति।
(११) चक्षूरूपालोकमनस्कारा मन इन्द्रियार्था वा इति।
(१२) चक्षूरूपालोकमनस्कारा इन्द्रियार्थान्ध वा इति।
(१३) चक्षूरूपालोकमनस्कारा इन्द्रियार्थान्तर वा इति।

(१४) परस्पराहितविशेषा इति, परस्परामित विशेषा इति, परम्पराहितविशेषा इति, परस्पराहित······पदार्थान्तरम् इति।

(१५) नेयमेभ्य इति, नैतेभ्य इति।

(१६) पदार्थान्तरं जनिका इति, पदार्थन्तराजनिकाः इति।

(१७) अतएव इति, अतएवमिति, अकात एव इति।

(१८) सामग्रीजनका इति, सामग्राजनका इति।

(१९) सामग्रीशब्दवाच्या इति, सामग्रीशब्दवाच इति।

(२०) शर्वशक्तीनामिति, सर्वशक्तिना इति, सर्वशक्तिनाम् इति, साधारणशक्तीनामिति।

(२१) आधारभूतत्वेन इति, परभूतत्वेन इति।
(२२) संबन्ध इति, सर्वबन्ध इति, संबोध इति।
(२३) द्रव्यादिशक्तीनामिति, द्रव्यादिशक्तिनामिति।
(२४) तत इति, अत इति।
(२५) य एकस्मादिति, अयमेकस्मादिति।
(२६) आधारादव्यतिरेकादिति, आधारव्यतिरेकादिति।
(२७) रूप संमूर्छनमिति, रूप संमूर्छन इति।
(२८) समग्रा इति, समयता इति।
(२९) तत्रापि हि इति, तत्रश हि इति।
(३०) द्रव्यव्यवहाराभावात् इति, द्रव्यव्यवहारादिति।
(३१) एवमिति, एवेति।
(३२) द्रव्यादिभ्य इति, द्रव्यादिभिरिति।

(३३) विवेकानवधारणात् तत्स्वभावतैव इति, विवेकानवधारणतन्त्रस्वभावतैव इति, विवेकानवधारणात्स्वभावेनैव इति, विवेकानवधारणात् स्वभावादिति, विवेकानवधारणादिति स्वभावतैव इति।

(३४) संबध्यन्त इति संबन्धा इति, संबन्ध्यन्त इति संबन्धादिति।
(३५) द्रव्यादि शक्तय इति, द्रव्यादि शक्त्य इति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३६) तासां संबन्धानां शक्तीनामिति, तासां संबन्धिनां शक्तिनामिति, तासां संबन्धिनां शक्तानामिति, तासां संबन्धीनां शक्तीनामिति।

(३७) अन्योऽन्य संसर्गोऽपि इति, अन्योऽन्यसंसर्गेऽपि इति।

(३८) संसर्गावस्थायामिति, संसर्गावश्यायामिति।

(३९) अपि तथैवासौ इति, अतथैवासौ इति, अपि तथा एवासो इति, इति।

(४०) क्वचित्सामान्यानुगमाच्चेति, चित्सामान्यानुगमाच्चेति, चित्सामान्यागमा च इति,

(४१) इति प्रथमकाण्डे एव निर्णीतमिति, इति एव प्रथमकाण्डे निर्णीतमिति,

(४२) जातिः शब्देन इति, जाति जाति शब्देन इति,

(४३) प्रतिपाद्यते इत्युपपादितमिति, प्रतिपाद्यते इति। इत्युपपादितमिति,

(४४) नित्यः शब्दार्थं इति, नित्यशब्दार्थं इति,

(४५) जातेर्नित्यत्वे इति, जातेर्नित्यत्ये, इति, पाठाः समुपलभ्यन्ते।

तत्र प्रथमे द्विके—यथैव चेन्द्रियादीनामिति पाठ एव युक्तः, शब्दशुद्धेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

द्वितीये द्विकेऽपि—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

तृतीये द्विकेऽपि—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु—अर्थासंगत्याऽयुक्तः, यथैव चेति पूर्वमुक्तेश्च।

चतुर्थे द्विके अपि—आद्यपाठ एव युक्तः, शब्दशुद्धेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

पञ्चमे द्विकेऽपि—आद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

षष्ठे द्विकेऽपि—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

सप्तमे सप्तके सर्वे पाठा असाधव एव। अतः षष्ठद्विकस्याद्यपाठ एव युक्तः।

चतुर्दशे चतुष्केऽपि—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। एवं तृतीयः एवं चतुर्थः। पञ्चदशे द्विके पाठद्वयमपि साधु अर्थसंगतेः।

षोडशे द्विके—पदार्थान्तरं जनिकाः इति आद्यपाठ एव साधुः, अर्थसंगतेः। जनिका इति सामग्रीविशेषणम्। द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः।

सप्तदशे त्रिके—आद्यपाठ एव साधुः, इतरत्पाठद्वयन्तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अष्टादशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एकोनविंशे द्विके—पाठद्वयमपि साधु, अर्थसंगतेः। द्वितीये पाठे सामग्रीशब्दो वाग् वाचको येषामिति विग्रहः।

विंशे चतुष्के—आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तम्।

एकविंशे द्विके—आद्यपाठ एव युक्तः अर्थसंगते, द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

द्वाविंशे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

त्रयोविंशे द्विके—आद्यपाठ एव युक्तः, शब्दशुद्धेः, द्वितीयपाठस्तु तदभावादयुक्तः।

चतुर्विंशे द्विके—पाठद्वयमपि साधु, अर्थसंगतेः।

पञ्चविंशे द्विके—आद्यपाठ एव युक्तः, अग्रे तस्मिन्नपि इति तत्पदेन परामर्शात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

षड्विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

सप्तविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तः। समूर्छनशब्दस्य नित्यनपुंसकत्वात्।

अष्टाविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एकोनत्रिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

त्रिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एकत्रिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

द्वात्रिंशे द्विके—आद्यपाठ एव युक्तः, विवेकशब्दयोगे पञ्चम्या एवौचित्यात्। तदभावाद् द्वितीयपाठो न युक्तः।

त्रयस्त्रिंशे पञ्चके—आद्यपाठ एब युक्तः, अर्थसंगतेः, इतरत्पाठचतुष्कं तु अर्थासंगत्याऽयुक्तम्।

चतुस्त्रिंशे द्विके—आद्यपाठ एवार्थसंगत्यायुक्तः, द्वितीयपाठस्तु तदभावादयुक्तः द्रव्यादिशक्तय इति विशेष्ये प्रथमा श्रवणाच्च।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पञ्चत्रिंशे द्विके—आद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

षट्त्रिंशे पाठचतुष्के—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। इतरत्पाठत्रयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

सप्तत्रिंशे पाठद्विके—आद्यपाठ एव युक्तः, आत्मभूत एवेति विशेष्ये प्रथमादर्शनात्। तत्रापि प्रथमैव न तु सप्तमी अर्थासंगतेः।

अष्टात्रिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एकोनचत्वारिंशे पाठत्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

चत्वारिंशे त्रिके—द्वितीयपाठ, एव युक्तः. अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तम्।

एकचत्वारिंशे द्विके—पाठद्वयमपि युक्तम्, अर्थसंगतेः।

द्वाचत्वारिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

त्रिचत्वारिंशे पाठद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु एक इति शब्दो व्यर्थ इति स पाठोहेयः।

चतुश्चत्वारिंशे पाठद्विके—आद्यपाठ एव युक्तः, व्यासे उद्देश्यविधेयभावावगमात्। तदभावदेवसमस्तो द्वितीयपाठो न युक्तः।

पञ्चचत्वारिंशे पाठद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्त इति।

न तदुत्पद्यते किञ्चिदिति ॥ २५।

कारिकाया प्रथमे पादे—

(१) न तदुत्पद्यते इति, नेतदुत्पद्यते इति,

(२) किञ्चिद् यस्येति, किञ्चियस्येति, द्वितीये पादे—

(३) जातिर्न इति, जाति न इति, चतुर्थे पादे—

(४) प्रयोजिका इति, प्रयोतिका इति पाठाः समुपलभ्यन्ते।

एतत्कारिकाव्याख्याने हेलाराजीये—

(५) व्यक्त्यधीना इति, व्यतयधीना इति, व्यक्त्यधाना इति,

(६) जात्यभिव्यक्तिरिति, जातिव्यक्तिरिति, जात्यभिव्यक्तिरीति,

(७) स्वाश्रयकारणानाम् इति, स्वाग्वायकारणानामिति,

(८) इवावलम्बते जातिरिति, इव लम्बन्ते जातिरिति, इवालम्बते जाति, इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(९) सहकारिणीत्यर्थं इति, सहकारिणात्यर्थे इति,
(१०) निमित्तकारणत्वादिति, निमितकारणत्वादिति,
(११) जातीनामिति, जातिनामिति,
(१२) भङ्ग्याऽभिहित इति, भाग्यभिहित इति ।

कारणेषु पदं कृत्वा ॥ २६ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—
(१३) कारणेष्वसंनिधानादिति, कारणेष्वेवसंनिधानादिति,
एतत्कारिकायाः प्रथमे पादे—
(१४) पदं कृत्वा इति, पदकृत्वा इति, द्वितीये पादे—
(१५) पुनः पुनः इति, पुनः पुन इति,
एतत्कारिकाव्याख्याने हेलाराजीये—
(१६) संनिधानात्पदबन्ध इति, संनिधानात्पदसंबन्ध इति,
(१७) कार्याणामवस्थानादिति, कार्णानामवस्थानादिति, कार्याणा अवस्थानादिति,
(१८) जातिरूपोपरागेण इति, जातिरूपे परमाणौ इति, जातिरूपादरागेण इति,
(१९) तत्र साधनानां प्रवृत्ताविति, तत्तत्साधनानां प्रवृताविति, तत्तत्सीधानांना प्रवृत्ताविति
(२०) कार्यारम्भे इति, कार्याभरम्भ इति,
(२१) तत्समवेतजात्यभिव्यक्तिरिति, तत्समवेत्य जात्यभिव्यक्तिरिति,
(२२) असकृदाश्रयोपलब्धौ भवति इति, असकृदाश्रयोपलब्धौ न भवति इति,
(२३) दर्शनान्तरे वा प्रधानपुरुषादय इति, वा प्रधानपुरुषादय इति,
(२४) अनित्या वीरणादय इति, अनीत्याविरणादय इति,
(२५) किलकार्यमिति, किलाकार्यमिति,
(२६) निष्पन्नमप्यदृश्यमिति, निष्पन्नमथदृश्यमिति,
(२७) वायुर्द्रव्यमिति, वायुद्रव्यमिति ।

निर्वर्त्यमानं यत्कर्म ॥ २७ ।

इति कारिकाया अवतरांणकायां हेलाराजीये—
(२८) प्राक् प्रभवादिति, प्राक् प्रभावादिति, एतदग्रे—
(२९) याश्रितम् इति, इतरया इति, पाठद्वयम् दृश्यते ।
ततः परम्—
(३०) जातिपदार्थनयेऽत्र इति, जातिपदार्थनयेतु इति,
(३१) जारुतेपयोग इति, ताते रूपयोग इति,
एतत्कारिकायास्तृतीये पादे—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३२) स्वाश्रयस्याभिनिष्पत्तौ इति, स्वाश्रयस्यापि निष्पत्तौ इति, स्वाश्रयस्याभिनिष्पत्त्यै इति,

(३३) चतुर्थे पादे—सा क्रियाणां प्रयोजिका इति, सा क्रियायाः प्रयोरिकाः इति पाठाः समुपलभ्यन्ते।

तत्र प्रथमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

द्वितीये द्विके—अपि आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

तृतीये द्विके—जातिर्न इति पाठः साधुः, शब्दशुद्धेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

चतुर्थे द्विकेऽपि—आद्यपाठ एव साधुः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

पञ्चमे त्रिके—आद्यपाठ एव साधुः, अर्थसंगतेः शब्दशुद्धेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

षष्ठे त्रिके—प्रथमपाठः साधुः, शब्दशुद्धेः, अर्थसंगतेः, अभ्रामकत्वाच्च। द्वितीयपाठस्तु संदिग्धार्थकत्वाद् हेयः। व्यक्तिपदं जात्याश्रयपरम् अभिव्यक्तिपरं वा इति। तृतीयपाठस्नु इति शब्दे दीर्घकरणादयुक्तः।

सप्तमे द्विके— आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तम्ः।

अष्टमे त्रिके—आद्यपाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तः।

नवमे द्विके—आद्यपाठो युक्तः, अर्थसंङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

दशमे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एकादशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धया हेयः।

द्वादशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

त्रयोदशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

चतुर्दशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पञ्चदशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

षोडशे द्विके—उभयमपि साधु, अर्थसङ्गतेः, अत्रोभयत्रापि पदशब्दश्चरणपरः। चरणन्यास इति पर्यवसितोऽर्थः।

सप्तदशे त्रिके—आद्यपाठो युक्तः, अर्थसङ्गतेः, शब्दशुद्धेश्च। इतरत्पाठद्वयं तु शब्दाशुद्ध्याऽयुक्तम्।

अष्टादशे त्रिके—आद्यपाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्।

एकोनविंशे त्रिके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठोऽपि अर्थसङ्गत्या युक्त एव। तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

विंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एकविंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

द्वाविंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

त्रयोविंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु दर्शनान्तरसाकाङ्क्षत्वादयुक्तः।

चतुर्विंशे द्विके—आद्यपाठो युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

पञ्चविंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

षड्विंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

सप्तविंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठोऽपि युक्त एव, अर्थसङ्गतेः।

अष्टाविंशे द्विके—अर्थसङ्गत्या आद्यपाठो युक्तः, द्वितीयपाठ अर्थासङ्गत्याऽयुक्तः।

एकोनत्रिंशे पाठद्वये—उभयमप्यसाधु, संपातायातं हि तत् प्रकृतानुपयोगि च।

त्रिंशे पाठद्विके—उभयं साधु, अर्थसङ्गतेः।

एकत्रिंशे पाठद्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वत्रिंशे त्रिके—आद्यपाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम् ।

त्रयस्त्रिंशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे हेलाराजीये—(१) घटं करोति इति, कटं करोतीति,

(२) निर्वर्त्यमानस्य इति, निर्वर्तमानाय इति,

(३) क्रियां प्रयुक्तेन कारणपदबन्धन्यायेन इति, क्रियांप्रयुक्तेन कारणसंबन्धन्यायेन इति, क्रियांप्रयुक्तेन कारणपदबन्धन्यायेन इति,

(४) प्रयाजकत्वादिति जातिरूपाश्रयेण इति, प्रयोजकत्वादि जातिरूपाश्रयेण इति, जातिरूपाश्रयेण इति,

(५) निर्वर्त्यत इति, निर्वत इति, निर्वर्त्येतेति,

(६) कारकं कर्मेति इति, कारकं च कर्मेति इति,

(७) अत्यन्तभिन्ने इति, अत्यन्तभिन्नेः इति,

(८) गवाश्ववदिति, गताश्ववत् इति,

(९) संमूर्च्छितस्वभावत्वादिति, संमूर्च्छितस्वभावादिति,

(१०) व्यपदेशोऽविरुद्ध इति, व्यपदेशो न विरुद्ध इति,

(११) कर्मणोः सत्त्वादिति, कर्मणः सत्त्वादिति,

(१२) सत्त्वात् स्वत एवेति, सत्त्वात् सतएवेति,

(१३) इत्येकत्वात् स्वत एवेति, इत्यर्थात् स्वत एवेति,

(१४) निर्वर्त्यमानमिति विशेषमाह इति, निर्वर्त्ये विशेष्याह इति,

(१५) निरुप्य इति, वैरूप्यमिति,

(१६) योग्येषु प्रवर्तन्ते इति, अन्येषु प्रवर्तन्ते इति, योग्येषु प्रवर्तन्ति इति, योग्येषु प्रवर्तते इति,

(१७) प्रयोजिका इत्युच्यते इति, प्रयोजिक इत्युच्यते इति,

(१८) एतच्च जात्यभिधानपक्षे संभवति इति, एत व जात्यभिधानपक्षे संभवति इति, एतच्चाजात्यभिधानपक्षे संभवतीति, एतच्च जात्यभिधानपक्षे संभवतीति । एतच्च जात्यभिधानपक्षेषु संभवतीति

(१९) उपधारसत्ताश्रयं साधनत्वम् इति, उपचारात्साधत्वमिति,

विधौ वा प्रतिषेधे वा ॥ २८ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—

(२०) न द्रव्यस्येति, तद्रव्यस्येति,

(२१) साधनं जातिरिति, साधनजातिरिति,

(२२) विधौ वा प्रतिषेधे वा इति, विधौ ना प्रतिषेधे वा इति,

(२३) व्यक्त्याश्रिताश्रिता इति, पतयाश्रिहा इति,

(२४) जातेः पदार्थत्वे इति, जाते पदार्थत्वे इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२५) कृतः शास्त्रार्थं इति, कृत शास्त्रार्थं इति,

(२६) इत्याद्यपि प्रतिषेध इति, इति प्रतिषेध इति, इत्यादिरपि प्रतिषेध इति,

(२७) सकृदनुष्ठानेऽपि इति, सकृदनुसानेऽपि इति,

(२८) तथा हि—अहननमिति, तथाप्यहननमिति,

(२९) क्वचिदनुष्ठितमिति, विरुद्धक्रियाचरणादिति, क्वचिदनुष्ठीतविरुद्ध-क्रियाचरणादिति,

(३०) नाकारणानि इति, या कारणानि इति,

(३१) तदा तदा प्रतिषेध इति, तदा वा प्रतिषेध इति पाठाः समुपलभ्यन्ते।

तत्राद्ये द्विके—पाठद्वयमपि साधु, अर्थसङ्गतेः, द्वितीये द्विके आद्यपाठ एव साधुः द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

तृतीये त्रिके—तृतीयपाठः साधुः, अर्थसङ्गतेः। कारणपदबन्धन्यायाकारश्च क्रियापदानि कारणपदैः (कारकपदैः) सहनियमेन बध्यन्ते संबध्यन्ते इति वा। द्वितीयपाठोऽपि साधुरेव पूर्वोक्तरीत्याऽर्थसङ्गतेः, प्रथमपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

चतुर्थे त्रिके—आद्यपाठ एव युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्था-सङ्गत्याऽयुक्तः, तृतीयपाठोऽपि अर्थासङ्गत्यैवायुक्तः।

पञ्चमे पाठत्रिके—आद्यपाठो युक्तः, द्वितीयपाठस्तु अर्थासङ्गत्या तृतीय-पाठोऽपि तयैवायुक्तः।

षष्ठे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठेतु चकारो व्यर्थः।

सप्तमे द्विके—आद्यपाठो युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अष्टमे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठोऽयुक्तः, अर्थासङ्गतेः।

नवमे द्विके—आद्यपाठो युक्तः, हेतोः पक्षनिष्ठत्वस्यौचित्यात्। तादात्म्येन हेतुत्वे तु द्वितीयपाठोऽपि साधुः।

दशमे द्विके—पाठद्वयं साधु, अर्थसङ्गतेः।

एकादशे द्विके—आद्यपाठो युक्तः, प्राप्यविकार्ययोरिति विशेषणे द्विवचन-दर्शनात्। द्वितीयपाठस्तु अतएवायुक्तः।

द्वादशेद्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटैव।

त्रयोदशे द्विके—पाठद्वयमप्ययुक्तम्, अर्थासंगतेः।

चतुर्दशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽ-र्थासंगत्या चायुक्तः।

पञ्चदशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

षोडशे पाठचतुष्टये—आद्यपाठ एव युक्तः, अर्थसङ्गतेः, इतरत्पाठत्रयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम् ।

सप्तदशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

अष्टादशे पाठपञ्चके—आद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठचतुष्टयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम् ।

एकोनविंशे पाठद्विके—आद्यपाठो युक्तः, द्वितीपाठस्तु शब्दशुद्धयाऽयुक्तः । वस्तुतस्तु उपचारात्सत्ताश्रयमिति पाठो युक्तः ।

विंशे पाठद्विके—आद्यपाठो युक्तः, द्वितीयपाठस्तु शब्दशुद्धयाऽयुक्तः, ।

एकविंशे पाठद्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु समासे उद्देश्यविधेयभावानवगमादयुक्तः ।

द्वाविंशे द्विके—प्रथमपाठो युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽ युक्तः ।

त्रयोविंशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दशुद्धयाऽयुक्तः ।

चतुर्विंशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

पञ्चविंशे पाठद्वये—आद्यपाठो युक्तः, उद्देश्यविधेयभावावगमात् । तदनवगमात्तु द्वितीयपाठो न युक्तः ।

षड्विंशे पाठत्रिके—प्रथमपाठो न युक्तः, शब्दाशुद्धेः । इतरत्पाठद्वयन्तु शब्दशुद्धयाऽर्थसंगत्या च युक्तम् ।

सप्तविंशे पाठद्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयार्थासंगत्या चायुक्तः ।

अष्टाविंशे पाठद्विके—पूर्वपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एकोनत्रिंशे पाठद्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः ।

त्रिंशे पाठद्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एकत्रिंशे पाठद्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

इतः पूर्वम्—नाकारणानि इति न कारणानि इति, नाकरणानि इति पाठत्रयं या कारणानि इति च पाठाः समुपलभ्यन्ते । तत्राद्यपाठ एव युक्तः; इतरत्पाठत्रयन्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्रैव—विधिं बाधन्ते इति, वाधन्ते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, विधेरेव बाधात्।

तत्रैव—क्रियां निर्वर्तयति इति, क्रियानिवर्तयति इति, क्रियां निवर्तयति इति पाठत्रयं दृश्यते। तत्र तृतीयपाठ एव युक्तः, अर्थसंगतेः इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—तस्माद् यदा इति, तथा यदा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, इति शब्देन पूर्ववाक्यविच्छित्ति प्रदर्शनात्। तथा शब्दप्रयोगे तु न पूर्ववाक्यविच्छित्तिरूपस्यार्थस्य लाभ इति द्वितीयपाठो न युक्तः।

किञ्चेदमुपसंहारवाक्यं न च तथा शब्दप्रयोगे अस्य तत्त्वलाभः। किञ्च द्वितीयपाठे यदा शब्दे वीप्सा नास्ति उत्तरत्र तदा शब्दे तु साऽस्ति इत्यपि द्वितीयपाठे दोषः।

क्वचित्तु—यदा इत्येव पाठो दृश्यते केवलः, ततः पूर्वं—तथा इति, तस्मादिति वा न दृश्यते। नापि वीप्सा दृश्यते। स तु न युक्तः, पूर्वेण सहासंगतेः।

एतदग्रे—(१) जात्यवच्छिन्नकर्तव्यतावभासस्य इति, जात्यवच्छिन्नप्रतिषेधावभासस्यति,

(२) पुरुषार्थे इति, पुरुषार्थः इति,

(३) प्राधान्यात्तदङ्गमिति, प्राधान्यान्तदङ्गमिति,

(४, पराङ्गभूतं सामान्यमिति, पराङ्गभूतेषु सामान्यमिति, पराङ्गभूतामान्यमिति, पराङ्गतसामान्यमिति,

(५) इति। व्यक्तिः द्रव्यमाश्रिता इति, इति। व्यक्तिद्रव्यामाश्रिता इति, इति व्यक्तिमाश्रिता इति, इति व्यक्तिर्द्रव्यमाश्रिता इति,

(६) प्रत्ययानुवृत्तिनिमित्तमिति, प्रत्ययानुव्यक्तिनिमित्तमिति,

(७) प्रातिपदिकवाच्यामिति, प्रातिपदिकवाच्यमिति,

(८) द्रव्यजातिमेकार्थसमवेतसमवायादिति द्रव्यजातिकार्थसमवेतसमवायाऽदिति।

(९) शाब्देन तु इति, शब्देन तु इति, जात्येन तु इति,

(१०) जातिपदार्थत्वे एकस्यामिति, जातिपदार्थे एकस्यामिति,

(११) एकस्यामपि च व्यक्तौ इति, एकस्याञ्च व्यक्ताविति,

(१२) न काचित् क्षतिरिति, न कांचित्कृतिरिति,

(१३) कामनाहेतुकश्च विधिरिति, कामनाहेतु कश्चिद्विधिरिति,

(१४) सत्यां कामनायामिति, असत्यां कामनायामिति, सत्त्यकामनायामिति,

(१५) अनुष्ठानाविरोध इति, अनुष्ठानंविरोध इति,

(१६) एवं प्रतिषेधेऽपि इति, यवं प्रतिषेधेऽपि इति,

(१७) वाक्यकार इति, वार्तिककार इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१८) स्वाश्रयसमवायावियोगादिति, स्वाश्रयसमवायाविरोधादिति,
(१९) अतएव चासामिति, अतएव यासामिति,
(२०) कार्यसिद्धेरिति, कर्यसिद्धेरिति,
(२१) आश्रयेषु प्रतिनियतेषु भाव इति, प्रतिनियतेषु भाव इति,
(२२) अभिधीयते इति, अभिधायते इति,

यथा जलादिभिर्व्यक्तम् ॥ २९ ।

इति कारिकायाः प्रथमे पादे—
(२३) यथा जलादिभिरिति, यथा जालादिभिरिति,
(२४) अत्रैव—व्यक्तमिति, युक्तमिति,
(२५) द्वितीये पादे—अभिधीयते इति, अभिधायते इति,
(२६) तृतीये पादे - अभिव्यक्ता इति, अभिव्यक्तिरिति,
(२७) विरुद्धपरिमाणेषु इत्यादिना इति, विरुद्धपरिमाणेश्वित्यादिना इति,
(२८) दृश्यमानं मुखशब्दाभिधेयमिति, दृश्यमानमुखशब्दाभिधेयमिति,
(२९) एवं शब्दोऽपि इति, एवं शब्दोऽभिइति,
(३०) इतः पूर्वम्—आदर्शादिव्यञ्जकरहितमिति, आदर्शादिव्यञ्जकरहिते इति, आदर्शाभिव्यञ्जकरहितमिति,
(३१) सर्वत्राभेदादिति, सर्वत्र भेदात् इति,
(३२) शाब्दे ज्ञाने इति, शाब्दो ज्ञाने इति,
(३३) प्रतीयते इति, प्रतीतेरिति,
(३४) ऐन्द्रियके तु इति, ऐन्द्रीयके तु इति,
(३५) विवेकानवसायादिति, विवेकावसायादिति, विवेकावसायामिति,
(३६) जातिव्यक्त्योः संमूर्छितावभास इति, जातिव्यक्त्योः······क्षतिरिति, व्यक्तेः संमूर्छितोऽवभास इति,
(३७) शब्दस्य तु इति, शब्दे तु इति,
(३८) कथं शब्दज्ञानविषयतया इति, यथैव······विषयतयेति,
(३९) यद्येवं शब्दादप्रतीयमाना इति, यथैवं शब्दाभासप्रतीयमाना इति,
(४०) जातिर्विशिष्युरिति, जातिर्विशिष्युरिति,
(४१) इत्याशङ्क्याह इति, इत्याह इति,

यथेन्द्रियगतो भेदः ॥ ३० ।

इति कारिकायाः प्रथमे पादे—
(४२) यथेन्द्रियगतो भेद इति, यमनोत्रेदृतो भेद इति,
(४३) तृतीये पादे—इन्द्रियार्थेष्वदृष्टोऽपि इति, इन्द्रियार्थेऽप्यदृष्टोऽपि इति, इन्द्रियार्थोपदृश्योऽपि इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथात्मरूपग्रहणात् ।। ३१ ।

इति कारिकाया द्वितीय पादे—

(४४) व्यक्तयो विना इति, व्यक्तये विना इति, व्यक्तयौ विना इति,

(४५) तृतीये पादे—सामान्यज्ञानभेदानामिति सामान्यज्ञानभेदायामिति,

(४६(निमित्ततामिति, निमित्तत्वमिति,

(४६) अस्यैव कारिकाद्वयस्य व्याख्याने हेजाराजीये—शब्दाद्युपलब्ध्यन्यथानुपपत्त्याऽनुमितसत्त्वानि इति, शब्दायुगपदुलब्ध्यन्यथानुपपत्त्याऽनुमित्तसत्त्वानि इति, शब्दाद् युगपदुपलब्ध्यन्यथाऽनुपपत्त्यानुमितसत्त्वानि इति, शब्दाद्युपलब्ध्यनुमन्यानुमितसत्त्वानि इति, शब्दाद्युपलब्ध्यन्यथानुपपत्त्याऽनुमिति सत्त्वानि इति,

(४८) नित्यपरोक्षत्वादनुपलभ्यमानस्वगतचक्षुः श्रोत्रादिविशेषाणि इति, नित्यपरोक्षत्वानुपलभ्यमानस्वगतचक्षुः श्रोत्रादिविशेषाणि इति, नित्यपरोक्षत्वादनुपलभ्यमानावगतचक्षुः श्रोत्रादिविशेषाणि इति,

(४९) चाक्षुषादिप्रत्ययविशेषहेतुभावमिति, चाक्षुषादिविशेषप्रत्ययभहेतुभावमिति, चाक्षुषादिविशेषप्रत्ययेहेतुभावमिति,

(५०) प्रतिपद्यन्ते इति, प्रतिपद्यते इति,

(५१) श्रोत्रेन्द्रियकार्यमिति, श्रोत्रंन्द्रियं कार्यमिति,

(५२) केषांचिदेव इति, केषाचिद्देव इति,

(५३) काश्चन इति, काँश्चन इति,

(५४) सामान्यज्ञानभेदानामिति, सामान्ये ज्ञान भेदानामिति,

(५५) प्रत्यक्षप्रत्ययानामिवोपयान्ति इति, प्रत्यक्षप्रत्ययानामिहोपयान्ति इति ।

(५६) हेतुतामिति, हन्तुतामिति ।

(५७) व्क्तयः इति, व्यक्तव्य इति ।

(५८) शाब्दे प्रत्यये इति, पुनः शाब्दे प्रत्यये इति, शाब्दे पुनः प्रत्यये इति,

(५९) शाब्दे प्रत्यये शब्दार्थभूतानामिति, शाब्दे प्रत्ययशब्दार्थभूतानामिति, शब्दार्थप्रत्ययानामिति,

(६०) समवायनियमादिति, समवायमिवमादिति, समवाद्यनियमादिति,

(६१) विशेषमावेदयन्तीति, विशेषमाव्दयन्तीति,

(६२) न साङ्कर्यमिति, सांकर्यमिति पाठाः यथा क्रमं समुपलभ्यन्ते ।

तत्र प्रथमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । वस्तुतस्तु जात्यवच्छिन्नहननकर्तव्यताप्रतिषेधावभासस्येति पाठो युक्तः, अर्थसङ्गतेः ।

द्वितीये द्विके—आद्यपाठ एव युक्तः, सर्वत्रेति विशेषणे सप्तमीदर्शनात् ।

तृतीये पाठद्विकेऽपि—आद्यपाठ एव युक्तः, अर्थसङ्गतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्थे पाठचतुष्टये—प्रथमचतुर्थपाठौयुक्तौ, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

पञ्चमे पाठचतुष्टये—आदितः पाठत्रयं युक्तम्, अर्थसंगतेः, चातुर्थपाठस्तु अर्थासंगत्याऽयुक्तः ।

षष्ठे पाठद्विके—आद्यपाठ एव युक्तः, जातेः प्रत्यायानुवृत्तिनिमित्तत्वात्, प्रत्ययानुव्यक्तिनिमित्तत्वाभावाच्च ।

सप्तमे द्विके—आद्यपाठ एव युक्तः, द्रव्यजातिरूपायाः स्त्रियाविशेष्यत्वात् । अतएव द्वितीयपाठो न युक्तः ।

अष्टमे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

नवमे त्रिके—आद्यपाठ एवयुक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

दशमे द्विके—पाठद्वयमपि साधु, अर्थसंगतेः ।

एकादशे द्विकेऽपि—पाठद्वयमपि साधु, अर्थसंगतेः ।

द्वादशे द्विके—प्रथमपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

त्रयोदशे द्विके—प्रथमपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु उभयाभावादयुक्तः ।

चतुर्दशे त्रिके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

पञ्चदशे द्विके—आद्यपाठो युक्तः यदि पूर्वत्र सत्यां कामनायामिति पाठः, द्वितीयपाठस्तु तदा युक्तः यदा असत्यां कामनायामिति पूर्वत्र पाठः ।

षोडशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीय पाठस्तु तदुभयाभावादयुक्तः ।

सप्तदशे द्विके—उभयमपि साधु, वाक्यशब्दस्य वार्तिकपरत्वात् ।

अष्टादशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थापत्त्याविविक्षितार्थलाभ इति, मन्दप्रतिपत्तिकत्वादयुक्तो द्वितीयपाठः ।

एकोनविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अग्रे तच्छब्दाभावादयुक्तः ।

विंशे द्विके—प्रथमपाठोऽर्थसंगत्याशब्दशुद्ध्या च युक्तः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एकविंशे द्विके—पाठद्वयमपि साधु, अर्थसंगतेः ।

वा० प० १७

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वाविंशे द्विके—प्रथमपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

त्रयोविंशे द्विके—आद्यपाठ एवयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

चतुर्विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

पञ्चविंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीय पाठस्तु शब्दाशुद्ध्याऽयुक्तः।

षड्विंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

सप्तविंशे द्विके—द्वितीयपाठो न युक्तः, शब्दाशुद्धेः।

अष्टाविंशे द्विके—आद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु न युक्तः दृश्यमानेत्यस्य समासे मुख्यविशेषणत्वापत्त्या समासे उद्देश्यत्वानुपपत्तिः।

एकोनत्रिंशे द्विके—आद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतस्मात् पाठात्पूर्वं त्रिंशे त्रिके—प्रथमपाठोऽर्थसंगत्या युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु युक्त एव, किन्तु तत्र कर्मधारयः आदर्शं रूपं यदभिव्यञ्जकं तद्रहितमिति।

एकत्रिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगते। द्वितीयपाठे तु नार्थसंगतिः। जातितदाश्रयोर्भेदे हि न केवलाजातिरभिधेया स्यात्।

द्वात्रिंशे द्विके—प्रथमपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्यायुक्तः।

त्रयस्त्रिंशे द्विके—प्रथमपाठो न युक्तः, अर्थासंगतेः. द्वितीयपाठस्तु अर्थसंगत्यायुक्तः।

चतुस्त्रिंशे द्विके—तु आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याशब्दाशुद्ध्याचायुक्तः।

पञ्चत्रिंशे त्रिके—तु आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीय तृतीयपाठौ तु अर्थासंगत्या शब्दाशुद्ध्या चायुक्तौ।

षट्त्रिंशे त्रिके—प्रथमपाठोऽर्थसंगत्यासमुचितः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु साहित्यप्रतियोगिनोऽनिर्देशात् अयुक्तः।

सप्तत्रिंशे द्विके—उभयमपि साधु, अर्थसंगतेः।

अष्टात्रिंशे द्विके तु, आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्थाप्रतिपत्त्यायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकोनचत्वारिंशे द्विके—प्रथमपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

चत्वारिंशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धचाऽयुक्तः ।

एकचत्वारिंशे द्विके—पाठद्वयमपि युक्तम् अर्थसंगतेः ।

द्वाचत्वारिंशे द्विके—प्रथमपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धचाऽर्थासंगत्या चायुक्तः ।

त्रिचत्वारिंशे त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अयुक्तः, प्रथमस्यापि शब्दस्य वैयर्थ्यात् । तृतीयपाठस्तु अत्यन्तमर्थासंगत्याऽयुक्तः ।

चतुश्चत्वारिंशे त्रिके—आद्यपाठ एव युक्तः, व्यक्तय इत्यस्य उपयान्ति निमित्ततामित्यत्र कर्तृत्वप्रसिद्धेः, द्वितीयपाठस्तु तदप्रसिद्धचाऽयुक्तः, तृतीयपाठोऽपि अयुक्त एव—उपयान्ति इत्यस्य कर्तृत्वप्रसिद्धेः शब्दासाधुत्वाच्च ।

पञ्चचत्वारिंशे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु शब्दासाधुत्वमर्थासंगतिश्च ।

षट्चत्वारिंशे द्विके—पाठद्वयमपि यद्यपि अर्थसंगत्यायुक्तम् । तथापि द्वितीयपाठे छन्दो भङ्गोदोषः ।

सप्तचत्वारिंशे पञ्चके—प्रथमपाठो युक्तः अर्थसंगतेः इतरे चत्वारस्तु पाठाः अर्थासंगत्या यथा संभवं शब्दाशुद्धचाचायुक्तः ।

अष्टाचत्वारिंशे त्रिके—पाठत्रयमपि साधु तथा हि प्रथमे पाठे—अर्थसंगतिः स्फुटैव द्वितीयपाठे तु नित्यपरोक्षत्वेन अनुपलभ्यमानाः स्वगतचक्षुः श्रोत्रादिविशेषा येषां तानि तथा भूतानि इत्यर्थः ।

तृतीयपाठे तु—नित्यपरोक्षत्वाद्—न उपलभ्यमानाः—नावगताश्च चक्षुः श्रोत्रादिविशेषा येषां तानि तादृशानि इत्यर्थे । सकृच्छ्रुतस्य नञो द्वन्द्वीकृते उपलभ्यमानावगतत्वे अन्वयः ।

एकोनपञ्चाशत्तमेत्रिके—प्रथमपाठो युक्तः अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । तृतीयपाठस्तु युक्त एव, अर्थसंगतेः ।

पञ्चाशे पाठद्विके—आद्यपाठ एवयुक्तः, पूर्वम् इन्द्रियाणि इति बहुवचनान्तस्य कर्तृपदस्योपादानात् । अतएव द्वितीयपाठो न युक्तः ।

एकपञ्चाशे पाठद्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

द्विपञ्चाशे पाठद्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

त्रिपञ्चाशे पाठद्विके—प्रथमः पाठ एव युक्तः, व्यक्तय इत्यनेन सामानाधिकरण्यस्यौचित्यात् । द्वितीयपाठस्तु अत्र वाक्येऽन्वयानर्हत्वाद् हेयः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुष्पञ्चाशे पाठद्विके—पाठद्वयमपि साधु, अर्थसंगतेः ।

पञ्चपञ्चाशे पाठद्विके—पाठद्वयमपि साधु, अर्थसंगतेः ।

षट्पञ्चाशे-पाठद्विके—आद्यपाठो युक्तः, अर्थसंगतेः; द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

सप्तपञ्चाशे पाठद्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीय पाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

अष्टापञ्चाशे पाठत्रिके—पाठत्रयमपि साधु, अर्थसंगतेः ।

एकोनषष्टितमे पाठत्रिके—आद्यपाठो युक्तः अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्ध्याऽयुक्तौ ।

षष्टितमे पाठत्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तौ ।

एकषष्टितमे पाठद्विके—प्रथमपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

द्विषष्टितमे पाठद्विके—प्रथमपाठो युक्तः, अर्थसंगतेः । शब्दार्थ इत्यर्थ इत्यत्र शब्दार्थे इति सप्तम्यन्तपाठश्च्छेद्यः । सांकर्यमिति नञ् रहितो द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः ।

एतदग्रे (हेलाराजीये)—गृहीततत्वाद् व्युत्पन्नसंबन्धस्यापि इति, गृहीततत्वादव्युत्पन्नसंबन्धस्यापि इति, गृहीततत्वाष्युत्पन्नसंबन्धस्यापि इति पाठत्रयं समुपलभ्यते । तत्र मध्यमो द्वितीयपाठ एव युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

अत्रैव—अव्युत्पन्नसंबन्धस्यापि तद्विषयावसायाविरोधादिति, अव्युत्पन्नसंबन्धस्यतद्विषयावसायाविरोधादिति पाठद्वयं दृश्यते । तत्राद्यपाठ एव युक्तः, अर्थसंगत्यै अपि शब्दपाठस्यौचित्यात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे हेलाराजीये एव—एतावता इति, अभावता इति, साम्येन इति, सामान्येन इति, अत्रेन्द्रियाणि इति, अन्वेन्द्रियाणि इति, दृष्टान्त इति, दृष्टात इति पाठाः समुपलभ्यन्ते । तत्र सर्वेषु युग्मेषु आद्यपाठा एव युक्ताः अर्थसंगतेः, द्वितीये युग्मे तु उभयमपि साधु, अर्थसंगतेः ।

एतदग्रे हेलाराजीये—सामन्यज्ञानभेदानामिति, सामान्यज्ञाने भेदानामिति काश्चनैव इति, काश्चननैव इति, इति लभ्यते इति, इति लभ्यन्ते इति पाठाः लभ्यन्ते ।

तत्र प्रथमे द्विके—आद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्थाप्रत्यायकत्वादयुक्तः । द्वितीयेऽपि युग्मे एवमेव । तृतीयेऽपि आद्यपाठ एव युक्तः, इतिना वाक्यार्थस्य एकत्वसंख्यावतो लाभकर्मत्वेन परामर्शात् । अतएव द्वितीयपाठो न युक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—केवलजात्यभिधानपक्ष इति, केवलं जात्यभिधानपक्ष इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत्र पाठे कैवल्यं जातिविशेषणम् औचित्यात्। द्वितीयपाठे तु कैवल्यं समर्थनक्रियाविशेषणमिति विवक्षितार्थालाभः।

एतदग्रे—जात्युपरक्ते इति, जात्युपलक्षिते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः।

तथा हि जात्युपरक्ते इत्यस्य जातिविशिष्टे इत्यर्थः। उपरागोऽत्र संबन्धरूपः। स च जाते र्विशेषणत्वे सत्येव संभवति। तथैव च जात्युपरक्ते द्रव्येऽभिधाविश्रान्तेर्विरम्यव्यापाराभावादिति अत्रत्य हेलाराजीयग्रन्थसंगतिः।

जात्युपलक्षिते इति पाठे तु केवलजात्यभिधानपक्ष एव समायाति। स च नात्र विवक्षितः। तद्वदभिधानपक्षे तु इत्युपक्रमे श्रवणात्।

एतदनन्तरम्—द्रव्येऽभिधाविश्रान्तेरिति द्रव्यभिधायिश्रान्तेरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अनभिधीयमानैवोपलक्षणमिति, अनभिधीयमानैवमुपलक्षणमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अवधारणार्थकैवकारेणैवार्थसंगतेः। द्वितीयपाठे तु एवमित्यस्य वैयर्थ्यम्।

सत्त्यासत्त्यौ तु यौ भावौ ॥ ३२ ।

इति कारिकाया अवतरणिकायां— यदुक्तं प्राक् इति, यदुक्त प्राक् इति पाठद्वयं दृश्यते। अत्र तु स्फुटमेव पाठौचित्यम्।

एतदग्रे—अत्रापि मते इति, अप्नापि मते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाटस्तु शब्दाशुद्धयाऽयुक्तः।

अस्याः कारिकायाः प्रथमे पादे—यौ भावौ इति, यौ भागौ इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अस्या एव कारिकाया द्वितीये पादे प्रतिभावं व्यवस्थितौ इति, प्रतिभागं व्यवस्थितौ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाटस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव तृतीये पादे— सत्यं यत्तत्र सा इति, सत्यं यत्य सा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयः पाठस्तु शब्दाशुद्धयाऽर्था संगत्या चायुक्तः।

अस्या एव व्याख्याने हेलाराजीये—अविद्याप्रवृत्तिरूपस्येति, अविद्यावृत्तिरूपस्येति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः, वृत्तिरत्र व्यापारः परिणामो वा।

अत्रैव—अविद्याप्रवृत्तिरूपस्येति, अविद्याप्रवृत्तिभेदस्येति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सर्वपदार्थेषु इति, सर्वेषु इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—आगमापायिन इति, आगमान्ययिन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—भेदप्रत्ययेषु इति, भेदे श्रं प्रत्ययेषु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु उभयाभावादयुक्तः।

एतदग्रे—अद्वैतिभिरिति, अद्वैतवादिभिरिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—तद् यथा इति, तथा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विकारा इति, विकरा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्या युक्तः, द्वितीयपाटस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—परस्परोपमर्देन इति, परस्परोपप्रमर्दनेन इति, परस्परमपमर्दे नु इति पाठत्रयं। तत्राद्यं पाठद्वयं युक्तम्, अर्थसंगतेः, तृतीयपाठस्तु अयुक्तः, अर्थासंगतेः।

एतदग्रे—अस्थिरप्रत्ययविषया इति, स्थिरप्रत्ययविषया इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्यायुक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सत्यमन्वयिविज्ञानावसेयसतत्त्वम् इति, समन्वयिविज्ञानादवसेयसतत्त्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाटस्तु सुवर्णे सत्यत्वासाधकत्वादयुक्तः।

एतदग्रे—तेज इत्येव इति, करतेज इत्येवेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु करपदं व्यर्थम्।

एतदग्रे—तत्कारणमित्यन्त्या इति, तत्करणमित्यात्मा इति, तत्करणमिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—विज्ञानम्, विज्ञाने इति ज्ञानम्, ज्ञाने इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—ओं अथ तद् ब्रह्म इति, ओं अथ तद् इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठे तु तदित्यनेन उद्दिष्टस्य विधेयबोधकं पदं नास्ति इति विवक्षितार्थाबोधनमेव दोष इति।

एतदग्रे हेलाराजीये--प्रतिभावम् इति, पृथिप्रतिभा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे--परमतेन इति, परमते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—वस्तूनां भेदाद् वीप्सा इति, भावानां भेदाद् वीप्सा इति, भावाभेदाद् वीप्सा इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—वीप्सा इति, वीप्सायामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सर्वत्रानुगमादेवेति, सर्वत्रनुगमादेवेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अभावाप्रतियोगि इति, अभावप्रतियोगि इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, ब्रह्मरूपाया महासत्ताया अभावाप्रतियोगित्वात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः

अत्रैव—अभातदप्रतियोगि इति, पाठोऽपि दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रमाणं नस्ते भगवन्त इति। भगप्रमाणं नस्ते भगवन्त इति। नमस्ते भगवत इति भगभगप्रमाणमिति भगवन्त इति, इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अन्यत्तु पाठत्रयमर्थासंगत्याऽयुक्तम्। शब्दाशुद्धेश्च।

संबन्धिभेदात्सत्तैव ॥ ३३।

इति कारिकाया अवतरणिकायां हेलाराजीये—चात्राद्वयनये इति, चात्राद्वैतनये इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम् अर्थसंगतेः।

एतदग्रे—परमार्थसत्येकैव इति, परमार्थसत्ये सैव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः। तथा हि—अत्र पाठे सैव इत्यनेन कस्य भावस्य परामर्श इति वक्तुं न शक्यते। महासत्ताया यत्पदेन पूर्वमनिर्देशात्।

एतदग्रे—परब्रह्मस्वभावा इति, परमब्रह्मस्वभावा इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः।

एतदग्रे—गोत्वादि जातिभेदेन इति, गोत्वादिभेदेन इति पाठद्वयं दृश्यते। तदुभयमपि अर्थसङ्गत्यासाधुः।

एतदग्रे—विवर्ते इति, व्यावर्ते इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसङ्गतेः। विवर्तः—अतात्त्विकोऽन्यथाभावः। द्वितीयपाठे तु विवक्षितार्थासिद्धिः।

अस्याः कारिकायाः प्रथमे पादे—संबन्धिभेदात्सत्तैव इति, सहैव भेदात्सत्तैव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः, आद्यपाठमादायैव हेलाराजीये व्याख्यानाच्च।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्याः कारिकाया व्याख्याने हेलाराजीये—स्वसंबन्धिभिर्भिद्यमाना उपचरितभेदा इति, स्वसंबन्धिभिर्भिमानोपचितये इति, स्वसंबन्धिभिः सिध्यमानोपचरितभेदा इति. पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्।

एतदग्रे—गोः सत्ता इति, गोसता इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसगतेः, द्वितीयपाठस्तु अर्थासङ्गत्याशब्दाशुद्धया चायुक्तः।

एतदग्रे—प्रतिभासते इति, प्रविभासते इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसङ्गतेः।

एतदग्रे—अश्वस्य सत्ता इति, अश्वस्य सता इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे—अश्वत्वमित्यादि इति, भवस्यत्वमित्यादि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसङ्गत्यायुक्तः, द्वितीयपाठस्तु विवक्षितार्थासिद्ध्याऽयुक्तः।

एतदग्रे—डित्थादयश्चेति, रित्थादयश्चेति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः।

एतदग्रे—जात्यभिधायिन इति, क्रात्यभिधायिन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—सिद्धा इति, सिद्धात्त इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

तां प्रातिपदिकार्थश्च ॥ ३४ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—सर्वशब्दविषयत्वमेवाभिव्यनक्ति इति, सर्वशब्दविषयत्वेमवाभिव्यनक्तिः इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसङ्गत्यायुक्तः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अस्याः कारिकायाः प्रथमे पादे—प्रातिपदिकार्थञ्चेति, प्रतिपदिकार्थञ्चेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठे तु अर्थासङ्गतिः, शब्दाशुद्धिः, छन्दोभङ्गश्चेति दोषत्रयम्।

अस्या एव द्वितीये पादे—धात्वर्थं चेति, धात्वार्थज्जेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतत्कारिकाया व्याख्याने हेलाराजीये—सद्रूपमिति, तद्रूपमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे—महासत्तयाऽनया वियोगात् इति, महासताया वियोगादिति, महासत्तयाऽनयापि योगादिति, सतावियोगादिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—धातुभिरपि इति, धातोरपि इति पाठद्वयं दृश्यते। तदुभयमपि साधु सत्तैवाभिधेयत्वमापद्यते इत्यनेन वक्ष्यमाणेन संबन्धसंभवात्।

एतदग्रे – साधनाधीनलब्धजन्मसु इति, साधनाधीनलब्धो जन्मसु इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च । द्वितीयपाठस्तु तदुभयाभावादयुक्तः ।

एतदग्रे—समवेता इति, समवेत इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, सत्तैव इति वक्ष्यमाणेन संबन्धसंभवात्। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—यथोपाध्युपगृहीतनानात्वा इति, यथापाध्युपगृहीतनानात्वा इति, यथोपाध्युपगृहीतनानात्वात् इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्।

एतदग्रे—अभिधेयत्वमापाद्यते इति, अभिधेयतामापाद्यते इति, अभिधेयधायकमापाद्यते इति, अभिधेयक्रमापाद्यते इति पाठचतुष्टयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्।

अत्रैव—आपाद्यते इति, आपद्यते इति पाठद्वयं दृश्यते।

तत्र पूर्वम्—धातुभिरिति पाठे आद्यपाठो युक्तः, अर्थसङ्गतेः, धातोरपि इति पाठे तु द्वितीयपाठो युक्तः।

एतदग्रे—तस्या एव वृत्तेरिति, तस्या एव विवृत्तेरिति, तस्या एव व्यावृत्तेरिति तस्या एव निवृत्तेरिति पाठचतुष्टयं प्रतीयते। तत्राद्यं पाठद्वयमेव साधु, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—तदपरराश्यभावादिति, तदपरणयभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सर्वशब्दविषयत्वं सत्ताया इति, सर्वशब्दविषयात्वं सताया इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—प्रत्ययभागेनाप्यत्र इति, प्रत्ययभागे याऽपित्र इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीथपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सा चोदयव्ययरहितत्वादिति, स चौदयव्ययरहित्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—सत्प्रत्ययस्य इति, सत्यप्रत्यायस्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयायुक्तः।

एतदग्रे—"षड्विशेषपरिणामा" इति, यड् विशेषाः परिणामा इति, षद्विशेषपरिमाणा इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासङ्गत्याशब्दाशुद्धया चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—यत्तत्परम् इति, यतः परम् इति, यात् परम् इति पाठत्रयं दृश्यते। तत्राद्यपाठएव युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याशब्दाशुद्धया चायुक्तम्।

एतदग्रे—महत्यात्मनि इति, महत्त्वात्मनि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विबृद्धिकाष्ठामिति, वृद्धिकाष्ठामिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः, वृद्धिकार्यमिति तृतीयपाठोऽपि अर्थासंगत्याऽयुक्त एव।

एतदग्रे—तस्मिन्नेव इति, तस्मिंश्चेति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्।

एतदग्रे—यत्तन्निः सत्तासत्तं निः सदसद् इति, यन्निः सत्वासतासदससहृद इति, यत्तन्निः सत्तां सत्तं इति, यनिः सत्तासत्तम् इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—सांख्ये बुद्धितत्त्वमिति, सांख्ये बुद्धिमत्त्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जगत्कारणं निर्दिष्टमिति, जगत्कारणविशिष्टमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विकारग्रामस्येति, विकारग्रासस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सत्तारूपत्वमविरुद्धमिति, इति सत्तारूपमविरुद्धमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, विकारग्रामस्येति पूर्वमुक्तेन समन्वयसंभवात्। तदभावाद् द्वितीयपाठो न युक्तः।

एतदग्रे—इति सत्तारूपं सर्वं जगदाख्यातं भवतीति, इति सत्तारूपं········ भवतीति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, वाक्यस्य पूर्णत्वात्। तदभावात्तु द्वितीयपाठो न युक्तः।

एतदग्रे—सांख्यनयेनाप्युपवृंहित इति, सांख्यनयेनाभ्युपवृंहित इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः, साधुतरन्त्वाद्यम्।

एतदग्रे—सर्वशब्दवाच्या सत्ता इति, सर्वशब्दवाच्या सता इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विरुद्धमतिक्त्त्वादयुक्तः।

एतदग्रे—यथायथं भिन्नोपाधिभावप्रत्ययाभिधेया इति, यथा भिन्नोपाधिभावप्रत्ययाभिधेया इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रकृतिप्रत्यययोरेकार्थता प्रसङ्ग इति, प्रत्यययोरेकार्थताप्रसङ्ग इति, प्रकृतिप्रत्ययार्थयोरेकार्थताप्रसंग इति, प्रकृतिप्रत्यययोरेकार्थताप्रसक्ता इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठः चतुर्थपाठश्च युक्तौ, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—उपाधिभेदेन इति, क्रियाभेदेन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सर्वोपाधिसंग्राहकत्वात् द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—गवाश्रयाया इति, गवाश्रयेन या इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाउस्तु तदभावादयुक्तः।

एतदग्रे—प्रकृत्यर्थनिमित्तश्चेति, प्रकृत्यर्थनिमित्तञ्चेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, भावप्रत्ययभेद इत्यनेन समन्वयसंभवात्। द्वितीयपाठस्तु तदभावादयुक्तः।

क्वचित्तु—प्रकृत्यनिमित्तस्वभावप्रत्ययभेद इति पाठो दृश्यते। सोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—सांकर्यप्रसंग इति, सांकर्ये प्रसंग इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, प्रसंगाधारनिर्देशापेक्षया तत्प्रतियोगिनिर्देशस्यैवात्रौचित्यात्।

प्राप्तक्रम विशेषु ॥३५॥

इति कारिकाया अवतरणिकायां हेलाराजीये—तां प्रातिपदिकार्थञ्चेति, ता प्रतिपदिकार्थञ्चेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु तदभावादयुक्तः।

अस्याः कारिकायाः प्रथमे पादे—प्राप्तक्रमाविशेषेषु इति, प्राप्तक्रमविशेषेषु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्यायुक्तः, द्वितीयपाठस्तु तदभावादयुक्तः।

अस्या एव कारिकाया द्वितीये पादे—सैवाभीधीयते इति, सैवाभिधायते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतत्कारिकाया व्याख्याने हेलाराजीये—सत्त्ववाचितामेति इति, सत्त्ववाचीनामेति इति, सत्त्ववाचिनामेति इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तौ।

एतदग्रे—सत्तैव इति, सत्त्वैव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—साधनपरिस्पन्दवशादिति, साधितपरिस्पन्दवशादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः. अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—विशेषशब्दवाच्यानामिति, विशेषसहवाच्यानामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—पौवापर्ये इति, पौर्वापर्येण इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—जातिस्तथात्वेन इति, जो। तयाथातश्चत्वेन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सैव सक्रमाक्रिया इति, सैव साक्षात्सत्ताख्या क्रिया इति, सैव साक्षात्सक्रमाक्रिया इति, सैव साक्षात् क्रिया इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—साधनसंपर्कहेतुक इति, साधनसम्पत्तिहेतुक इति, साधनसंकर्महेतुक इति पाठत्रयं दृश्यते। तत्राद्यपाठद्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रतायमानरूपापरामर्शे इति, प्रतीयमानरूपापरामर्शे इति, प्रतीपपरामर्शे इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—परस्य ब्रह्मण इति, परः ब्रह्मण इति पाटद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाटस्तु तदभावादयुक्तः।

एतदग्रे—सद्भ्यः सत्ता इति, सद्भिः सत्ता इति, सद्‌ध्यः सत्ता इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयं तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तम्।

एतदग्रे—सत्ताव्यतिरिक्ताभावत इति, सत्ताव्यतिरिक्ताभाव इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्यायुक्तः, द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—यद्यपि च इति, च यद्यपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, लेखकसंप्रदायाविरोधात्। तद्विरोधात्तु द्वितीयपाठो न युक्तः।

एतदग्रे—अभिधामुपाधिभेदभिन्नस्येति, अभिधानमुपाधिभेदभिन्नस्येति पाठद्वयं दृश्यते। अभिधाशब्दस्य शक्तौ प्रसिद्धस्य अत्र प्रयोगानौचित्यात् प्रथम पाठो न युक्तः। द्वितीयपाठस्तु अर्थसंगत्यायुक्तः।

एतदग्रे—सर्वत्रान्वयिरूपं जात्यात्मना इति, सर्वत्र जात्यात्मना इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—परिनिष्ठितरूपमिति, परिशिष्टस्वरूपमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—परमार्थतयेति दर्शनविकल्प इति, परमार्थतयेति इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—दर्शनविकल्पः अयमेव च पक्षद्वयेऽपि इति, दर्शनविकल्पाश्रयमेवं च पक्षद्वयेऽपि इति, दर्शनविकल्पा अयमेव च इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठोऽपि न युक्तः, दर्शनविकल्पा इति बहुवचनपाठस्य पक्षद्वयेऽपि इति वक्ष्यमाणेन सह विरोधात्।

एतदग्रे—एकपक्षीभावरूपः सिद्धान्त इति, एकपक्षीभावः सिद्धान्त इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—सर्वपार्षदत्वात्पुनरस्येति, सर्वपार्षदत्वा पुनरस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—एष च सर्वत्रैवास्य इति, एवं च सर्वत्रैवास्य इति, एष च सर्वस्य वास्य इति, पाठत्रयं दृश्यते। तत्राद्यं पाटद्वयं युक्तम्, अर्थसंगतेः, तृतीयपाटस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—ब्रह्मदर्शननयेनैव इति, ब्रह्मदर्शननयेनैवमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अवधारणार्थकस्य एवकारस्य अत्रौचित्यात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—संबन्धादिविचारे विनिगमनादिति, सम्बन्धादिविचारे विनिगमादिति, सम्बन्धादिविचारेऽपि निगमनादिति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः। तथा हि—निगमनम् उपसंहारः, तत्राद्यपाठे विशेषेण निगमनं विनिगमनमिति। द्वितीयपाठस्तु न युक्तः, विनिगमशब्दस्योपसंहारेऽप्रयोगादिति।

सैव भावविकारेषु ॥३६॥

इति कारिकायाः प्रथमे पादे—भावविकारेषु इति, भावे विकारेषु इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

तृतीये पादे—शक्तिभिः स्वाभिरिति, शक्तिभिस्ताभिरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाटस्तु न युक्तः, पूर्वं शक्तीनां यच्छब्देनानिर्देशात्।

एतत्कारिकाव्याख्याने हेलाराजीये—भावविकारा भवन्तीति, भावविकाराः सम्भवन्तीति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदग्रे—भगवान् वार्ष्यायणिरिति, भगवान् निरुक्तः कार इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। यदि तु निरुक्तकार इति पाठः स्यात्तदा सोऽपि साधुः स्यात्।

एतदग्रे—परमार्थरूपस्य इति, परमार्थरूपस्यै इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—विकारा इत्यर्थ इति, विकारः इत्यत्र इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सत्तोत्तरोत्तरविकारापत्तौ इति, स्वतो तरोत्तरविकारापत्तौ इति, सत्तोत्तरे विकारापत्तौ इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठः शब्दाशुद्धयाऽयुक्तः, तृतीयपाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रथमतरं च सन्मात्रम् इति, प्रथमं कारस्य सन्मात्रमिति, प्रथमतरश्च सन्मात्रमिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अस्तिशब्देन इति, अस्तीशब्देन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैव—अरितशब्देन नाभिधीयते इति, अरितशब्देनाभिधीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जन्मोत्तरकालभावी इति, शब्दोत्तरकालभावी इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जन्मान्तरभावि हि रूपं तस्यालोके सदिति व्यवहार्यम् इति, जन्मान्तरभाविभीरूपांतरस्यालोके सति व्यवहार्यम् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—व्यवहार्या इति, व्यवस्थार्या इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—विपरिणमते इति, परिणमते इति पाठद्वयं दृश्यते। तदुभयमपि साधु, शब्दशुद्धेरर्थसंगतेश्च।

एतदग्रे—तच्च विपरिणमन्मुहुर्तमपि नावतिष्ठते इति, तच्च विपरिणामं मुहुर्तमपि नावतिष्टते इति, तच्च विपरीमनमुहुर्तमपि नावतिष्ठते इति, तच्च मुहुर्तमपि नावतिष्टते इति, तच्च मुहुर्तमपि नार्वतिमपि तिष्टते इति पाठपञ्चकं समुपलभ्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठचतुष्टयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

एतदग्रे—यावदनेन वर्धितव्यम् ततोऽपक्षीयते इति, यावदनेन वर्धिततततोऽपक्षीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—ततोऽपि विनाश इति, ततोऽपि नाश इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्, अर्थसंगतेः।

एतदग्रे—काश्चन शक्तय इति, काँश्चन शक्तय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—एकैव सती इति, एकैव सति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—तथा तथा इति, तथा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, पूर्वोत्तरग्रन्थानुरोधात्। तद्विरोधात्तु द्वितीयपाठोऽयुक्तः।

एतदग्रे—सर्वशक्त्यात्मभूतत्वादिति, सर्वं शक्तात्मभूतत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत एवाग्रे ब्रह्मणोऽविद्याख्या शक्तिरूपदर्शिता। अतएव द्वितीयपाठोऽयुक्तः।

अत्रैव—सर्वं शक्त्यात्मभूतत्वादिति, सर्वं शक्त्यात्मभूतत्वो इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—कथं न युगपदवभास इति, कथं न ते युगपदवभास इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु ते शब्दस्य वैयर्थ्यादयुक्तः।

आत्मभूतः क्रमोऽप्यस्याः ॥ ३७।

इति कारिका अवतरणिकायां हेलाराजीये—ब्रह्मण एवेत्याह इति, ब्रह्मण एवेत्याशङ्क्याह इति पाठद्वयं दृश्यते। तदुभयमपि युक्तम्—अर्थसंगतेः।

एतत्कारिकाव्याख्याने हेलाराजीये—योऽयं क्रियाणां क्रम इति, योऽयं पौर्वापर्येण प्रक्रम इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः। क्रमस्य नित्यं संबन्धिसापेक्षत्वात्। अतएव द्वितीयपाठो न युक्तः। किञ्चात्र पाठे पौर्वापर्येण इति प्रक्रमविशेषणं व्यर्थम्, प्रक्रमस्य नियमेन पौर्वापर्यरूपत्वात्।

एतदग्रे—प्रविभक्तत्वाद् दर्शनमपि इति, प्रविभक्तस्यादर्शनमपि इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रविभक्तमित्युक्तमिति, पौर्वापर्येण प्रविभक्तमित्युक्तमिति पाठद्वयं दृश्यते। तदुभयमपि साधु. अर्थसंगतेः।

एतदग्रे—क्रमाख्या हि कालशक्तिरिति, क्रियाख्या हि कालशक्तिरिति पाठद्वयं दृश्यते। क्रमक्रिययोर्वस्तुनोऽनतिरेकात्। क्रमो हि क्रिययोः पौर्वापर्यमिति तदुभयं साधु।

एतदग्रे—नापरो द्रव्यभूत इति, नामपरो द्रव्यभूत इति पाठद्वयं दृश्यते। तत्राद्य पाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अध्याहितकलां यस्य इति, अध्याहितकला यस्य इति, अध्यादि काला यस्य इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। अध्याहितकलामिति कालशक्तिविशेषणम्। अध्याहिताः अध्यारोपिताः कलारूपाः—अवयवरूपाः नानाशक्तयो यस्यामिति सप्तम्यर्थे बहुव्रीहिः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः तृतीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—योनय इत्यत्र इति, येन न य इत्यत्र इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दप्रमायां निर्णीतोऽयमर्थ इति, शब्दप्रभार्यानिर्णीतोऽयमर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

तिरोभावाभ्युपगमे ॥ ३८।

इति कारिकाया अवतरणिकायां हेलाराजीये—नाशस्य तावत्सत्तात्मकत्वमुपपादयति इति, नाशस्य भातात् सत्तात्मकत्वमुपपादयति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

अस्या एव कारिकारिकायाः प्रथमे पादे—तिरोभावाभ्युपगमे इति, तिराभावोऽ-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भ्युपगमे इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीय पाठस्तु तदुभयाभावादयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—अनपायोपजनविकारित्वादिति, अनयायोपजनविकारित्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—निरन्वयविनाशासहेत्यभावो नाम इति, निरवयवविनाशं सहेत्यभावो नाम इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न भावाद् व्यतिरिक्त इति, न भावाव्यतिरिक्त इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्थविरोधित्वादयुक्तः। यदि तु अभावो भावाव्यतिरिक्त इति पाठः तदा साधुः।

एतदग्रे—केवलं प्रागूर्ध्वंश्च इति, केवलं प्रागूर्ध्वता च इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि उर्ध्वता—तिरोभावमात्ररूपा इति।

एतदग्रे—भावावभासस्य इति भाववदभासस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तिरोभावावभासस्येति तृतीयपाठोऽपि क्वचिदुपलभ्यते। तत्र विधेयाविमर्शो दोषः इत्ययुक्तः सः।

एतदग्रे—यदस्माभिरभ्युपगम्यते इति, यदाऽस्माभिरभ्युपगम्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सैव नास्तिता कथ्यते इति तत्पदेन निर्देशात्। द्वितीयपाठस्तु अग्रे तदा इत्यनुक्तेरयुक्तः।

एतदग्रे—स्वकारणेषु इति, स्वत्कारणेषु इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—नाश इत्यादिनामपदप्रत्याय्यः, नामश इत्यादि नामपदप्रत्याय्य इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्था प्रत्यायकत्वादयुक्तः।

एतदग्रे—साधनसम्पर्कवशात्प्रतायमानस्वभावा इति, साधनसम्पर्कवशप्रतायमानस्वभावा इति पाठद्वयं दृश्यते। साधनसम्पर्कवशात्प्रतीयमानस्वभावा इति तृतीयपाठोऽपि क्वचिद् दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रतायमानस्वभावा विवक्षिता इति, प्रतायमानस्वभाव विवक्षिता इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः उद्देश्यविधेयभावसिद्धेः। समासे तु तदसिद्ध्या द्वितीयपाठोऽयुक्तः।

एतदग्रे—द्वौ भावविकारौ इति, द्वावेव विकारौ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अर्थसंगतेः, द्वितीयपाठे तु शब्दाशुद्धिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—प्रातिलोम्यपरिणामलक्षणौ इति, प्रातिलोम्यपरिणामलक्षणे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, अर्थासंगत्या तु द्वितीयपाठोऽयुक्तः।

एतदग्रे—तत्र च इति, अत्र च इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः। उभयोः सर्वनामप्रकृतिकत्वेन विवक्षितार्थप्रत्यायकत्वात्।

एतदग्रे—भावस्याभवनविरोधादिति, भावस्य विरोधादिति, भावस्य भवनविरोधादिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे—तिरोभावमात्रं विनाश इति तिरोभावमात्रं विनाशा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

पूर्वस्मात्प्रच्युताधर्मात् ॥ ३९ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—सत्ताप्रतियोगिनोऽपि इति, शताप्रतियोगिनोऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तद् विकारत्वमवस्थाप्यजन्मन इति, तद् विकारजन्मावस्या जन्मन इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। तद्विकारमवस्थाप्यजन्मन इति तृतीयपाठोऽपि न युक्तः, भावप्रत्ययनिर्देशे एवार्थसंगतेः।

एतदग्रे—तद् विकारत्वमिति, तद्विकारात्मत्वमिति पाठद्वयं दृश्यते। तदुभयं युक्तमर्थसंगतेः।

अस्या एव कारिकाया द्वितीये पादे—अप्राप्ता चोत्तरं पदम् इति, अप्राप्तां चोत्तरां पदमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

अस्या एव कारिकायास्तृतीये पादे—तदन्तराले भेदानामिति, पदन्तराले धर्माणामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। अत्र पाठे—भेदानामित्यस्य अवस्थाविशेषाणामित्यर्थः। द्वितीये पाठे—पदन्तराले इति पाठो न युक्तः, अर्थासंगतेः। धर्माणामिति पाठस्तु युक्त एव, धर्मपदस्यात्र कार्यावस्थापरत्वात्।

अस्याः कारिकाया व्याख्याने हेलाराजीये—कारणे इति, करणे इति, कारणेन इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। अत्र कारणपदमुपादानकारणपरम्। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—शक्तिरूपेणावस्थानाख्यादिति, शक्तिरूपेणवस्थानाख्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। भागुरिमतेन अवशब्दाकारस्य लोपाभ्युपगमे तु द्वितीयपाठोऽपि युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—धर्मान्तराभिव्यक्तिं प्रगुणां निष्ठामिति, धर्मोत्तराभिव्यक्ति प्रगुणां निष्ठामिति, धर्मान्तराभिव्यक्ति गुणनिष्ठामिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। अत्र पाठे धर्मान्तराभिव्यक्ते प्रगुणाम्-अनुकूलाम्-निष्ठां-पूर्वं-क्रियारूपाया अवस्थाया अवसानम् इत्यर्थः। द्वितीयपाठोऽर्थासंगत्याऽयुक्तः। तृतीय पाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—अप्राप्तासत्ता इति, आप्राप्ता संत्ता इति पाठद्वयं दृश्यते तत्राद्य-पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—कार्याभिमुखोत्तरोत्तरावस्थाविशेषमासादयन्ती इति, कार्याभि-मुखोत्तरावस्थाविशेषमासादयन्ती इति पाठद्वयं दृश्यते। अत्र द्वितीयपाठ एव युक्तः जायते इति व्यपदिश्यते इति अत्रत्यग्रन्थानुरोधात्। जायमानावस्थाया एकत्वात्। अत एव प्रथमपाठो न युक्तः।

एतदग्रे—नत्वसतएवोत्पादो जन्म, नासतोत्पादोजन्म इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठः शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—न सतोऽत्यन्तं विनाशः इति, नासतोऽत्यन्तंविनाश इति, न सोऽत्यन्तं विनाश इति। न सतोऽत्यन्तं नाश इति पाठपञ्चकं दृश्यते। तत्र प्रथमचतुर्थपञ्चम-पाठायुक्ताः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽयुक्तौ।

एतदग्रे—नाभूतपूर्वस्याभाव इति, नाभूतपूर्वस्याविर्भाव इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः, द्वितीयपाठस्तु युक्तः, अर्थसंगतेः।

एतदग्रे—पूर्वापरावस्थान्तरालवर्तिक्षणपरम्पराक्रमविवक्षायाञ्च इति, पूर्वाव-स्थान्तरालक्षणपरम्पराविवक्षायाञ्च इति, पूर्वापरावस्थान्तरालक्षणवर्तित्वं न पर-म्पराक्रमविवक्षायाञ्च इति, परम्पराक्रमविवक्षायाञ्चेति, पूर्वापरावस्थान्तराल-क्षणवर्तिपरम्पराक्रमविवक्षायाञ्चेति, पाठपञ्चकं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः। इतरत्पाठचतुष्टयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—न परिनिष्ठावस्थायामिति, न उपरिष्टादवस्थायामिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—पूर्वावस्थामविजहत् इति, पूर्वावस्थामजहत् इति पाठद्वयं दृश्यते। तदुभयभपि साधु, अर्थसंगतेः।

एतदग्रे—संस्पृशन् धर्ममुत्तरमिति, संस्पृशद् धर्ममुत्तरमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थात्मा इति पुंसो विशेष्यत्वात्। अतएव द्वितीयपाठो न युक्तः।

अत्रैव—धर्ममुत्तरमिति, धर्ममुत्तराम इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—संमूर्च्छित इति, समुर्च्छित इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—पूर्वावस्थासु समारोपादिति, पूर्वावस्थासमुमारोपादिति। पूर्वावस्थासमारोपादिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्। पूर्वावस्था तु समारोपादिति, पूर्वावस्थायां समारोपादित्यपि पाठद्वयमत्रैव दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः, द्वितीयपाठस्त्वत्र युक्त एव, अर्थसंगतेः।

एतदग्रे—समनन्तरमेव कर्तृत्वमिति, कर्त्रीत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः स्वप्रकृतौ लिङ्गाविवक्षया शब्दशुद्धेश्च। द्वितीयपाठे तु दोषशङ्कैव न, कर्तृत्वे इति तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—निष्ठायामिति, नीष्टायामिति, निष्टायामित्ति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽयुक्तौ।

एतदग्रे—जन्मोत्तरकाला इति, जन्मान्तरकाला इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तदयमानुलोम्यपरिणामः इति, तदेवमानुलोम्यैर्विपारणाम इति, तदयमानुलोम्यपरिणामा इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

एतदग्रे—तदेवमिति, तदैवमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठः अर्थासंगत्याऽयुक्तः।

एतदग्रे—ह्यपरः क्रियाभेदः इति, स्वपरः क्रियाभेद इति, त्वपरः क्रियाभेद इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु युक्त एव, अर्थसंगतेः।

एतदग्रे—सिद्धरूपतायामिति, सिद्धतायामिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

आश्रयः स्वात्ममात्रा वा ॥ ४० ।

इति कारिकाया अवतरणिकायां हेलाराजीये—संबन्धिनः प्रदर्शयितुमिति, संबन्धिनं दर्शयितुमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अस्या एव कारिकायाः प्रथमे पादे—आश्रयः स्वात्ममात्रा वा इति, आश्रयस्वात्ममात्रा वा इति पाठद्वयं दृश्यते। तत्राद्यपाठोः, युक्तः, अर्थसंगतेः, विकल्पोपत्तेश्च। द्वितीयपाठस्तु तदभावादयुक्तः।

द्वितीये पादे—भावा वा व्यतिरेकिण इति, वा भावा व्यतिरेकिण इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अस्या एव कारिकायास्तृतीये पादे—स्वशक्तयो वा सत्ताया इति, स्वशक्तयां वा सत्तायामिति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्या एव कारिकाया व्याख्याने हेलाराजीये—सर्वं सत्तात्मकपरब्रह्ममयम् इति, सर्वसत्तात्मकपरब्रह्ममयमिति, सर्वं सत्तात्मकं परब्रह्ममयमिति, सर्वं सत्तात्मकब्रह्ममयमिति पाठचतुष्टयं दृश्यते। तत्सर्वं साधु, अर्थसंगतेः, द्वितीयपाठस्तु उद्देश्यबोधकपदाभावदयुक्तः।

एतदग्रे—व्यवहारेऽविद्याप्रवृत्ति रूपे इति, व्यवहारे विद्याप्रवृत्तिरूपे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यथा व भासमिति, यथार्थ व भासमिति, यथा व भासः इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः। तृतीयपाठोऽपि अग्रे तथा पदाध्याहारेण युक्तः।

एतदग्रे—भेदस्यासत्त्यस्य इति, भेदस्य सत्त्यस्य इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। अद्वैतनये भेदस्य असत्त्यत्वात्। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रविभागः इति, प्रतिभाग इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एदतग्रे—तत्र आश्रयः सत्ताया इति, तत्राश्रयसताया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्वाधार इति, स्वधार इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—भेददर्शनस्य भेदावभासस्य इति, भेदावभासस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, व्याख्येयव्याख्यानयोरुभयोर्निर्देशात्। तदभावाद् द्वितीयपाठो न युक्तः।

एतदग्रे—भेदस्यैव इति, भेदस्येव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठतु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्वतोऽभेदादिति, भावतोऽभेदादिति, स्वतो भेदादिति पाठत्रयं दृश्यतें। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः द्वितीयपाठे भावत इत्यस्य स्वभावत इत्यर्थः। तृतीयपाठस्तु असाधुः, अर्थासंगतेः।

सत्ताया आश्रयो हि सत्तैव—ब्रह्मपुच्छं प्रतिष्ठा इतिवत्। तदुक्तम्—

स्वे महिम्नि प्रतिष्ठितमिति। अद्वैतनये सत्ताश्रयस्य भेदो नोपेयते।

एतदग्रे—अनेकरूपमवभासते इति, अनेकरूपमवभासन्त इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, शब्दशुद्धेश्च, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—एवं व्यञ्जकानामिति, एवं व्यञ्जकादीनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। गवादीनां व्यञ्जकत्वन्तु व्यतिरूपत्वेन, द्वितीयपाठस्त्वयुक्तः। आदिपदवैयर्थ्यात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—भेदात्सत्ता इति, भेदाः सत्ता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अयुक्तः, सत्ताया भेदाभेदाभावात्।

एतदग्रे—गोत्वाश्वत्वादिरूपतया इति, गात्वाश्वत्वादिरूपतया इति पाठद्वये आद्यः साधुः, द्वितीयस्तु शब्दाशुद्धयाऽसाधुः।

एतदग्रे—अवभासते इत्यर्थ इति, अवभास इत्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यः साधुः अर्थसंगतेः, द्वितीयस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे—गोत्वादिसामान्यविशेषा इति, गोत्वादिसामान्यविषया इति, गोत्वादिसामान्यविशेष इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु न युक्तः दर्शयन्ति इति वक्ष्यमाणेन सह सामानाधिकरण्यासंभवात्।

एतदग्रे—परिच्छिन्नविषया इति, परिच्छिन्नसर्वविषया इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। अत्र विषयशब्दः स्वाधारपरः।

एतदग्रे—सर्वविषयाया इति, सर्वविषया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विच्छिन्नावभासतामिति, विच्छिन्नाभासतामिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—दर्शयन्ति इति, दशयग्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वियीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—तैरेव इति, तेरेव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—विच्छिन्नेवाविच्छिन्नाप्यवभासते इति, विच्छिन्नेवच्छिन्नेप्यवभासते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सामान्यान्यभिधीयन्ते इति, सामान्यान्यभिधीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तुच्छन्दोभङ्गाद् हेयः।

एतदग्रे—भेदावभास इति, भेदेऽवभास इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

इतः पूर्वम्—स्वांशैरेव परिकल्पितैरिति, स्वांशैरेव कल्पितैरिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—कल्पनानिर्मितेन इति, कल्पनानिमित्तेन इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। तत्र द्वितीयपाठे—कल्पनानिमित्तं यस्मिन्निति सप्तम्यर्थे बहुव्रीहिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—स्वश्चासावात्मा चेति इति, स्वश्चासावात्मेति इति, स्वाश्चासामात्मेति इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, विग्रहवाक्यत्वेनोपपत्तेः। द्वितीय पाठोऽपि तत एव युक्तः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न ह्यात्मव्यतिरिक्त इति, न ह्यात्माव्यतिरिक्त इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—भेददर्शनहेतवः सत्ताया इति, भेददर्शनहेतवः सत्तायामिति पाठद्वयं दृश्यते। तदुभयपि युक्तम्, अर्थसंगतेः।

एतदग्रे—इहेदानीमिदमिति, वा इहेदानीमिदमिति पाठद्वयं दृश्यते। तत्र द्वितीयपाठे वा शब्दो व्यर्थः।

अत्रैव—इहेदानीमिदमन्यत्रान्यदान्यदिति देशादिनिमित्त इति, इहेदान्यदिशिदेशादिनिमित्त इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—तथा इति, तथा हि इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो युक्तः, पूर्वोक्तार्थसमर्थनपरतयार्थसंगतेः। आद्यपाठस्तु पक्षान्तराभावादसंगतः।

अत्रैव—देशासत्तिविप्रकर्षकृत इति, देशाः सन्ति विप्रकर्षकृत इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—यथाहुरिति, यथाहूरिति, याः रूपे इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठद्वयं तु शब्दाशुद्ध्याऽयुक्तम्।

एतदग्रे—यथा वा मरुषु इति, यथा वा महत्सु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तथा रात्रौ नीलोत्पलादीनामिति, रात्रौ नीलोत्पलादीनामिति पाठद्वयं दृश्यते। तत्राद्यपाठघटकं तथा इति पदमावश्यकम्। देशादिकृतभेदापेक्षया कालकृतभेदस्य पक्षान्तरगोचरत्वात्।

अत्रैव—नीलोत्पलानामिति, नीलोपलादीनामिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—अन्यथावभास इति, अन्यथावभासः यथा इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

किन्तु द्वितीयपाठे यथा पदस्याग्रे अन्यथा पदस्य च प्राक् तत इति पदमध्याहार्यम्। ततश्चात्र पाठे यथा पदस्य न प्रयोजनम्। इदञ्च पूर्णं वाक्यं क्वचिदेवमुपलभ्यते। तथा रात्रौ नीलोत्पलानामन्यथावभासः, अन्यथाऽह्नीति कालकृतो भेदः इति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्वचित्तु—तथा हरिद्रमन्यत्रान्यदान्यदिति देशादिनिमित्तो वस्तुभेदः तथा (हनीति) कालकृते भेद इति । अत्र द्वितीयपाठ उन्मत्तप्रलापवदुपेक्षणीयः ।

एतदग्रे—तथा काचकामलाद्युपहतनयनानामिति, तथा च कामलाद्युपहतनयनानामिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु च शब्दो न युक्तः, अर्थासंगतेः ।

एतदग्रे—पीतावभास इति, पीतत्वावभास इति पाठद्वयं दृश्यते । तदुभयमपि युक्तम्, अर्थसंगतेः ।

एतदग्रे—इति इन्द्रियनिमित्तो भेद इति, इति इन्द्रियकृतनिमित्तो भेद इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—योग्यताख्यास्सत्ताया इति, योग्यताख्यायास्सत्ताया इति, योग्यताख्यातसत्ताया इति पाठत्रयं समुपलभ्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीय पाठौ तु शब्दाशुद्धयाऽयुक्तौ ।

एतदग्रे—अर्थिनां यथाशयमिति, अर्थिनां यथा संशयमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—आकारनानात्वमुद्दर्शयति इति, आकारनानात्वं दर्शयति इति, आकारनानात्वमुपदर्शयति इति पाठत्रयं दृश्यते । तदेतत् त्रयमपि युक्तम्, अर्थसंगतेः ।

तत्र प्रथमपाठे—उद्दर्शयति इत्यस्य उद्गतं दर्शयति इत्यर्थः उद्भूतं वा दर्शयति इति वा ।

एतदग्रे—अविद्याविलसितसहं सांसारिकेति, अविद्याविलसितसह सांसारिकेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः ।

अत्रैव—अविद्याविलसितसहं कायं सांसारिकेति पाठोऽपि दृश्यते । अयन्तु उन्मत्तवाक्यवदुपेक्षणीयः ।

एतदग्रे—वस्तुसतत्त्वमुद्घाटितमिति । वस्तुतः त्वं समुद्घाटितमिति पाठद्वयं दृश्यते तत्राद्यपाठोऽर्थसंगत्या युक्तः । द्वितीयपाठस्तु तदभावादयुक्तः ।

पृथिव्यादिष्वभिव्यक्तौ ।। ४१ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—स्वदर्शने जातिपदार्थव्यवस्थामिति, स्वदर्शनेन जातिपदार्थव्यवस्थामिति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—गोत्वादिजातेर्यथासंभवमिति, गोत्वादिजातेयं यथासम्भवमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—धर्मश्चर्च्यते इति, धर्मश्चिन्त्यते इति, धर्मश्चोच्यते इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्, अर्थसङ्गतेः, तृतीयपाठे च शब्दोऽधिकः।

अस्या एव कारिकायाः प्रथमे पादे—पृथिव्यादिष्वभिव्यक्तौ इति, पृथिव्यादीष्यभिव्यक्तौ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसङ्गतेश्च द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अस्या एव कारिकायास्तृतीये पादे—अनुच्छिन्नाश्रयाज्जातिरिति, अनुच्छिन्नाश्रया इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसङ्गतेः। तत्राद्ये अनुच्छिन्ना आश्रयादित्यर्थः, द्वितीयपाठे तु अनुच्छिन्न आश्रयो यस्या इति विग्रहः।

अस्या एव कारिकाया उत्तरार्धे क्वचित्—अनुच्छिन्नाश्रया जातितिनिष्प्राप्याश्रये स्थिता इति पाठो दृश्यते। अयं पाठः शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

अस्या एव कारिकाया व्याख्याने हेलाराजीये—पृथिवीत्वाप्त्वतेजस्त्वादयो जातिविशेषा इति, पृथिवीत्वाजातिविशेषा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तः।

एतदग्रे—प्रतिनियतावयवरचनानपेक्षा एवेति, प्रतिनियतावयवरचना एवेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गते,, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे—अभिव्यक्तिमासादयन्ति इति, अभिव्यक्ति मां हृति इति, अभिव्यक्तिमर्हति इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तम्।

एतदग्रे—लोष्टोऽपि इति, लोष्टो इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः, न हि भवति प्रयोगः—लोष्टो पृथिवीति। लोष्टः इति सविसर्गपाठस्यैवौचित्यात्।

एतदग्रे—घटोऽपि पर्वतोऽपि इत्यादि। एवं समुद्रोऽपि इति, घटोऽपि—समुद्रोऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि घटे इव समुद्रेपि पृथिवीत्वजातिरस्ति।

अत्रैव—पर्वतोऽपि इति, वर्ततोऽपि इति पाठद्वयं वर्तते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—सा लत्वतालत्वादिका इति, सालत्वादिकातालत्वादिका इति, सालत्वकालत्वादिका इति, साल .... दिका इति पाठचतुष्टयं दृश्यते। तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—नियतमपेक्षते इति, नियगादयेक्षते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च, द्वितीयापाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे –एवेत्यर्थादुक्तं भवति इति, एवेत्यर्थः तदुक्तम् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—आश्रयप्रतिबद्धोदया इति, आश्रयप्रतिवन्धोदयात् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एतदग्रे—युक्तमिति, अयुक्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, तत्र पाठे पूर्वपरग्रन्थसंगतेः, द्वितीयपाठस्तु तदसंगत्याऽयुक्तः।

अत्रैव—युक्तं यदाश्रयविनाशमनुविनश्येयुरिति, आश्रयविनाशात्……… ह्याश्रय इति युक्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्या उपेक्षणीयः।

एतदग्रे—जातीनां त्वाश्रयप्रतिबद्ध इति, जातिनां त्वाश्रयप्रतिबद्ध इति, जातीनां त्वाश्रयप्रतिबन्ध इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तौ।

एतदग्रे—अपेक्षन्ते ता इति, अपेक्षते ता इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु पदयोः सामानाधिकरण्यानुपपत्त्याऽयुक्तः।

एतदग्रे—एकव्यक्तिविनाशेऽपि च इति, यकव्यक्तिविनाशेऽपि च इति, एकव्यक्तिविनाशोऽपि च इति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अनुमिति सद्भावादिति, अनुमतसंभवादिति, अनुमितसद्भावादिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे—जातिः समवस्थितैवेति इति, जातिः स्थितेति इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—अस्या नायाति इति, अस्थानायानि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः शब्दाशुद्धेश्च।

एतदग्रे—आश्रयोऽस्या इति जाश्रयोऽस्या इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु न युक्तः शब्दाशुद्धेः।

एतदग्रे—आश्रयश्चेति, आश्रयस्य नो इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—उच्छेदहेतुः संभाव्यते इति, संभाव्यते हेतुरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्थाप्रत्यायकत्वादयुक्तः।

एतदग्रे—अस्य विनाश इत्यर्थ इति, अस्यापि नाश इत्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्यायुक्तः, द्वितीयपाठस्तु न युक्तः अर्थासंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—न विनश्यतीत्यर्थं इति, न पश्यतीत्यर्थं इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः प्रकृतार्थबोधकत्वात्, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अनुच्छेद्याश्रयामेके ॥ ४२।

इति कारिकाया अवतरणिकायां हेलाराजीये—नित्यानां सर्वेषामिति, अनित्यानां सर्वेषामिति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, विनाशादित्यनेन संबन्धासंभवात्। द्वितीयपाठस्तु तेन सह संबन्धसंभवाद्युक्तः।

एतदग्रे—कथं जातय इति, कथं तत्तज्जातय इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, नित्यगतानां जातीनां महाप्रलयेऽपि अवस्थानसंभवात्। द्वितीयपाठस्तु युक्तः, तत्तज्जातीनामित्यस्य अनित्यगतजातीनामित्यर्थात्।

अस्या एव कारिकायाः प्रथमे पादे—अनुच्छेद्याश्रयामिति, अनुच्छाद्याश्रयामिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

तत्रैव—एके इति, एते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, पक्षान्तरोक्तौ आद्यपाठस्यैवौचित्यात्।

अस्या एव द्वितीयपादे—सर्वां जातिमिति, सर्वा जाति इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, प्रख्यानक्रियायाः कर्मत्वसंभवात्। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अस्या एव तृतीयपादे—न यौगपद्यं प्रलये इति, अयोगपद्यं प्रलये इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अस्या एव कारिकाया व्याख्याने हेलाराजीये—अवस्थानमन्तेनेच्छन्ति इति, अवस्थानं नेच्छन्ति इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—नास्त्येवेत्याहुरिति, नान्त्येवेत्याहुरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तः।

एतदग्रे—सर्वथोच्छेत्तुमशक्य इति, सर्वथाच्छेत्तुमशक्य इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—अपायेऽपराश्रयवृतित्वादिति, अपाये व्यवहाराश्रयवृतित्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—अपराश्रयवृत्तित्वादिति नित्यत्वसिद्धिः इति, अपराश्रयवृत्तित्वादिनिमित्तत्वसिद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—पार्थिवादिपरमाणुषु इति, पार्थिवादिपरिमाणुषु इति, पार्थिवादिषु परमाणुषु इति पाठत्रयं दृश्यते। तत्र प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—पृथिवीत्वादयो विश्राम्यन्ति इति, पृथिवीत्वादयोऽपि श्राम्यन्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—आदिसर्गवत् युगपदिति, आदिसर्गे च पुगपदिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

अत्रैव—सर्वभावप्रलय इति, सर्वपापप्रलय इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अस्मिन्मते व्यवस्थिता इति, अस्मिन्मते वावस्थिता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—एक इति समन्वय इति, एकसमन्वय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—युगपत्सर्वभावानामिति, युगपद् भावानामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, विवक्षितार्थबोधकत्वात्। द्वितीयपाठस्तु विवक्षितविपरीतार्थस्यापि प्रत्यायकत्वादयुक्तः।

एतदग्रे—ब्रह्माण्डान्तरस्य संभवादिति, ब्रह्माण्डान्तरसंभवादिति पाठद्वयं दृश्यते। तदुभयमयि साधु, अर्थसंगतेः ब्रह्माण्डान्तरस्य संस्तवादिति पाठोऽपि क्वचिद् दृश्यते। स तु न युक्तः, अर्थासंगतेः।

एतदग्रे—तथा चाहुरिति, तथाहुरिति पाठद्वयं दृश्यते। अत्रोभयमपि साधु, अर्थसंगतेः।

एतदग्रे—परिसंख्या न विद्यते इति, परिसंख्यां न विद्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठ एवार्थसंगत्यायुक्तः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

प्रकृतौ प्रविलीनेषु ।। ४३ ।

इति कारिकायाः प्रथमे पादे—प्रकृतौ प्रविलीनेषु इति, प्रकृतौ प्रतिलीनेषु इति पाठद्वयं दृश्यते। तत्रोभयमपि साधु, अर्थसंगतेः।

अस्या एव द्वितीये पादे—भेदेष्वेकत्वदर्शिनामिति, भेदेष्वाकत्वदर्शिनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

अत्रैव—भेदेष्वेकत्वदर्शिनामिति, भेदेष्वेकदर्शनमिति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

अस्या एव चतुर्थे पादे—स्वाश्रया एवेति, साश्रया एवेति पाठद्वयं दृश्यते। तत्र द्वितीयपाठ एव युक्तः अर्थसंगतेः, प्रथमपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव पादे—जातयः इति, जातयाः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत्कारिकाव्याख्याने हेलाराजीये—एकत्वमभेदं मूलप्रकृत्या इति, एकत्वमभेदमूलं प्रकृत्या इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। प्रकृत्या इत्यस्य स्थाने प्रकृत्वा इति पाठोऽपि क्वचिद् दृश्यते। स तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—निरन्वयविध्वंसाभावादिति, निरचयविध्वंसाभावादिति, निरन्वयध्वंसाभावादिति, निरवयविध्वंसाभावादिति पाठचतुष्टयं दृश्यते। तत्र प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः, द्वितीयचतुर्थपाठौ तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तौ।

एतदग्रे—प्रविलयमात्रमिति, प्रतिविलयमात्रमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु प्रत्यर्थासंगत्याऽयुक्तः।

एतदग्रे—शक्तिरूपेषु इति, शुक्तिरूपेषु इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—जातीनामिति, जातिनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—द्रव्यादर्थान्तराभावादिति, द्रव्यादर्थान्तरत्वाभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अध्याहारसापेक्षत्वादयुक्तः।

एतदग्रे—द्रव्यं मूलकारणमिति, मूलकारणं द्रव्यमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—मूलकरणं द्रव्यमिति पाठोऽपि क्वचिद् दृश्यते। सत्वयुक्तः, अर्थासंगतेः।

एतदग्रे—तत्र सत्त्वमिति, तत्र सिद्धमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—तस्य वा यत्सत्त्वमिति, तस्य यावत्सत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्यायुक्तः।

एतदग्रे—कारणसत्तामवलम्बत इत्यर्थ इति, कारणसत्तामवलम्ब्य इत्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—कारणसत्तामपलपन्त इत्यर्थ इति, पाठोऽपि क्वचिद् दृश्यते। सोऽपि अयुक्तः, अर्थासंगतेः।

एतदग्रे—सामान्यम्। द्रव्यशब्दो वा इति, सामान्यशब्दो वा इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, विकल्पार्थक वा शब्दोपपत्तेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—वस्तुपर्यायः। तेन द्रव्यसत्त्वमिति, वस्तुपर्यायेषदुः तेन द्रव्यसत्त्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—वस्तुन एवेति, वस्तुत एवेति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—एव विद्यमानत्वमिति, एवमविद्यमानत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—गुरुत्वादधः पतनमिति, गुरुत्त्वादयः। पतनमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तदानीमिति, इदानीमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, सर्वनामत्वेनोभयार्थसंगतेः।

एतदग्रे—शास्त्रकारस्तु इति, शास्त्रप्रकारस्तु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—निगमितवान् इति, निर्मितवान् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

ब्राह्मणत्वादयो भावा ॥ ४४ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—सर्वसर्वगतत्व न येनाप्याह इति, सर्वगतत्वेनाप्याह इति, सर्वगतत्वमप्याह इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

अस्या एव कारिकाया द्वितीये पादे—सर्वप्राणिष्ववस्थिता इति, सर्वप्राणिष्ववस्थित इति, सर्वप्राणिष्ववस्थितिरिति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

अस्या एव तृतीये पादे—स्वकार्याणामिति, सकार्याणामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—ब्राह्मणत्वक्षत्रियत्वादयः सामान्यविशेषाः। ते प्राणिषु पिण्डेषु क्षत्रियादिष्ववस्थितत्वाद् सर्वगताः। तथापि च इति, ब्राह्मणत्व ········तथापि च इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अपूर्णत्वादयुक्तः।

अत्रैव—अवस्थितत्वात् सर्वगता इति, अवस्थितात्सर्वगता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्यविच्छिन्नागमपारम्पर्येण इति, इत्यवच्छिन्नपारम्पर्येण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्मर्यते इति, स्मर्यतो इति पाठद्वयं दृश्यते। तत्राद्यपाठः शुद्धः द्वितीयस्त्वसाधुः।

एतदग्रे—पारम्पर्यागतमिति, पारम्पर्येणगतमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चित्रादिष्वप्यभिव्यक्तिरिति ।। ४५ ।

कारिकाया अवतरणिकायां हेलाराजीये—आदिग्रहणेन इति, आदिग्रह न इति पाठद्वयं दृश्यते । तत्राद्यपाठः शुद्धः, द्वितीयपाठस्त्वशुद्धः ।

एतदग्रे—ह्यचेतनजातीनामपि इति, ह्यत्वेतने जातीनामपि इति पाठद्वयं दृश्यते । त्वचेतनजातीनामपि इति तृतीयपाठोऽपि दृश्यते । तत्राद्यपाठः शब्दशुद्ध्याऽर्थसंगत्या च युक्तः,द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः । तृतीयपाठे तु शब्दोऽनर्थकः ।

एतदग्रे—सर्वगतत्वमत्र विवक्षितमिति, सर्वगतत्वं विवक्षितमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अत्र पदस्यावश्यकत्वात् । अन्यथाऽन्यत्रापि सर्वगतत्वमचेतनजातीनां विवक्षितं स्यादिति । अतएव द्वितीयपाठोऽयुक्तः ।

एतदग्रे—चेतनजातयोऽपि इति, तेन जातयोऽपि इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । चेतनजायोऽपि इति तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—अचेतनेष्ववस्थिता इति, अचेतनेष्वापेस्थिता इति, अचेतनजातिष्ववस्थिता इति पाठत्रयं समुपलभ्यते । तत्राद्यपाठो युक्तः, शब्दशुद्धेः, अर्थसंगतेश्च । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—पूर्णं सर्वगतत्वमिति, पूर्वसर्वगतत्वमिति, पूर्वं सर्वगत्तत्वमिति पाठत्रयं दृश्यते । तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयतृतीयपाठावर्थासंगत्याऽयुक्तौ ।

अस्याः कारिकायाः प्रथमे पादे—चित्रादिष्वप्यभिव्यक्तेरिति, चित्रादिष्वभिव्यतिरिति पाठद्वयं दृश्यते । तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः ।

अस्याश्चतुर्थे पादे—पुण्यपापयोरिति, पापपुण्ययोरिति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः । वस्तुतस्तु अभ्यर्हितञ्चेति पुण्यशब्दस्यैव पूर्वंनिपातो युक्तः ।

एतत्कारिकाव्याख्याने हेलाराजीये—आलेख्यनिर्मिते इति आलेख्यनिमितेषु इति, पुस्तकर्मणा इति पुस्तेकर्मणा इति, पुण्यकर्मणा इति पाठपञ्चकं दृश्यते ।

तत्र प्रथमे द्विके—आद्यपाठ एव युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः, अर्थासंगतेश्च ।

द्वितीये त्रिके—आद्यपाठावेव युक्तौ, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—सादृश्यात्तदाकारानुकारप्रत्ययोदय इति तत्रापि तज्जातिप्रकाश इति, सादृश्यात्तत्रापि तज्जातिप्रकाश इति पाठद्वयं दृश्यते । तदुभयमपि युक्तम्, अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा हि—द्वितीयपाठे सादृश्यस्य तादृशप्रत्ययोदयद्वारातज्जातिप्रकाशे हेतुत्वोपपत्तिः।

अत्रैव—तज्जातिप्रकाश इति, तज्जातिप्रकारमिति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु आदिपदवैयर्थ्यादयुक्तः।

एतदग्रे—प्राण्युपघातादिति, प्राणाद्युपघातादिति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु आदिपदवैयर्थ्यादयुक्तः।

एतदग्रे—वचनादत्रारुचिं सूचयति किल इति, वचनादरुचिमत्र सूचयति किल इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

अत्रैव—वचनादप्राहचिं सूचयति। किल इति पाठोऽपि क्वचिद् दृश्यते। स तु शब्दाशुद्धयाऽर्थासंगतया चायुक्तः।

एतदग्रे—प्रतिकृतिषु इति, प्रकृतिषुः इति, प्रतिषु इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—प्रत्ययानुगमोपपत्तिरिति प्रत्ययानुगमोपपतिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। प्रत्ययानुगतोपस्थितिरिति क्वाचित्कः पाठोऽपि अर्थसंगत्यायुक्तः।

एतदग्रे—न तु तद् वशादिति, न तु तद्वत् इति, जातिसमवाय इति, जाति-समुदाय इति, पाठचतुष्टयं दृश्यते।

प्रथमे द्विके—तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽपि युक्तः एव, अर्थसंगतेः।

द्वितीये द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु न युक्तः अर्था-संगतेः।

एतदग्रे—तदेव पूर्वम् निर्वर्त्यमानम् इति पाठो दृश्यते। स तु न युक्तः, शब्दाशुद्धेः, अत्र निर्वर्त्यमानमिति पाठो युक्तः। तदेवं निर्वर्त्यमानमिति पाठोऽपि क्वचिद् दृश्यते। स तु न युक्तः, पूर्वमिति पाठस्यावश्यकत्वात् अन्यथा—क्वोपपादि-तमित्याकाङ्क्षा न निवर्तेत।

एतदग्रे—प्राक्प्रभवनादपि इति, प्राग् भावादपि इति, प्राग्भवादपि इति पाठत्रयं दृश्यते। एतत् त्रयमपि साधु, अर्थसंगतेः।

तथा हि—तत्र प्रथमपाठे अर्थसंगतिः स्फुटैव। प्रभवनं हि प्रथमप्रकाशरू-पोत्पत्तिरेव। भावोऽपि घञन्तो भवनरूपोत्पत्तिबोधकः। भवोऽपि अबन्त उत्पत्ति-बोधकः।

एतदग्रे—जातेः सद्भावादिति, जातेऽसद्भावादिति, आश्रयध्वंसे आश्रयधसे इति, पूर्वापरकोटिगामित्वादिति, पूर्वापरकोटिगत्वादिति, नित्यत्वस्य सिद्धिरिति नित्यत्वस्यासिद्धिरिति पाठाष्टकं समुपलभ्यते।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र प्रथमे द्विके—प्रथमपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

द्वितीये द्विकेऽपि—प्रथमपाठो युक्तः तत एव । द्वितीयपाठस्तु अयुक्तः, शब्दाशुद्धेः ।

तृतीये द्विके—उभयं युक्तम् अर्थसंगतेः ।

चतुर्थे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः

ज्ञानं त्वस्मद्विशिष्टानामिति ॥ ४६ ।

कारिकाया अवतरणिकायां हेलाराजीये—

(१) न प्रतिभासते इति, (२) न भासते इति, (३) तु प्रतिभासते इति, (१) व्यक्तिभिरभिव्यक्तमिति, (२) व्यक्तिभिरव्यक्तमिति, (१) तत्सामान्यमिति, (२) तसत् सामान्यत् इति, (१) तत्प्रत्ययो न स्यात् इति, (२) तत्प्रयोगः स्यात् इति, (३) तत्प्रत्ययोन्यस्यादिति, (१) अथान्येभ्य इति, (२) अन्यान्येभ्य इति, (३) अथ तेभ्य इति, (१ प्रतिपत्स्यते इति, (२) प्रतिपस्यते इति, (१) साक्षाद्दर्शिनमिति, (२) साक्षाद्दर्शनमिति, (१) सर्वज्ञं द्रष्टारमिति, (२) सर्वद्रष्टारमिति, (१) प्रसज्यते इति, (२) प्रसृज्यते इति, (१) रूपव्यञ्जनसादृश्यादिति, (२) तूपव्यञ्जनस्यादिति, (१) बालमूकादिज्ञानसदृश इति, (२) बामूलकादिविज्ञानं सादृश इति, (३) बालमूकादिविज्ञानसदृश इति, (४) बालमूकादिज्ञानसदृशोऽप्यस्गौ गोत्वादीनामिति, (५) बालमूकादिज्ञानसदृशो गोत्वादीनामिति, (१) अनुवृत्तव्यावृत्तरूपावभास इति, (२) अंनुवृत्तस्य व्यावृत्तरूपावभास इति, (१) नास्तीत्यवश्यमेवेति, (२) नास्तीवश्यमेवेति, (३) नास्तीत्यवश्यमत्रेति, (१) अवश्यमेव सर्वज्ञोऽभ्युपगन्तव्य इति, (२) सर्वज्ञोऽवश्याभ्युपगन्तव्य इति, (१) मन्यमान आहेति, (२) मन्यमानमाहेति, पाठानां षट्त्रिंशदुपलभ्यते ।

तत्राद्ये त्रिके—आद्यं पाठद्वयं साधु, अर्थसंगतेः, तृतीयस्तु पाठोऽसाधुः, अर्थासंगतेः ।

द्वितीये द्विके—प्रथमपाठः साधुः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

तृतीये द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु-शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

चतुर्थे त्रिके—आद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः, तृतीयपाठः शब्दाशुद्ध्याऽयुक्तः ।

पञ्चमे त्रिके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु पूर्वं यत्पदार्थानिर्देशादयुक्तः ।

षष्ठे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सप्तमे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अष्टमे द्विके—उभयं साधु, अर्थसंगतेः।

नवमे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

दशमे द्विके—उभयमपि युक्तम्, अर्थसंगतेः।

एकादशे पञ्चके—प्रथमपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः, तृतीयपाठो युक्तः, अर्थसंगतेः, चतुर्थपञ्चमपाठौ युक्तौ, अर्थसंगतेः।

द्वादशे द्विके—उभयमपि साधु, अर्थसंगतेः।

त्रयोदशे त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः तृतीयपाठोऽर्थसंगत्यायुक्तः।

चतुर्दशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

पञ्चदशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकायाः प्रथमे पादे—ज्ञानं त्वस्मद्विशिष्टानामिति, ज्ञानमस्मद्विशिष्टानामिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

द्वितीये पादे—तासु इति, तासामिति पाठद्वयं दृश्यते। तत्राद्यः पाठो युक्तः अर्थसंगतेः।

तथा हि– अत्र तासु इत्यस्य ज्ञानमित्यनेन संबन्धः। तत्पदार्थश्चात्र जातिः। जातिविषयकं ज्ञानमित्यर्थः। द्वितीयपाठोऽपि एवं युक्त एव। विषयविषयिभावरूपस्य संबन्धस्य षष्ठ्यर्थत्वात्।

अस्या एव कारिकाया उत्तरार्धे—अभ्यासान्मणिरूप्यादिविशेषेष्विव तद्विदामिति, अभ्यासान्मणिरूपादिविशेषेष्विव तद्विदामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—

(१) इत्यदादेशे इति, (२) इति आदादेशे इति, (१) सर्वदृश इति, (२) सर्वदर्शि इति, (३) सदृश इति, (१) पतञ्जलिः इति, (२) पतञ्जलेइति, (१) कालेनानवच्छेदात् इति, (२) कालेनावनवच्छेदादिति, (१) सर्वज्ञानमीश्वर इति, (२) सर्वज्ञानामि इयमीश्वर इति, (३) सर्वज्ञानामाश्वर इति (४) सर्वज्ञानाम पीश्वर इति, (१) कालेनानवच्छेदान्नित्यता इति, (२) कालेनान्थच्छेदादिन्नित्यता इति, (३) कालेनानवच्छेदान्नित्या इति, (१) प्रलये वृत्ते इति, (२) प्रलयवृत्ते इति, (१) क उपदेष्टा इति, (२) वा उपदेश इति, (१) प्रलयस्मृतेरिति, (२) प्रलये स्मृतेरिति, (१) भूतार्थप्रतिपादकमिति, (२) भूतार्थवाचकमिति, (१) वृद्धव्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वहारादिति, (२) धृतव्यवहारादिति, (१) शब्दार्थसंबन्धव्युत्पत्तिप्रतिपत्तेरिति, (२) शब्दार्थव्युत्पत्तेरिति, (१) यत्परश्च शब्द इति, (२) च परः शब्द इति, (३) सत्परश्च शब्दा इति, (१) सिद्धार्थाभिधाने इति, (२) सिद्धार्थत्वाभिधाने इति, (३) सिद्धार्थाभिधानेन इति, (१) भूतार्थं वाक्यमिति, (२) भूतार्थवाक्यमिति, (१) प्रवर्तकवाक्याङ्गभावेन तु इति, (२) प्रवर्तकवयाङ्गे तु भावेन इति, (१) स्तावकत्वेन इति, (२) तावकत्वेन इति, (१) विधिवाक्याङ्गभावगमनादन्वयभाञ्जि इति, (२) विधिवाक्याङ्गभावेनान्वयभाञ्जि इति पाठानां द्वाचत्वारिंशदुपलभ्यते।

तत्राद्ये द्विके—प्रथमापाठो युक्तः, साध्यप्रयोगानुरोधात्। द्वितीयपाठस्तु तद्विरोधादयुक्तः।

द्वितीये त्रिके—प्रथमपाठोऽर्थसंगत्याऽयुक्तः, द्वितीयतृतीयपाठौ तु अयुक्तौ, अर्थासंगतेः।

तृतीये द्विके—आद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

चतुर्थे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

पञ्चमे चतुष्के—प्रथमचतुर्थपाठौ युक्तौ अर्थसंगतेः। इतरद्द्वयन्तु शब्दाशुद्ध्याऽयुक्तम्।

षष्ठे त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासङ्गत्या चायुक्तम्।

सप्तमे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अष्टमे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः।

नवमे द्विके—प्रथमपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठोऽपि संबन्धिनः प्रलयस्य वैषयिकाधिकरणत्वविवक्षया कथंञ्चिद् युक्तः।

दशमे द्विके—उभयं युक्तमर्थसंगतेः।

एकादशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

द्वादशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तथा हि—वृद्धव्यवहारः शब्दार्थसंबन्धव्युत्पत्तिप्रतिपत्तिं प्रति हेतुः, न तु तादृशव्युत्पत्तिं प्रतीति।

त्रयोदशे त्रिके—आद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्या-शब्दाशुद्ध्या चायुक्तम्।

चतुर्दशे त्रिके—प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः, द्वितीयपाठस्तु विवक्षितार्थस्याप्रतिपत्त्या चिरेणप्रतिपत्त्या प्रतिपत्तिगौरवेण वाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पञ्चदशे द्विके—उभयमपि साधु, अर्थसंगतेः ।

षोडशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

सप्तदशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

अष्टादशे द्विके—उभयं साधु, अर्थसंगतेः ।

एतदग्रे—(१) प्रथमः पक्षो न युक्तः इति, (२) प्राथम्यपक्षे न युक्तम् इति, (१) अङ्गभावानुपपत्तेरिति, (२) अङ्गभूततानुपपत्तेरिति, (१) सा प्रतिपत्तिरिति, (२) साप्तविपत्तिरिति, (१) तत्र स्वार्थे इति, (२) स्वार्थे इति, (१) विचार्यम् इति, (२) विचारणीयमिति, (१) अबाधिता हि इति, (२) अबाधितानि हि इति, (१) जैमिनीय नय इति, (२) जैमिनिनय इति, (३) जैमिनीयनयात् इति, (१) शास्त्रादधिगतानां न किञ्चनबाधकमिति, (२) शास्त्रार्थाधिगतानां न किञ्चनबाधकमिति, (३) शास्त्रानधिगतान् न कश्चनबाधकमिति, (४) शास्त्रादधिगतानां यत् किंचिबाधकमिति, (५) शास्त्रेऽधिगतानां न किंचिद्बाधमिति, (१) सर्वमदृष्टार्थमप्रमाणमिति, (२) सर्वत्रमदृष्टार्थमप्रमाणमिति, (३) सर्वार्थप्तमाप्रमाणमिति, (१) सार्थकत्वस्य इति, (२) सार्थकावश्य इति, (३) सार्थकस्येति, (१) संवादोपलब्धेरबाधितत्वमेवेति, (२) संवादाप च धेरबाधितत्वमेवेति, (१) सर्वभूतरुतज्ञानमिति, (२) सर्वभूरुतज्ञानमिति, (१) चर्मचक्षुषु इति, (२) चर्मुचक्षुष इति, (१) एतन्मन्यन्ते इति, (२) एतत्र मन्यते इति, (३) एतन्न संमन्यन्ते इति, (१) शब्दार्थसंयमानात्सर्वभूतरुतज्ञानमिति, (२) शब्दार्थप्रत्ययानामितरेतराध्यासात् संकरस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् इति, (१) शास्त्रान्तरेण संवाद इति, (२) शास्त्रान्तरेणसंबाध इति, (१) न च कार्यपरता इति, (२) न च कार्यपदार्थपरता इति, (१) प्रत्यक् चेतनाधिगम इति, (२) प्रत्यत्क्वेनाधिगम इति, (१) स्मृतिकाराणाञ्च मन्वादीनामभ्युपगम इति, (२) स्मृतिकाराणाञ्चाभ्युपगम इति, (१) न हि मन्वादय इति, (२) हि न मन्वादय इति, (१) रागादिमत्त्वे इति, (२) भागादिमत्त्वे इति, (१) अज्ञत्वे इति, (२) च माद्यत्वे इतिपाठानामेकपञ्चाशत्कमुपलभ्यते ।

तेषु आद्ये द्विके—प्रथमः पाठो युक्तः, अर्थसंगतेः, अर्थासंगत्याद्वितीयपाठो न युक्तः ।

द्वितीये द्विके—उभयं युक्तम्, अर्थसंगतेः ।

तृतीये द्विके—प्रथमः पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

चतुर्थे द्विके—उभयं युक्तम् अर्थसंगतेः, ।

पञ्चमे द्विके—पञ्चमे द्विकेऽपि उभयं युक्तम् अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

षष्ठे द्विके—प्रथमः पाठो युक्तः, अर्थसंगतेः, द्वितीयस्तु अर्थासंगत्याऽन्वयासंगतिप्रयुक्तयाऽयुक्तः।

सप्तमे त्रिके—प्रथमद्वितीयपाठौ युक्तौ अर्थसंगतेः। अत्र तृतीयपाठे सिद्धमिति वाऽध्याहृत्य साधुत्वमुपपाद्यम्।

अष्टमे पञ्चके—प्रथमद्वितीयपञ्चमपाठाः साधवः, अर्थसंगतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

नवमे-त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽयुक्तम्।

दशमे त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एकादशे द्विके—प्रथमः पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

द्वादशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

त्रयोदशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

चतुर्दशे त्रिके—प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

पञ्चदशे द्विके—प्रथमपाठो न युक्तः, अत्र पाठे प्रत्ययपदनिक्षेपस्यावश्यकत्वात्।

षोडशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

सप्तदशे द्विके—उभयं युक्तम्, अर्थसंगतेः।

अष्टादशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एकोनविंशे द्विके—उभयं युक्तम्, अर्थसंगतेः।

विंशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु पदयोः पौर्वापर्यविपर्ययादयुक्तः।

एकविंशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः।

द्वाविंशे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धया उपेक्ष्यः।

एतदग्रे—(१) ऋषयो बभूवुरिति, (२) ऋषवो वभूवुरिति, (१) तेऽवरेभ्य इति, (२) अवरेभ्य इति, (३) अपरेभ्य इति, (१) असाक्षात्कृतधर्मभ्य इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२) असाक्षात्कृतधर्मभ्य इति, (१) सम्प्राहुरिति, (२) अपरे संप्राहुरिति, (१) उपदेशाय ग्लायन्त इति. (२) उपदेशाद् ग्लायन्त इति, (१) ग्लायन्तोऽवरे इति, (२) अवरेग्लायन्त इति, (३) ग्लायन्तीवरो इति, (१) विल्मग्रहणाय इति, (२) विलग्रहणाय इति, (३) विष्वग्रहणाय इति, (४) विल्मान् विग्रहणाय इति, (१) समाम्नासिषुर्वेदञ्चेति, (२) समाम्नासिष्टवेदञ्चेति, (१) येषामन्धपरम्परा-व्युदासार्थम् इति, (२) एषामन्धपरम्पराव्युदासार्थम् इति, (१) शब्दनित्यत्वेऽपि रचनावत्त्वादिति, (२) शब्दनित्यत्वे विरचनावत्त्वादिति, (१) समधिगम्यते इति, (२) समभिगम्यते इति, (१) तस्माच्छास्त्रमिति. (२) तस्माच्च शास्त्रमिति, (१) तस्य शास्त्रं निमित्तमिति, (२) तस्य निमित्तमिति, (१) गीतास्वाविष्टमहेश्वरभावेन इति, (२) गीतायां स्वाविष्टमहेश्वरभावेनेति, (१) नित्यत्वे क्षतिर्नास्ति इति,(२) नित्यत्वक्षतिर्नास्ति इति, (१) दर्शनात्मनिसदावस्थितत्वमिति, (२) दर्श-नात्म न सदोवस्थितत्वमिति, (१) अव्यवच्छिन्नामिति, (२) अत्यच्छिन्नामिति, (३) अप्यवच्छिन्नामिति, (१) सन्त्यतीन्द्रियार्थदर्शिन इति, (२) सत्यतीन्द्रियार्थ-दर्शिन इति, (१) गोत्वब्राह्मणत्वादिजातीराश्रयविवेकेन इति, (२) गोत्वब्राह्मणत्वा-दिजातिराश्चेन इति, (३) गोत्वब्राह्मणत्वादिजातिराश्रयविवेकाना इति. (१) सर्वे-न्द्रियमिति, (२) सार्वेन्द्रियमिति, (१) प्रतिनियमानपेक्षत्वादिति, (२) इन्द्रियप्रति-नियमानपेक्षत्वादिति, (३) प्रतिनियमानपेक्ष्यत्वादिति, (१) इन्द्रियान्तरव्यापारमिति, (२) इन्द्रियान्तरमव्यापारमिति, (१) इन्द्रियैरेवपश्यन्ति इति, (२) इन्द्रियैरत्र पश्यन्ति इति, (३) इन्द्रियैरेव पश्यति इति, (४) इन्द्रियैरेव रूपाणि पश्यन्ति इति, (१) सर्वेन्द्रि-यार्थानुपलभते इति, (१) सर्वेन्द्रियार्थानुपलभन्ते इति, (२) न चाक्षुषमेव तेषामिति, (२) न चाभुषमेवं तेषामिति, (१) विप्रादिजातिविषयं विज्ञानमिति, (२) विप्रादि-जातिविज्ञानमिति, (१) अपि त्विन्द्रियान्तरसम्बन्ध्यपि इति, (२) अपि तु इन्द्रिया-न्तरसंबन्ध्यपि इति, (१) सर्वज्ञसिद्धरत्र सूचिता इति, (२) सर्वज्ञसिद्धिरासूत्रिता इति पाठानां पञ्चषष्टिरुपलभ्यते ।

तत्र प्रथमे द्विके—प्रथमपाठो युक्तः, शब्दशुद्धेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽ-युक्तः ।

द्वितीये त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अयुक्तः, तत्पद-पाठस्यावश्यकत्वात् । तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

तृतीये द्विके—आद्यपाठो युक्तः, धर्मादनिच् केवलात् इति सूत्रदर्शनात् । द्वितीयपाठस्तु एतत्सूत्रविरोधादयुक्तः ।

चतुर्थे द्विके—उभयं साधु, अर्थसंगतेः ।

पञ्चमे द्विके—उभयं साधु अर्थसंगतेः ।

षष्ठे त्रिके—आद्यं द्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

सप्तमे चतुष्के—प्रथमपाठो युक्तः; अर्थसंगतेः, शब्दशुद्धेश्च । इतरत्पाठत्रयन्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अष्टमे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

नवमे द्विके—उभयमपि युक्तम् अर्थसङ्गतेः।

दशमे द्विके—उभयं युक्तम् अर्थसङ्गतेः। तत्रद्वितीयपाठे—विशिष्टरचना विरचना इत्यर्थः।

एकादशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्त्वर्थासङ्गत्याऽयुक्तः।

द्वादशे द्विके—पाठद्वयमपि युक्तम् अर्थसङ्गतेः, पक्षद्वयेऽपि निमित्तमित्यस्य ज्ञापकमित्यर्थः। शास्त्रस्य ईश्वरज्ञापकत्वादित्यर्थः।

त्रयोदशे द्विके—उभयमपि साधु, अर्थसङ्गतेः।

चतुर्दशे द्विके—उभयमपि युक्तम्, अर्थसङ्गतेः।

पञ्चदशे द्विके—उभयं युक्तम्, अर्थ संगतेः।

षोडशे द्विके—प्रथमपाठो युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तः।

सप्तदशे त्रिके—प्रथमपाठो युक्तः, अर्थसङ्गतेः। इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्।

अष्टादशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एकोनविंशे त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

विंशे द्विके—प्रथमपाठो युक्तः। तथा हि—सर्वाणि इन्द्रियाणि जनकान्यस्येतिषष्ठयर्थे बहुव्रीहिः, जन्यजनकभावः सम्बन्धः षष्ठयर्थः, द्वितीयपाठस्तुशब्दाशुद्धयाऽयुक्तः।

एकविंशे त्रिके—प्रथमद्वितीयपाठौ युक्तौ, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

द्वाविंशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

त्रयोविंशे चतुष्के—प्रथमपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः,तृतीयपाठोऽपि पश्यतीत्येकवचनानुपपत्त्याऽयुक्तः, चतुर्थपाठस्तु युक्तः, अर्थसङ्गतेः।

चतुर्विंशे द्विके—उभयं साधु, अर्थसङ्गतेः।

पञ्चविंशे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

षड्विंशे द्विके— उभयं युक्तम्, अर्थसंगतेः ।

सप्तविंशे द्विके—उभयं साधु ।

तथा हि—संहिताविवक्षायां संधिः, तदविवक्षायां शाकल्यमते प्रगृह्यत्व-प्रयुक्तप्रकृतिभावेन वाऽसंधिः ।

अष्टाविंशे द्विके—उभयं साधु. अर्थसङ्गतेः । तत्र द्वितीयपाठे—आसूत्रिता इत्यस्यसूत्रभूतैर्वाक्यैः सूचिता इत्यर्थः ।

एतदग्रे—(१) आगमसिद्धे सर्वज्ञेऽत्रानुमानमिति, (२) आगमसिद्धेः सर्वज्ञतानुमानमिति, (१) पुरुषविशेषेष्वतिशयो दृष्ट इति, (२) पुरुषेष्वतिशयो दृष्ट इति, (३) पुरुषे अपि अतिशयो दृष्ट इति, (१) वैकटिकानामिति, (२) चैकघटिकानामिति, (३) चैकैकानामिति, (१) रत्नतत्त्वपरीक्षायामिति, (२) रमतत्त्वपरीक्षायामिति, (१) रूप्यतर्काणामिति, (२) रूपतर्क्याणामिति, (३) रूपतर्काणामिति, (१) रूप्यगतातिशयपरिच्छेदे इति, (२) रूप्यतातिशयपरिच्छेदे इति, (१) सर्वज्ञेयव्यापिकाष्ठाप्राप्तमिति, (२) सर्वज्ञेऽपि व्यापिकाष्ठाप्राप्तमिति, (१) पूर्णसमस्तसंपत्कमिति, (२) पूर्वसमस्तसंपत्कमिति, (३) पूर्णसमस्तसंपर्कमिति, (१) यत्राप्यतिशय इति, (२) तत्राप्यतिशय इति, (१) संभावनानुमानेनापि इति, (२) संभावनासमानेनापि इति, (१) निरतिशयं सर्वज्ञबीजमिति, (२) निरतिशमसर्वज्ञबीजमिति, (३) निरतिशयं सर्वबीजमिति, (१) तत् निरतिशयमिति, (२) तत्र निरतिशयमिति,(३) तत्तत्र निरतिशयमिति, (१) यत्र निरतिशयं स सर्वज्ञ इत्यर्थ इति, (२) यत्र निरतिशयमिति, (१) चात्रैश्वर्योपलक्षणमिति, (२) वात्सपलक्षणमिति, (३) चात्र सूत्रे उपलक्षणमिति, (४) चात्रैश्वर्यस्योपलक्षणमिति, (१) यत्र निरतिशयमिति, (२) तत्र निरतिशयमिति, (१) इत्यपि सिद्धमिति, (२) इत्यादि सिद्धमिति, (१) यज्ज्ञानमिति, (२) यज्जानमिति पाठानां द्वाचत्वारिंशत्कं समुपलभ्यते ।

तत्र प्रथमे द्विके—प्रथमः पाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासंगतेरयुक्तः ।

द्वितीये त्रिके—आद्यपाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम्—पुरुषविशेषेष्वेवातिशयदर्शनात् ।

तृतीये त्रिके—प्रथमः पाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थासङ्गत्याऽयुक्तम् ।

चतुर्थे द्विके—प्रथमपाठ एव युक्तः, अर्थसङ्गतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तः ।

पञ्चमे त्रिके—प्रथमतृतीयपाठौ युक्तौ अर्थसङ्गतेः द्वितीयपाठोऽपि रूपं तर्क्यं येषामिति षष्ठचर्थे बहुव्रीहिणा समर्थयितुं शक्यते ।

षष्ठे द्विके—प्रथमपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सप्तमे द्विके—प्रथमपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः। अपि शब्दस्यात्र पाठे वैयर्थ्यात्।

अष्टमे त्रिके—प्रथमपाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तम्।

नवमे द्विके—प्रथमपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

दशमे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एकादशे त्रिके—प्रथमपाठो युक्तः, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तम्।

द्वादशे त्रिके—प्रथमपाठो युक्तः, अर्थसङ्गतेः द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः, तृतीयपाठस्तु अर्थसङ्गत्या साधुः।

त्रयोदशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

चतुर्दशे चतुष्के-प्रथमचतुर्थपाठौ युक्तौ, अर्थसङ्गतेः, इतरत्पाठद्वयन्तु अर्थाऽसङ्गत्याऽयुक्तम्।

पञ्चदशे द्विके--प्रथमपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठोऽर्थासङ्गत्याऽयुक्तः।

षोडशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

सप्तदशे द्विके—आद्यपाठो युक्तः, अर्थसङ्गतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासङ्गत्या चायुक्तः।

एतदग्रे—(१) चेतनस्याचेतनं जगदिच्छानुविधायि इति, (२) चेतस्य चेतनं जगदिच्छा तु विधायि इति।

(१) प्रत्यगात्मन इव इति, (२) विधिप्रत्यगात्मानमिवेति, (१) उपकार्योपकारकभावसंस्थानविशेषयोगादि ज्ञाता इति, (२) उपकार्योपकारकभावसंस्थानविशेषयोगाभिज्ञाता इति,

(१) एतन्निर्मिमीते इति, (२) तन्निमित्त इति, (१) इन्द्रियप्रतिनियमानपेक्षमिति, (२) इन्द्रियप्रतिनियतमनापेक्षमिति, (१) तदुपदेशमिति, (२) तदपदेशमिति, (१) सास्नादि स्थानीयमुपव्यञ्जनमिति, (२) सास्नादि स्थानीयरूपव्यञ्जनमिति, (१) शिष्टैरिति, (२) विशिष्टैरित, (१) तत्र भवतामिति, (२) अत्र भवतामिति, (१) वयमपि संप्रदायपारम्पार्यादिति, (२) वयामपि पारम्पर्यादिति, (१) गोत्वाजातीरध्यवस्यामः इति, (२) गोत्वादिजातीरध्यवसाय इति, (१) अस्मद् विशिष्टानां चेदं संज्ञाप्रणयनमिति, (२) अस्मद् विशिष्टानां अपि संज्ञाप्रणयनमिति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३) तद्भावप्रत्ययैर्लोके आत्मत्वं नाभिधीयते इति।

अस्या एव कारिकाया व्याख्याने हेलाराजीये—

(१) इहलौकिके इति, (२) इह लोके इति, (१) शब्दव्यवहारे इति, (२) शब्दसमाहारे इति. (१) सामर्थ्ये समासविधानादिति, (२) समर्थे सतिसमासविधानादिति, (३) सामर्थ्येन समासविधानादिति, (१) प्रवृत्तनिमित्तमिति तत्रैवेति, (२ प्रवृत्तिनिमित्ते तत्रैव इति. (१) तत्रैव भावप्रत्यय इति, (२) तत्रैव प्रत्यय इति, (३) तत्रैव प्रत्यये इति, (१) आधाराधेय सम्बन्ध इति, (२) आधाराधेय भावसम्बन्ध इति, (१) सप्तमीसमासे इति (२) सप्तमीमासे इति, (१) जात्युत्पलाद्याश्रितस्येति,)२) जात्युत्पलाभ्यां दृगश्रितस्येति, (३ जात्युत्पलाद्याश्रयत्वकस्येति, (१) न तच्चन्दनगन्धादिव्यक्ताविति, (२) न चन्दनगन्धादिव्यक्तौ इति, (१) विशिष्टं सामान्यमिति, (२) विशेषस्य सामान्यमिति पाठानां त्रयोविंशतिरुपलभ्ते।

तत्र प्रथमे द्विके—प्रथमपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्त।

द्वितीये द्विके—आद्यपाठो युक्तः द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

तृतीये त्रिके—त्रयं युक्तम् अर्थसंगतेः।

चतुर्थे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

पञ्चमे त्रिके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठः अर्थसंगत्या युक्तः। तृतीयपाठस्त्वयुक्तः, अर्थासंगतेः।

षष्ठे द्विके—उभयं युक्तम्, अर्थसंगतेः।

सप्तमे द्विके—आद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अष्टमे त्रिके—प्रथमपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीयपाठस्त्वनन्वयाद्धेयः।

नवमे द्विके—प्रथमपाठो युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

दशमे द्विके—प्रथमपाठो युक्त, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यदा तु इति, यत्तदु इति पाठद्वयं दृश्यते। तत्र प्रथमो युक्तः, अर्थसंगतेः, द्वितीयोऽयुक्तः।

एतदग्रे—संनिहितमिति, सदनिमित्तमिति, सदनिष्टमिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—न चोत्पलगन्धसमतमिति, तच्चत्रोत्पलगन्धसमवेतमिति, न चोत्प-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लगन्धसमवेतेनेति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—अभिन्नं गन्धशब्दप्रवृत्तिनिमित्तमिति, भिन्नगन्धप्रवृत्तिनिमित्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एतदग्रे—इति समवेतसमवायादिति, इति समवायादिति पाठद्वयं दृश्यते तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि—जातेर्गन्धत्वं समवायेन जातिसमवायेन इति।

अत्रैव—समवेतसमवायाद् विशेषणे इति, समवेतसमवायाद् विशेषे इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो युक्तः, अर्थसंगतेः। अत्र पाठे विशेषे इत्यस्य जात्युत्पलादावित्यर्थः, विशेषणे इत्यपि साधुरेव। गन्धत्वविशेषस्य जातिगन्धत्वादे विशेषे जातिगन्धादौ वृत्तेः।

एतदग्रे— न चैवमिति, नैवमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दस्वारस्यभङ्गादयुक्तः।

अत्रैव—नास्त्येवेति, वस्त्येवेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

अत्रैव—सामान्यविशेष इति, विशेष इति पाठद्वये प्रथमो युक्तः, अर्थसंगतेः द्वितीयस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—गुणानामिति गुरुणानामिति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—आश्रयभेदेन इति, आश्रयाद् भेद इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—वक्ष्यत्येव इति, वक्ष्यते इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—व्यावृतोऽन्वयी प्रत्यय इति, व्यावृत्तेनान्वयी प्रत्यय इति, व्यावृतोऽन्वयि प्रत्यय इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः, तृतीयपाठस्तु साधुः, अर्थसंगतेः।

एतदग्रे—तन्निमित्तसामान्यसंभव इति, तन्निमित्तसतासामान्यसंभव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—लोकव्यवहारे परं नाभिधीयते इति, लोकव्यवहारे ह्यरोपपन्नं अभिधीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सामान्यविशेषसम्बन्धस्येति, सामान्यविशेषः सम्बन्धस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्त्वर्थासंगत्याऽयुक्तः।

अस्वशब्दाभिधानास्तु ॥ ४८ ॥

इति कारिकाया अवतरणिकायां हेलाराजीये—काश्चित्तु जातय इति, काश्चिज्जातय इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—असंविज्ञानपदा अपि इति, असंविज्ञानपरापी इति पाठद्वयं दृश्यते। तत्राद्यपाठः साधुः, अर्थसंगतेः। तथा हि—असंविज्ञानम्—अर्थसंविज्ञानरहितं पदं यासामिति विग्रहः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

एतदग्रे—सन्तीत्याह इति, सन्तीति तथाह इति, सतीत्याह इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तौ।

अस्या एव कारिकायाः प्रथमे पादे—अस्वशब्दाभिधाना इति, अश्वशब्दाभिधाना इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

अत्रैव—अत्यशब्दाभिधानास्तु इति पाठोऽपि क्वचित् दृश्यते। स तु अर्थासंगत्याऽयुक्तः।

द्वितीयपादे—नरसिंहादिजातय इति, नरसिंहा हि जातय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

तृतीयपादे—सरूपावयवेवान्या इति, सरूपावयवैषान्या इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न युक्तः, अर्थासंगतेः प्रथमपाठस्तु अर्थसंगत्या युक्तः। तदुक्तमेतद्व्याख्याने हेलाराजीये—न वास्तवमिति इव शब्द इति। सरूपावयवेनान्या इति पाठोऽपि अर्थसंगत्या युक्त एव। सरूपावयवेन इति इत्थंभूतलक्षणे तृतीया।

चतुर्थे पादे—अवस्थिता इति, अवस्थिताः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, एकवचनान्तश्रुतिपदसामानाधिकरण्यात्।

एतत्कारिका व्याख्याने हेलाराजीये—नरसिंह गौररवरत्वादिजातय इति, नरसिंह गोरखरत्वादिजातय इति, नरसिंहगोरवरादिजातय इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु गौररवरवद् यदि गोरवरो न दृश्यते तदाऽसंगतः। यदि तु स्त्रीराज्ये—(आसाम इति भाषायाम्) याक इति प्रसिद्धो गवाकृतिर्गोरवरस्तदा साधुः। तृतीयपाठस्तु गोरवरादिगता जातय इति विगृह्य-कथञ्चित्साधुः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अविद्यमाना साधारणवाचका इति, अविद्यमानाः साधारणवाचका इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तावचयवौ इति, तावयवौ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठः शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—नरत्वसिंहत्वजातिविषयेति, नरसिंहत्वजातिविषयेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि शब्दद्वयवाच्या एका नरसिंहत्वजातिः, किन्तु समासरूपैकशब्दवाच्या। सादृश्येनावभासमाना नरत्वसिंहत्वजातिप्रतिभामिति, सादृश्येनाऽवभासन्नरत्वसिंहत्वजातिप्रतिभामिति पाठद्वयमपि दृश्यते। तदुभयमयुक्तम्। तत्र प्रथमपाठे नरसिंहत्वजातिप्रतिभामिति पाठो युक्तः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगतया चायुक्तः। नरत्वसिंसित्वजातिप्रतिभामिति तृतीयपाठोऽपि शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—जात्यन्तरमेवात्रेति, जात्यन्तरमेवमात्रेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—शबलरूपे वस्तुनि इति, शबलरूपेण वस्तुनि इति पाठद्वयं दृश्यते। तत्र प्रथमपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—समवेतमिति, समवेत इति, समवेते इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयम् अर्थासंगत्याऽयुक्तम्।

एतदग्रे—एषा न शक्नोति इति, नैषाशक्नोति इति पाठद्वयं दृश्यते। तदुभयं युक्तम्—अर्थसंगतेः।

एतदग्रे—भावतश्चेति, तावतश्चेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—निरंशैवेयं श्रुतिरिति, निरंशेवं श्रुतिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अवयव सादृश्यमपि इति, अवयव सादृश्यमिति इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु इति शब्दास्वारस्यादयुक्तः। तेषां शब्दः सादृश्यमपि इति तृतीयपाठोऽपि अयुक्तः, अर्थासंगतेः।

एतदग्रे—सादृश्याभिमानमात्रमत्र परमिति, सादृश्याभिमानमात्रपरः इति पाठद्वयं दृश्यते। तदुभयं युक्तम्। तथा हि—प्रथमपाठे—परमित्यस्य केवलमित्यर्थः, द्वितीयपाठस्तु इव शब्दविशेषणम्।

एतदग्रे—यथा निरंशवाक्यस्थानामिति, यस्यानिरंशवाक्यस्थानामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रतिभोत्पादनादिति, प्रतिभोत्पादना इति पाठद्वयं दृश्यते। तदु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भयमपि युक्तम्, अर्थसंगतेः। अत्र द्वितीयपाठे यतोऽत इति पदद्वयमध्याहार्यम्, प्रतिमोपादानादिति पाठोऽपि क्वचिदुपलभ्यते। स तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--असाधारण इति, असाधारणादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु हेत्वर्थासंगत्याऽयुक्तः।

एतदग्रे—न विद्यते स्वशब्दइति, न विद्यते स्व इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अभिधीयतेऽनेनेत्यभिधानमिति, अभिधीयते नेत्यभिधानमिति पाठद्वयं दृश्यते, तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यस्याइति इति, इति यस्या इति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

जात्यवस्थापरिच्छेदे ॥ ४९ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—प्रकृतिभागस्येति, प्रकृतिपरभागस्य इति पाटद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जत्यर्थतया इति, जात्यर्थः तथा इति पाठद्वयं दृश्यतं। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—व्याप्तिमुपपाद्येति, जातिमुपपाद्येति, पाठद्वयं दृश्यते। तदुभयं युक्तम्, तथा हि—प्रथमपाठे प्रकृतिभागस्य जात्यर्थतया सह व्याप्तिमुपपाद्येत्यर्थः, द्वितीयपाठे जात्युपपादने जात्यर्थत्वं हेतुः।

एतदग्रे—तदुपपादनेन इति, तदुपपादितेन इति पाठद्वयं दृश्यये। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु कर्मणिक्ते अर्थासंगत्याऽयुक्तः, भावेक्तस्तु दुरूहः।

एतदग्रे—जात्यभिधायितायामिति, जात्यभिधायिता इति, जात्यभिधायिकायामिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतः इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

अस्याः कारिकायास्तृतीये पादे—विप्रकर्षेऽपि इति, विप्रकर्षोऽपि इति, विप्रकर्षोऽति इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्त, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त. तृतीयपाठोऽपि अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—अवस्थानम्—अवस्था. समवायः इति, अवस्थानं समवाय इति, अवस्थानमवापतायः इति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्। अर्थसंगतेः, तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—किमेकत्र द्रव्ये इति, किमेकद्रव्ये इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः। कमेकत्र द्रव्ये इति, किमनेकद्रव्ये इति पाठद्वयमपि अत्र दृश्यते। इदं द्वयमपि अर्थासंगत्याऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तिङन्तपदवाच्याया इति, सुप्तिङन्तपदवाच्याया इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—संख्याजातेरिति, संव्याख्याः जातेरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—एकार्थसमवेतसमवाय इति, एवार्थसमवेतसमवाय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जातेर्वा इति, अपि जाते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु नयुक्तः, अपि शव्दस्यैव वैयर्थ्यादिति।

एतदग्रे—स्वाश्रयविशेषेण संसर्गलक्षण इति, स्वाश्रयविशेषेण लक्षणसंसर्गः लक्षणः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दप्रतीतया इति, शब्दात्प्रतीतया इति पाठद्वयं दृश्यते। तदुभयं युक्तमर्थसंगतेः।

एतदग्रे—संख्या जात्या इति, संख्या जाता इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या साधुः, द्वितीयस्तु अर्थासंगत्याऽसाधुः।

एतदग्रे—सामर्थ्यादाक्षिप्ता इति, समर्थादाक्षिप्ता इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः, द्वितीयपाठे—समर्थात्पदादाक्षिप्ता इत्यर्थः।

एतदग्रे—प्रतीतस्य ह्यवच्छेदकत्वमिति, प्रतीतस्य व्यवच्छेदकत्वमिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—न विशिष्यते इति, न विशेष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। तथा हि—न विशिष्यते इत्यस्य न व्यावृत्ताभवतीत्यर्थः। न विशेष्यते इत्यस्य तु न व्यावर्तिताभवतीत्यर्थः। अतएव द्वितीयपाठोऽयुक्तः, णिजर्थस्यात्रानावश्यकत्वात्।

एतदग्रे—शब्दवाच्या इति, शब्दवाक्या इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विशिष्टजातीय, विशिष्टजातिय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—विशिष्टसंख्यावच्छिन्न इति, विशिष्टसंख्यापरिच्छिन्न इति, विशिष्टसंख्याविच्छिन्न इति पाठत्रयं दृश्यते। तत्राद्यं द्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्याऽसाधुः। न हि अवच्छिन्नेपरिच्छिन्ने वा विच्छिन्नशब्दः प्रयुज्यते भिन्नार्थत्वात्।

एतदग्रे—साध्यत्वादिति, साध्यार्थादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे— पचतीत्यादौ प्रकृत्यर्थस्य प्राधान्यादिति प्रत्ययार्थस्य प्राधान्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, तिङन्ते प्रकृत्यर्थस्यैव प्राधान्यात्।

एतदग्रे—प्रधान्येनेत्येतद् विषयमेवेदम् इति, प्राधान्ये तपत्येतद्विषयमेवेदमिति प्राधान्येन तद्विषयमेवेदमिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः तृतीयपाठस्तु युक्तः, अर्थसंगतेः।

एतदग्रे—प्रकृतिप्रत्ययौ इति, प्रकृतिप्रत्यययोरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, ब्रूत इत्यस्य कर्तृत्वसंभवात्। द्वितीयपाठस्तु वाक्यार्थेऽसंबद्धत्वादयुक्तः।

एतदग्रे—प्रकृत्यार्थानुग्रहायेहोक्तेति इति, प्रकृत्यर्थानुग्रहायेत्युक्तेतोक्तेति इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

लक्षणाशब्दसंस्कारे ।। ५० ।

इति कारिकाया अवतरणिकायां हेलाराजीये—प्रत्ययार्थविशिष्टः प्रकृत्यर्थ इति, प्रकृत्यर्थविशिष्टः प्रत्ययार्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति वचनविरोधात्। अतएव द्वितीयपाठो युक्तः।

एतदग्रे—जात्योरिति, जात्या इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्याऽयुक्तः।

एतदग्रे—तात्पर्यभेदादिति, तात्पर्याभिदादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—न विवक्ष्यते इति, न विवर्ज्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—पदार्थस्य विचारयितुमिति, तस्य पदार्थस्य विचारयितुमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, पदार्थसामान्यविचारस्य करिष्यमाणत्वात्। अतएव द्वितीयपाठो न युक्तः।

अस्याः कारिकायाः प्रथमे पादे—संस्कारे इति, संस्काख्यो इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयायुक्तः।

अस्यास्तृतीये पादे—संख्याकर्मादिशक्तीनामिति, संख्याकर्मादिशक्तानामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, हेलाराजीयव्याख्यानुरोधात्। अतएव द्वितीयपाठो न युक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—संख्याकर्मादिशक्तीनामिति, संख्यादिकर्मादिशक्तीनामिति, संख्याकर्मादिशक्तानामिति पाठत्रयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः, द्वितीयपाठे संख्यापदोत्तरस्यादिपदस्य वैयर्थ्यम्। तृतीयपाठोऽर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—श्रुतेः शब्दस्येति, श्रुतेः शब्दस्याः इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—साम्येऽपि, साध्येऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, कारिकायां तद् दर्शनात्। अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—लक्षणा एक इति, लक्षण एक इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, मूलभूतकारिकानुरोधात्। एक इति पुंस्त्वम्—व्यापारशब्दस्य पुंस्त्वात्।

एतदग्रे—शब्दसंस्कारविषये इति, शब्दसंस्कारार्थविषये इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगते, द्वितीयपाठस्तु अर्थपदवैयर्थ्यादयुक्तः।

एतदग्रे—प्रातिपदिकार्थमात्रस्येति, प्रातिपदिकमात्रस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, न हि प्रातिपदिकस्य संख्याकर्मादि संयोगवियोगौसंभवतः।

एतदग्रे—शब्दसंस्कारार्थं स्वार्थे न इति, शब्दसंस्काराथ ··· संम्मर्ष्टीति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगते, द्वितीयपाठस्तु शब्दशुद्ध्याऽयुक्तः।

एतदग्रे—अनवधारयन्त्यपीति, अनवधारयत्यपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, एकवाक्यत्वसंभवात्। द्वितीयपाठस्तु शब्दाशुद्धेरयुक्तः।

एतदग्रे—कथमत्रैकत्वं न विवक्षितमिति पाठो दृश्यते। अत्र कथमिति पदं संपातायातम्, नत्वपेक्षितम्।

एतदग्रे—शब्दसंस्कारमात्रफलमेवेति, शब्दसंस्कारमात्रपरमेवेति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—इह वस्तुमात्रोपक्षेपः तथा कर्मादिशक्तीनामिति, इह वस्तुमात्रापेक्षतया कर्मादिशक्तीनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—उपादानेऽविवक्षा इति, उपादाने विवक्षा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः द्वितीयपाठस्तु पूर्वापरविरोधादयुक्तः :

एतदग्रे—सक्तून् जुहोति इति, शक्तं जुहोति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—हवनक्रियाया इति, अवहनक्रियाया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—क्रियाविषयत्वमात्रेणेप्सिततमा इति, क्रियाविषयत्वमात्रेणेष्टतमा इति, पाठद्वये, उभयंसाधु, अर्थसंगतेः।

एतदग्रे—क्रियासमन्वयमात्रे चरितार्था इति, क्रियासमन्वयमात्रोपारितार्था इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—भस्मसंपद्येन् इति, सूक्ष्मसंपद्येरन् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अपि तु सक्तुसाधनेन इति, अपि सक्तुसाधनेन इति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अयुक्तः। पूर्वस्माद् वैलक्षण्यद्योतकस्य तु शब्दस्य अभावात्।

एतदग्रे—सक्तुसाधनेन तेनादृष्टमिति, सक्तुसाधनेनादृष्टमिति पाठद्वयं दृश्यते। तदुभयं सधु, अर्थसंगतेः।

एतदग्रे—अदृष्टार्थत्वात् क्रियाया इति, अदृष्टार्थायाः क्रियाया इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्या अयुक्तः।

एतदग्रे—सतो ह्यविवक्षाशब्दोपात्तस्य न्याय्या इति, सतो ह्यविवक्षा इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

अत्रैव—शब्दोपात्तन्याय्या इति पाठोऽपि क्वचिद् दृश्यते स तु अयुक्तः, समासे अर्थसंदेहेन विवक्षितार्थाप्रत्ययात्।

एतदग्रे—इत्येकत्वस्य नत्वसत इति, इत्येकस्येत्वस्यत इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—कर्मशक्तिरविवक्षितेत्युच्यते इति, कर्मशक्तिरपि विवक्षितेत्युच्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्था-संगत्याऽयुक्तः।

एतदग्रे—न संपद्यते इति, न संपद्येत इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्त, क्रियातिपत्तौ लिङ्लृङोर्युक्तत्वात्। अतएव द्वितीयपाठो युक्तः।

एतदग्रे—यदि सक्तव इति यदि शक्तिवदिति इति पाठद्वयं दृश्यते। तत्रा-द्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इप्सिततमत्वेन नाश्रीयेरन् इति, ईप्सिततमत्वेनाश्रीयेरन् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्यायुक्तः।

एतदग्रे—सक्त्वार्थता इति, सक्त्वर्थिता इति, सत्वार्थता इति, सत्कर्थता इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः, इतरत्पाठ-त्रयं तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

एतदग्रे—अभ्युपेतव्या क्रियाया इति, अभ्युत्येतरस्याः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

एतदग्रे—आराधनस्य देवतार्थता इति, आराधनस्य देवतार्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अदृष्टार्थमेव हि देवताऽऽराध्यते इति, दृष्टदेवताऽऽराध्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्यदेवतार्थत्वे इति, इति देवतार्थत्वे इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—हीयेत इति ह्लीयेत इति पाठद्वये आद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु उभयाभावादयुक्तः।

एतदग्रे—एवमिह इति, मेव न हि इति पाठद्वयं दृश्यते तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—सक्तवोऽदृष्टस्येति, सक्तवो दृष्टस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठेऽपि अदृष्टस्येति च्छेदः कार्यः।

एतदग्रे—भवन्त्येवेप्सिततमा इति, भवन्त्येवेष्टतमा इति पाठद्वयं दृश्यते। अत्राद्यपाठ एव युक्तः, ईप्सिततमानामेव कर्मत्वसंभवात्। अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—अविवक्षितन्तु तदीप्सिततमत्वमिति, अविवक्षिततमं एवं तादीप्सिततमत्वमिति पाठद्वयं दृश्यते।। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—न ग्रहाणामिवेति, न ग्रहणामिवेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—रूपान्तरेणोपादानादिति, रूपान्तरेणादपानादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—कारकान्तरापेक्षया सच्चाविवक्षितञ्चेति, कारकान्तरापेक्षमासत्त्वं विवक्षितञ्चेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। कारकान्तरापेक्षया सत्वात्रिवक्षितञ्चेति तृतीयपाठोऽप्यत्रोपलभ्यते। सोऽपि शब्दाशुद्ध्याऽर्थासंगत्या चायुक्त इति।

एतदग्रे—स्थितमिति, स्थितामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—संख्याकर्मादिशक्तीनामिति, संख्याकर्मादिव्यक्तीनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—वाक्यार्थभूतायाः इति, वाक्यार्थभूतार्थामाः इति, वाक्यार्थभूताथ भूताया इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठः शब्दाशुद्ध्याऽयुक्तः। एवं तृतीयपाठोऽपि शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—द्रव्यावच्छेदोपयोग इति, द्रव्यवदुपयोग इति पाठद्वयं दृश्यते। तत्रोभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—अत्र हि यजिरेकेनापि पशुना इति, अत्र यजिरेकेनायविपशुना इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। अत्र हि यजिरेकेन पशुना विअविक्रल इति पाठोऽपि दृश्यते। अयमपि शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—कर्मशक्तेश्च विवक्षा इति कर्मशक्तेश्चाविवक्षेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—पुरोडाशयोग्यस्वरूपातिशयप्रतिलम्भेन इति, पुरोडाशयोग्यतातिशयप्रतिपादनेन इति, पुरोडाशयोग्यतातिशयप्रतिलम्भेन इति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः, मध्यमस्तु पाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—यज्यङ्गतासिद्धेरिति, पश्वङ्गतासिद्धेरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि व्रीहिणां तदवघातस्य वा पश्वङ्गता।

एतदग्रे—संस्कार्या व्रीहय एवेति, संस्काकारार्था व्राहय एवेति पाठद्वये—आद्यः साधुः शब्दशुद्धेरर्थसंगतेश्च, द्वितीयपाठस्तु उभयाभावादयुक्तः। संस्कार्यान्नाहयभत्रप्रधानमिति तृतीयपाठोऽप्ययुक्तः, शब्दाशुद्धेरर्थासंगतेश्च।

एतदग्रे—संस्कार्यमिष्यते इति, संस्कारयिष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः. अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सक्तवोनोपयोक्ष्यन्ते इति, सक्तवो नो·········रूपेण कथ्यते इति, सक्तयोर्नोपयोक्ष्यन्ते इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तौ।

एतदग्रे—नोपयुक्ताश्च ते क्वचिदिति, नोपयुक्ताश्चेत्क्वचित् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु छन्दोभङ्गाद् अर्थासंगतेश्चायुक्तः।

एतदग्रे—रूपेण कथ्यते इति, रूपेणाकथ्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु आकथ्यते इति पाठे आङो वैयर्थ्यादयुक्तः। अकथ्यते इतिच्छेदे समासासाधुत्वम्।

एतदग्रे—शब्देन तु रूपेण इति शाब्देन रूपेण इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—कारकत्वमत्रेति, कारुत्वमात्रेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—वाक्यार्थप्रधानभूताक्रिया इति, वाक्यार्थक्रियाप्रधानभूता इति, वाक्यार्थः प्रधानभूताक्रिया इति पाठत्रयं दृश्यते। तत् त्रितयमपि साधु, अर्थसंगतेः

एतदग्रे—तानिद्वैधं गुणप्रधानभूतानि इति इति, तानिद्वैधं गुणप्रधानभूतानि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, इति शब्दस्यार्थसंगत्यै आवश्यकत्वात्। अतएव द्वितीय पाठो न युक्तः।

एतदग्रे—पूर्वे तु इति, पूर्वं तु इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—पठन्त इति, पटत इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—शब्दसंस्कारमात्रोपयोगिसंख्योपादानमिति, शब्दसंस्कारमात्रोपयोगिद्रव्योपादानमिति, शब्दसंस्कारोपयोगिमात्रद्रव्योपादानमिति, पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः शब्दसंस्कारे संख्याया उपयोगात्। इतरत्पाठद्वयन्तु अर्थासंगत्याऽसाधु, न हि द्रव्यं शब्दसंस्कारे उपयोगीति।

एतदग्रे—सामानाधिकरण्यं व्याचक्षते इति, सामानाधिकरण्ये व्याचक्षते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

न बिनासंख्यया कश्चित् ।। ५१ ।

इति कारिकाया द्वितीये पादे—सत्त्वभूतोऽर्थ इति, सत्त्वभूतार्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, व्यासे उद्देश्यविधेयभावावगमात्। समासे तदनवगमाद्, द्वितीयपाठो न युक्तः।

अस्या एव कारिकायास्तृतीये पादे—निर्देशे इति, निर्देश इति निर्देशम् इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, हेलाराजीये सप्तम्यन्तस्यैव व्याख्यानाच्च। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतत्कारिका व्याख्याने हेलाराजीये—साक्षान्निर्दिदिक्षितम् इति, साक्षाद् विदितदिदृक्षितमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त,, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—निर्देशमात्रे इति, निर्देशमात्रेण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रकृतिः प्रयोक्तव्या इति, प्रकृतिः प्रयोक्तव्ये च इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विवक्ष्यते इत्युत्सर्ग इति, विवक्षिता इत्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठोऽपि युक्तः, अर्थसंगतेः।

एतदग्रे—तद्धितार्थनिर्देशे लिङ्गवचनमिति, तद्धितार्थेलिङ्गवचनमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तदविवक्षान्यायाया इति, तदविवक्षान्यथा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रकृतिप्रत्ययार्थयोः शब्दप्रयोगस्यैव इति, प्रकृतिप्रत्ययाः शब्दप्रयोगस्यैव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु पदार्थसंसर्गानुपपत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—एवेति हि वक्ष्यति इति, एवेति वक्ष्यति इति पाठद्वयं दृश्यते तदुभयं साधु, अर्थसंगतेः

एकत्वं वा बहुत्वं वा ।। ५२ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—केचिद् विशेषमाहुरिति, केचिद्विषयमाहेति, क्वचिद् विषयता माहेति पाठत्रयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम् ।

अस्या कारिकायाः प्रथमे पादे—एकत्वञ्च वहुत्वं वा इति, एकत्वं वा बहुत्वं वा इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः द्वितीयपाठस्तु अर्थसंगत्यायुक्तः ।

अस्या एव द्वितीये पादे—केषाञ्चिदविवक्षितमिति, केषोचिदविवक्षितमिति पाठद्वयं दृश्यते । तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽसाधुः ।

एतत्कारिकाव्याख्याने हेलाराजीये—यज्जातौ न संभवति इति, यज्जातौ संभवतीति पाटद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—व्यवच्छेदकतयाऽवसीयते इति, व्यवच्छेदकतयाऽऽश्रीयते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठोऽपि अर्थसंगत्यायुक्तः।

एतदग्रे—न्याय्या, न तु स्वगता इति, न्याय्या, या तु स्वगता इति पाठद्वयं दृश्यते । तत्राद्यपाठोऽर्थसंगत्यासाधुः, द्वितीयपाठस्तु अर्थासंगत्याऽसाधुः ।

एतदग्रे—एकत्वबहुत्वलक्षणा इति, द्वित्वबहुत्वलक्षणा इति, पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—प्रक्रियाप्रमाणमिति, प्रक्रिया या प्रमाणमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—कश्चिदास्थेय इति, कश्चिदाख्येय इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—तथातिदेशिकमिति, तथा निर्देशकमिति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः। तथा हि—अतिदेशोऽस्ति यस्मिन् सूत्रे विधेयत्वेन इति मत्वर्थे ठन् ।

एतदग्रे—एकस्मिन् बहुवचनमिति, एकस्मिन्बहुवचनमन्यतरस्याम् इति पाठद्वयं दृश्यते । तदुभयं युक्तम्, लक्ष्याविरोधात् ।

एतदग्रे—तत्र द्रव्यपराचोदनेति इति, तत्र चोदनेति इति, तत्र द्रव्यपराचोद्यतेति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—द्रव्याश्रयमेवेति इति, द्रव्याश्रयमिति इति, द्रव्यमाश्रयतेति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयमर्थसंगत्यायुक्तम्, तृतीयस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—विवक्ष्यते सर्वत्र इति, सर्वत्र विवाक्षतमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयस्तु शब्दाशुद्ध्याऽयुक्तः।

यद्येतौ व्याश्रितौस्याताम् ।। ५३ ।

इति कारिकायाः प्रथमे पादे—व्याधितौ स्याताम् इत्यस्यस्थाने—व्यधितौ स्यातामिति क्वचित्पाठः स तु अयुक्तः, अशुद्धेः।

द्वितीये पादे—देयमिति, देवमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्यास्तृतीये पादे—लक्षणेऽर्थस्य इति, लक्षणेऽर्थेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु छन्दोभङ्गो दोषः।

एतत्कारिकाव्याख्याने हेलाराजीये-औषधदानविषयभूतव्याधितोपलक्षणार्थ-स्यैवमनेन प्रकारेण इति, औषदानविषयभूतव्याधितोपलक्षणार्थँवमनेन प्रकारेण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अग्रिमग्रन्थानुरोधात्। अतएव द्वितीय, पाठो न युक्तः।

एतदग्रे—अनेन प्रकारेण व्याधिं निमित्तत्वेनोपादाय इति, अनेक प्रधानेन प्रकारेण व्याधितत्वनिमित्तत्वेनोपादायेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—उपलक्षणस्यैतावित्येवमिति, उपलक्षणस्यतािविति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। कारिकायाम्—एतावित्यस्यैव श्रवणात्।

एतदग्रे—लक्षणे ज्ञापने इति, लक्षणे ज्ञायते इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, ज्ञापने इत्यस्य लक्षणपदव्याख्यानरूपत्वात्। ज्ञायते इति तु अर्था-संगत्याऽयुक्तम्।

एतदग्रे—अर्थस्यौषधदानविषयस्योपलक्षणे इति, अर्थस्योपलक्षणे इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

अत्रैव—अर्थस्यौषधदानविषयस्येति, अर्थस्यौपाधान्नविषयस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः।

अत्रैव—औषधदानविषयस्येति, औषधदानविषयभूतस्येति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—व्याधितान्तरनिवृत्त्यर्थमित्ति, व्याधितनिवृत्त्यर्थमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः तथा हि—व्याधितान्तरेत्यस्य एतदतिरि-क्तव्याधितेत्यर्थः, द्वितीयपाठे तु अर्थासगतिः स्फुटैव न हि व्याधितमात्र निवृत्ति-रत्राभिप्रेता इति।

एतदग्रे—उपादीयमानमेकस्यापि इति, उपादीयमानएकस्यापि इति पाठद्वयं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यते । तत्राद्यपाठो युक्तः, एतावितिपदस्य क्लीवत्वात्, अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे--द्वयोरपि तत्संभव इति, द्वयोरपि तद्भव इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—प्रधानेऽत्रेति, प्रधाने चात्रेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे चशब्दो व्यर्थः ।

एतदग्रे—वृक्षौ छेत्तव्याविति तत्र विवक्षैव इति, वृक्षौ च छेतव्याविति तत्र विवक्षैव इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे च शब्दो व्यर्थः ।

एतदग्रे - न हि भविष्यतो नियमेन इति, न हि भविष्यता नियमेन इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—साहूभाव्यं निर्णीयते इति, सहूभाव्यं निर्णीयते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, चतुर्वर्णादित्वात्स्वार्थेष्यञ् । अतएव द्वितीयपाठोऽयुक्तः, अर्थासंगतेश्च ।

एतदग्रे—नियम्यते इति, निर्णीयते इति पाठद्वयं दृश्यते । तदुभयमपि साधु अर्थसंगतेः ।

एकादिशब्दवाच्याया ।। ५४ ।

इतिकारिकाया अवतरणिकायां हेलाराजीये—विवक्षिताविवक्षितत्वमिति, अविवक्षितत्वमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः प्रत्यगोपात्तया जातेर्विवक्षाया अनैकान्त्यात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे--प्रकृत्युपादानाया एकान्तेनैवेति, प्रतिपादनाय एकान्तेनैव इति, प्रकृत्युपादानायाधिकां तेनैव इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

अस्याः कारिकाया द्वितीयेपादे—कर्मण्यङ्गत्वमिष्यते इति, कर्मस्वङ्गत्वमिष्यते इति पाठद्वयं दृश्यते । तदुभयमपि साधु अर्थसंगतेः, प्रथमपाठे जातावेकवचनमिति पाठद्वयोपपत्तिः साम्येन ।

अस्याः कारिकायास्तृतीये पादे—रवनति इति, रवचति इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अत्रत्य हेलाराजीयानुरोधात् ।

एतत्कारिकाव्याख्याने हेलाराजीये—चतुर्भिरादत्तं इति, चतुर्भिरादिते इति पाठद्वयं दृश्यते तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे--षड्भिरिति, अष्टभिरिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, उपलम्भात् । द्वितीयपाठस्तु अनुपलम्भपराहतः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—प्रवृत्तिनिमित्तभूताया इति, प्रकृतिनिमित्तभूताया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सा संख्याविवक्षितैव इति सा संख्यापि वक्षितैव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—शब्दार्थ एव त्यक्तः इति, शब्दार्थ एक त्यक्त इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अन्यथानुपपन्नप्रयोगस्येति, अन्यथाऽनुपपन्नस्य प्रयोगस्येति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—विशिष्टसंख्याभिधायिनः इति, विशिष्टसंख्याविधायिनः इति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि—प्रातिपदिकस्य विशिष्टसंख्याविधायित्वमुपपद्यते, दृश्यते वा।

एतदग्रे—प्रातिपदिकपर्याय इति, प्रातिपदिककालपर्याय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न विभक्तेरित्यर्थः इति, न विशक्तिरीत्यर्थ इति पाठद्वयं दृश्यते। तदुभयमयुक्तम्, अर्थासंगतेः, शब्दाशुद्धेश्च न विभक्तिरित्यर्थ इति पाठस्तु युक्तः।

एतदग्रे—यथा द्विपुत्र इत्यादाविति, यथा हि पुत्र इत्यादाविति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—एकार्थीभावान्निवर्तते इति, एकार्थीभावं निवर्तते इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—तदभावे हि शब्दप्रयोग इति, तदभावे हि प्रयोग इति पाठद्वयं दृश्यते। तत्राद्यपाठोर्थसंगत्यायुक्तः, द्वितीयपाठस्तु आकाङ्क्षापराहतः। एतस्मिन् पाठे हि—कस्य प्रयोग इत्याकाङ्क्षा न निवर्तते।

एतदग्रे—साहाय्यं गच्छति इति, साहचर्यं गच्छति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यस्योभयं हविरार्तिमार्च्छेत् इति, यस्या हविरावृत्तिमागच्छति इति, यस्योभयं हविरार्तिमार्च्छति इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः. इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

तथा हि—द्वितीयपाठे हविष आवृत्युपगमो न प्रकृतोपयोगी, किन्तु हविषोभ्रंश इति। किञ्चात्र पाठे वर्तमानप्रत्ययो न युक्तः। एवं तृतीयपाठेऽपि वर्तमाननिर्देशो न युक्तः, उत्तरत्र निर्वपेत् इति लिङ्गश्रवणात्।

एतदग्रे—पञ्चशरावमोदनमिति, पञ्चशतवमोदनमिति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। तथा हि—पञ्चसुशरावेषु संस्कृत ओदनः पञ्चशराव इति। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अवयवद्वयारब्धः संघ इति, अवयवद्वयारब्धः संध इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—उभयशब्दवाच्यः इति, उभयशब्दवाच्ये इति, उभयशब्दवाच्या-मिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः। प्रथमान्तसंघशब्दसामानाधिकरण्यात्। इतरत्पाठद्वयन्तु तदसंभवादयुक्तम्।

एतदग्रे—संख्यावाच्युभयशब्द इति, संख्या या ह्युभयशब्द इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्त, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—विनाशान्निर्वाप इति, विनाशाभिवायः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्ध्या चायुक्तः।

यजेत पशुनेत्यत्र ॥ ५५।

इति कारिकाया अवतरणिकायां हेलाराजीये—इदानीं यदुक्तमिति, इदानीं यतदुक्तमिति, इदानीमुक्तमिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—द्वित्वमेव विवक्ष्यते इति, द्वितमेव विवक्ष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

अस्याः कारिकायाः प्रथमे पादे—पशुनेत्यत्र इति, पशुतन्मात्र इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

अस्या एव द्वितीये पादे—संभवे इति, संभवः इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव तृतीये पादे—तथैकत्वमिति, तदैकत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः पूर्वं यथापदस्य श्रवणात्, द्वितीयपाठस्तु न युक्तः, पूर्वं यदा पदस्याश्रुतेः।

एतत्कारिकाव्याख्याने हेलाराजीये—शब्दसंस्कारार्थत्वमिति, शब्दशब्द-संस्कारार्थत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे पुनरुक्तिदोषः।

एतदग्रे—विभक्तिवाच्यमेकपदोपादानादिति, विभक्तिवाच्यमेव कुत एक-पदोपादानादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—जातिवदेकत्वमपि, जातिपदैकत्वमपि इति पाठद्वयं दृश्यते। तत्राद्य-पाठोऽर्थसंगत्या युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—एकपदोपादानः इति, एकपदोपादाने इति पाठद्वयं दृश्यते। तत्राद्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाठो युक्तः, अर्थविशेषणत्वेनप्रथमान्तपाठस्यैवौचित्यात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे—विपरिवर्तमान इति, विवर्तमान इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु विरुद्धार्थमतिक्रत्त्वादयुक्तः ।

एतदग्रे—एकेन च इति इति, एकेनवेति इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, समुच्चयस्यौचित्यात् । द्वितीयपाठस्तु विकल्पाप्रसङ्गादयुक्तः ।

एतदग्रे—विशिष्टः पदार्थोऽभिधीयते इति, विशिष्टार्थोऽभिधीयते इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसगतेः, विशिष्टः प्रत्ययार्थोऽभिधीयते इति तृतीय-पाठस्तुऽर्थासंगत्याऽत्यन्तमसंगतः ।

एतदग्रे—तेन अभिन्नयैव प्रवृत्त्या संस्पृश्यते इति, तेनाभिधेयैव संपृश्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः, तेनाभिधयैव प्रवृत्त्या संपृश्यते इति तृतीय पाठोऽपि अयुक्तः । अर्थासंगतेः, न हि अभिधा प्रवृत्तिरूपा इति ।

एतदग्रे--एकपदत्वेऽन्तःपदसंबन्धस्येति, एकपदत्वेतः पदसंवन्धस्येति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एकपदत्वेऽन्तः पदं संबन्धस्येति तृतीयपाठोऽपि युक्त एव, अर्थसंगतेः, अन्तः पदमिति सप्तम्यर्थेऽव्ययीभावः ।

एतदग्रे—शक्यविधानमिति, शक्यमभिधानमिति पाठद्वयं दृश्यते । तत्राद्य-पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—संस्पर्शे इति, स्पर्शे इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थ-संगतेः ।

एतदग्रे—भिन्नपदोपादानन्तु कदाचिद् भेदेन इति, भिन्नपदोपादानन्तु वस्तु-भेदेनेति पाठद्वयं वर्तते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—यथा रक्तमश्वमानयेति, यथा रक्ताश्वमानयेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अग्रे व्यस्तस्यैव परामर्शात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे—औपादानिकोविनियोग इति, भेदौदानिकोविनियोगो रक्तमानयेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—वाक्यीयः समन्वय इति, वाक्यार्थसमन्वय इति, वाक्यः समन्वय इति, वाक्यसमन्वय इति पाठचतुष्टय दृश्यते । तत्र प्रथमद्वितीयचतुर्थपाठा युक्ताः, अर्थसंगतेः, तृतीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः ।

एतदग्रे – शक्यविधानमिति, शक्याभिधानमिति, पाठद्वयं दृश्यते । तत्राद्य-पाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—विनियोजिकयेति, विनियोजकतयेति पाठद्वयं दृश्यते । तदुभयं युक्तम्, अर्थसंगतेः, द्वितीयपाठे—विनियोजकतयेति हेतौ तृतीया ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—गुणस्य । संख्यायाः इति, गुणसंख्याया इति पाठद्वयं दृश्यते । तत्र प्रथमे पाठे—मध्ये विच्छेदरेखा न युक्ता ।

एतदग्रे—श्रुत्यादिप्रमाणषट्कव्यतिरिक्त इति, श्रुत्यादिषड्व्यतिरिक्त इति पाठद्वयं दृश्यते । श्रुत्यादिप्रमाणव्यतिरिक्त इति तृतीयपाठोऽपि दृश्यते । तदेतत् त्रितयमपि साधु अर्थसंगतेः ।

एतदग्रे—द्रव्यमात्रं विधिरिति, द्रव्यभावं विधिरिति पाठद्वयं दृश्यते । तदुभयमपि युक्तम्, अर्थसंगतेः ।

एतदग्रे—एकरसया शाब्द्या इति, एकरसपाशाद्या इति, एकरसयष्टया इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

लिङ्गात्तुस्याद् द्वितीयादेरिति ॥५६।

कारिकाया अवतरणिकायां हेलाराजीये—बाधकमन्तरेण इति, वाचकमन्तरेण इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतत्कारिकाव्याख्याने हेलाराजीये—वाक्यान्तरगतादिति, वाक्यादन्तरङ्गत्वादिति, वाक्यान्तरगतत्वादिति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

एतदग्रे—द्वितीयमुक्थ्ये इति, द्वितीयद्वितीयमुक्थ्ये इति, द्वितीयं कथ्यते इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

एतदग्रे—पृश्निमिति, वृष्णिमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयापाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे -तृतीयं षोडशिनि इति, तृतीयं षोडशिनमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, पूर्वम् अग्निष्टोमे इति उक्थ्ये इति सप्तम्यन्तपाठस्यैव दर्शनात् ।

एतदग्रे—द्वितीयादित्वेनाजो विशेष्यते इति, तद्वदजाद् विशेष्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--स्यादित्यस्मादभिधानसामर्थ्यादिति, स्यादित्यभिधानसामर्थ्यादिति पाठद्वयं दृश्यते । तदेतदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—अभिधानसामर्थ्याद् विवक्षितमेकत्वमिति, अभिधानसामर्थ्याद् द्वित्वमेकत्वमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—नन्वविवक्षायामप्येकत्वस्येति, न च विवक्षायामप्येकत्वस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

इतः पूर्वम्—इत्थादिपुनर्विधानमिति, इत्याद्युपधानमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—अनियतसंख्याप्रसङ्गे इति, अनियतसंख्याप्रसङ्गेन इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—द्वितीयादित्वेन विशेषणादिति, द्वितीयादित्वेनाविशेणादिति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः,।

एतदग्रे—पक्षेऽनुवाददोष इति, पक्षेऽनुपादानदोष इति, पक्षे तु वादे दोष इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः तृतीयपाठोऽपि अर्थासंगत्याऽयुक्त एव।

एतदग्रे—स्यादित्यविकल्पितमिति, स्यादित्येव विकल्पितमितिपाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽ-युक्तः।

एतदग्रे—एकाश्रये परिसमाप्तत्वमिति, एवाश्रयपरिसमाप्तत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यथा ह्येकत्वमिति, यथा ह्येकत्वे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगते, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, यथाप्येकत्वमिति तृतीयपाठोऽपि अर्थासंगत्याऽसाधुः।

एतदग्रे—अनेकार्थसमवाये इति, अनेकार्थसमये इति, अनेकार्थत्वे इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—यो द्वयोः पूरण इति, यो यस्य पूरण इति, या यस्य पूरण इति, यो दशप्तरण इति, यो द्वयोर्द्वयोः पूरण इति, यः प्रवृत्तौ द्वयोः पूरण इति पाठषट्कं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, इतरत्पाठपञ्चकमयुक्तम्, अर्थासंगतेः।

एतदग्रे—जात्येकदेश इति, जात्यैकदेश इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

एतदग्रे—जातिः प्रकृत्यर्थ इति, जातिर्नप्रकृत्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अन्यथैकत्ववदिति, अर्थैकत्वञ्चेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तस्मादेकत्वमिति, तस्यादेकत्वमिति, कस्मादेकत्वमिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः, इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तम्।

एतदग्रे—एतल्लिंगमिति, एवं लिगमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तावतोऽर्थस्येति, तावताऽर्थस्येति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यथाचैकत्वं विवक्षां विना इति, यथाचैकत्वविवक्षां विनेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तत्समानविषयत्वमपि विनेति। अन्यथेति, तत्समानविषयत्वमपिनेत्यन्यथेति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—साकल्येन प्रकृत्यर्थं इति, सप्रकृत्यर्थं इति, साप्रकृत्यर्थं इति पाठत्रयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः, इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—नोपात्तः स्यादिति, नोपात्ता स्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, प्रकृत्यर्थ इति प्रागुपात्तेन पुंसा संबन्धात्। अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—अनेकाश्रयवृत्तित्वादिति, अनेकाश्रयपरिसमाप्तत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्यायुक्तः, द्वितीयपाठोऽपि युक्त एव अर्थसंगतेः।

एतदग्रे—सिद्धमित्येकत्वेनैव इति, सिद्धमत्येकत्वेनैव इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः। द्वितीयपाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—एतदेकार्थसमवाये इति, एकार्थसमवायः इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः, द्वितीयपाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—लिंगमवगन्तव्यमिति, लिंगादवगन्तव्य इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तुपूर्वत्र एकार्थ समवायः इति पाठे सति साधुरवगन्तव्यः।

अन्यत्राविहितस्यैव ॥५७॥

इति कारिकायाः प्रथमपादे - अन्यत्राविहितस्यैव इति, अन्यत्राविहितस्यैवेति पाठद्वयम् अस्ति, तत्राद्यपाठ एव युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अस्या एव कारिकाया द्वितीयेपादे—पशोरिति, प्रशोरिति पाठद्वयमास्ते। तत्राद्यपाठ एव युक्तः साधुत्वात्। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। अस्या एव कारिकायाश्चतुर्थेपादे—तत्वे तस्माद विवक्षितमिति, तथैतत् स्याद् विवक्षितमिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसङ्गतेः, हेलाराजीयानुरोधाच्च। द्वितीयपाठस्तु उक्तहेतुद्वयाभावादयुक्तः। ततस्तस्माद् विवक्षितमिति तृतीयपाठोऽपि अयुक्त एव। पुनरुक्तिदोषात्। ततस्तस्मादितिपदद्वयं पुनरुक्तमत्र। एतत्कारिकाव्याख्याने हेलाराजीये-गुणविधिस्तात्पर्यंत इति, गुणे विधिस्तात्पर्यंतः इति पाठद्वयं दृश्यते। गुणविधिस्तात्पर्यः इति तृतीयोपाठोऽपि दृश्यते। तत्राद्यपाठद्वयं साधु, अर्थसङ्गतेः। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे— चाज्ञातस्येति, चज्ञातस्येति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—मुत्पन्नइव इति, मुत्पन्नादेव इति, मुत्पन्नैनैव पशुनैवज्ञा इति पाठत्रयं दृश्यते। एतत्सर्वमसाधु, अर्थासङ्गतेः। मनुत्पन्न एव पशुरनेनैवज्ञापितत्वादिति पाठस्तु अनुपलभ्यमानोऽपि युक्तः, अर्थसङ्गतेः।

एतदग्रे—ज्ञप्तिरेव इति, ज्ञाप्तिरेवा इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः साधुत्वात्। द्वितीयपाठस्तु न युक्तः असाधुत्वात्।

एतदग्रे—यजिक्रियाविषयेणनाङ्गित्वेन इति, क्रिया विषयेणाङ्गित्वेनचेति, क्रियाविशेषणाङ्गित्वेनेति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—कारणद्वयात् इति, करणद्वयादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तत् एकत्वमत्रविवक्षितमिति, तदेकत्वंविवक्षितमिति। पाठद्वयं दृश्यते। तदुभयमपिसाधु, अर्थसंगतेः।

एतदग्रे—त्यज्यतामिति, त्यजतामिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दचोदिता जातिरिति, शब्देचोदिता जातिरिति, शब्दचोदिते जातिशब्द इति पाठत्रयं दृश्यते। तत्राद्य पाठोयुक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—शब्दश्चप्रथममिति, शब्दस्यप्रथममिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—नतुशब्दान्तरमिति, नुतुशब्दान्तरमिति, ननुशब्दान्तरमिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—संख्यान्तरयुक्तमिति, संख्यान्तरप्रयुक्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—ग्रहादिवदस्तीति, ग्रहादिवस्त्विति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अङ्गत्वोपदेशश्चेति, यथोपदेशश्चेति, पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यागस्येति, पशुयागस्येति पाठद्वयं दृश्यते। तत्र द्वितीयपाठे पशु पदं व्यर्थम्।

एतदग्रे—ह्यङ्गितयोपदेश इति, ह्यङ्गतयोपदेश इति, इति ह्यङ्गतथोपादेय इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरपाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—स्यात्पशोरिति, स्यात्पतेरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, शब्दशुद्धेरर्थसंगतेश्च द्वितीयपाठस्तु तदुभयाभावादसंगतः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तदाग्रहमिति, यदाग्रहमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, यदार्थकस्य यदीत्यस्य पूर्वमुपन्यासात्।

एतदग्रे—भवेदविवक्षेत्यर्थं इति, भवेदविवक्षाकारणं ··· ··· ···· पशोरिति, भवदेप्यविवक्षेति पाठत्रयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। अत्र अविवक्षा इत्यस्य संख्याया इति शेषः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—एकत्वविशिष्टसाधनसाध्यत्वेन इति, एकत्वविशिष्टसाधनं साध्यतेन इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, अर्थसंगतेः। इतरस्तुपाठोऽर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रधानमवगतमिति, प्रधानमेवगतमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—अनियतानेकसंख्येति, अनियतान्येकसंख्येति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अङ्गभावस्यविधिरिति, अङ्गभावस्यविधिरिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अत्रैव—प्रथमं क्रियायामिति, सप्रथमक्रियायामिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अत्रार्थानुपयोगादयुक्तः।

एतदग्रे—एतन्न्यायवैपरीत्येनेति, एवं न्यायवैपरीत्येन इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, न्यायवैपरीत्यस्य पूर्वमनुक्तेः। न्यायवैपरीत्येन इति तृतीयपाठोऽप्यत्रायुक्त एव कस्य न्यायवैपरीत्येन इत्यर्थस्यानवगमात्।

एतदग्रे—संमार्ष्टि इति, समाष्टामिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

ग्रहास्त्वन्यत्रविहिता ।। ५८ ।

इति कारिकायाः तृतीयपादे—प्राजापत्यानवेत्येवमिति, प्रजापत्योभवत्येवमिति, प्रजापत्याहवेत्यवमिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

अङ्गत्वेन प्रतीतानामिति ।। ५९ ।

कारिकायाः प्रथम पादे—अङ्गत्वेन प्रतीतानामिति, अगप्रत्वेन प्रतीतानामिति, अङ्गत्वेन प्रसिद्धानामितिपाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौयुक्तौ, अर्थसंगतेः शब्दशुद्धेश्च। द्वितीयस्तु पाठः शब्दाशुद्धयाऽयुक्तः।

अस्या एव कारिकाया द्वितीये पादे—संमार्गेत्वङ्गिनां पुनरिति संमार्गेत्यं विना पुनरिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्यायुक्तः। अस्या एवकारिकायाश्चतुर्थपादे—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विवक्षितेति, विवक्षितामिति, विवक्षिताः इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः। अर्थसंगतेः। पदार्थान्वयानुरोधाच्च। द्वितीयतृतीयपाठौ तु अयुक्तौ। पदान्तर-सामानाधिकरण्यानुपपत्तेः। अस्या एव कारिकाया व्याख्याने हेलाराजीये—प्रातः सवनेग्रहानिति, ग्रहान्सवने इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः वेदे तथैव पाठोपलब्धेः। द्वितीयपाठस्तु वेदे तथाऽनुपलब्धेरयुक्तः। अत्रैव—गृह्णाति इति, गृहाह्णातिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, साधुत्वात्। द्वितीयपाठस्तु अयुक्तः असाधुत्वात्।

एतदग्रे—ऐन्द्रावायवंग्रहमिति, इन्द्रवायवंग्रहमिति, ऐन्द्रग्रहमिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीयपाठस्तु वेदे तथानुपलब्धेरयुक्तः।

एतदग्रे—मैत्रावरुणमिति, मित्रावरुणमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु विशेष्यसामानाधिकरण्यानुपपत्त्याऽयुक्तः।

एतदग्रे—ग्रहाणांसोमाधाराणां पात्राणामिति, गृहाणां त्रयाणामिति, सोमा-धाराणां पात्राणामिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्त, अर्थसंगतेः शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धया अर्थासंगत्याचायुक्तः। तृतीयपाठस्तु ग्रहपदार्थानिरू-क्त्याऽयुक्तः।

एतदग्रे—सोमधारणार्थमुपदेशइति इति, सोमधारणार्थमुपदेश इति मते इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः। अर्थानुगमात्। द्वितीयपाठस्तु न युक्तः। मत-भेदाभावात्।

एतदग्रे—तत्र प्रप्ताधान्यादिति, तत्र प्राप्ताधान्यदिति, तत्र प्राधान्यादिति, तत्राप्राधान्यादिति पाठचतुष्टयं समुपलभ्यते। तत्र तृतीयपाठोऽर्थसंगत्या शब्दशुद्धया च युक्तः। इतरत् पाठत्रयं शब्दाशुद्धयाऽर्थासंगत्याचायुक्तम्।

एतदग्रे—अपूर्वोपदेशाच्चेति, अपूर्वोपदेशे च इति पाठद्वयं दृश्यते। तदुभय-मपि साधु, अर्थसंगतेः। द्वितीयपाठे-सति इति सप्तम्यन्त पदाध्याहारेण निमित्त सप्तमी बोध्या।

एतदग्रे—पशुनाइतिवदिति, पशुन्नेतिवदिति, पाठद्वयं दृश्यते। तत्राद्यपाठो-युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—नवदश इति इति, नवदेत् दिति इति पाठद्वयं दृश्यते। तत्राद्यपाठो-युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—नियोगतो विवक्षा द्वति, विनियोगतोविवक्षा इति, नियोगतोऽपेक्षा इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्था-संगत्याऽयुक्तौ।

एतदग्रे—संमार्गे तु इति, संमार्गेण तु इति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः, सप्तम्यन्तार्थस्यवाक्यार्थेऽन्वयसंभवात्। द्वितीयपाठस्तु न युक्तः, तृतीयान्तार्थ-स्यवाक्यार्थेऽन्वयानुपपत्तेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—पुनर्योऽयं ग्रहमिति इति, पुनर्योगंग्रमिति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। अत्रैव—संमार्गवाक्येषु न्याय्योऽयं ग्रहमिति निर्देश इति इति तृतीयपाठोऽपि क्वचिद्दृश्यते। सोऽपि युक्तः, अर्थसंगतेः।

एतदग्रे—पूर्वसंख्यान्वयिन इति, पूर्वं शुद्धा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—वाक्यार्थोऽवतिष्ठते इति, वाक्यावतिष्ठते इति, वाक्योऽर्थावतिष्ठते इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दार्थयोरुभयोरपि साधुत्वात्। इतरत् पाठद्वयन्तु तदभावादयुक्तम्।

एतदग्रे—हेलाराजीये समुद्धृतस्य पद्यस्य तृतीयपादे—पदानां प्रविभागेन इति, यदाप्रविभागेन इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, तदा इति प्रतिनिर्देशाभावात् छन्दोभंगात्। प्रविभाग कर्मणोऽनिर्देशाच्च।

एतदग्रे—अवान्तरवाक्यान्वयेन इति, आवान्तरवाक्यान्वयेन इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—महावाक्यार्थानुसरणेन इति, महावाक्यार्थानुसारेणइति, महावाक्यार्थासारेण इति पाठत्रयं दृश्यते। तत्राद्यंपाठद्वयं साधु, अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्यत्र इति, इत्यन्यत्र इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, तदर्थस्य प्रकृतेऽनुपयोगात्।

एतदग्रे—प्रकरणानुभूतभिन्नसंख्याकग्रहग्रहणमिति, प्रकरणानुभूतेभिन्न संख्याकग्रहग्रहणमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु सप्तम्यन्तार्थस्य वाक्यार्थे समन्वयाभावादयुक्तः।

एतदग्रे—तदनेनाविवक्षायामिति, तदनेनविवक्षायामिति पाठद्वयं दृश्यते तत्राद्यपाठ एव युक्तः। सा कथं स्याद्विवक्षिता इति एतत्कारिकातुरीयपादानुरोधात्। द्वितीयपाठस्तु अतएव न युक्तः।

एतदग्रे—अविरुद्धमनुभूतमिति, अविरुद्धंस्मृतमिति पाठद्वयं दृश्यते। तत्राद्य पाठ एव युक्तः, अनुभवस्य स्मरणापेक्षया प्रवलप्रमाणत्वात्।

एतदग्रे—तथाप्यनेकमध्यपात्येकत्वमनुभूतमिति, तथाप्यनेकमध्यपात्येकत्वमनुभूतमिति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, इतिशब्दपाठस्यवैयर्थ्यात् द्वितीयपाठो न युक्तः।

एतदग्रे—अतएव पृथक् पृथक् इति, अतएव पृथक् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, कारिकायामत्रत्यायां तथैव पाठात्। अतएव द्वितीय पाठो न युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—भूयो दर्शनेन इति, भूपोदर्शनेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु न युक्तः। तदभावात्।

एतदग्रे—तत्प्रभववासनोत्पत्तिस्थैर्यम् इति, तत्प्रभवसाधनोत्पत्तिस्थैर्यमिति, तत्प्रधानभावसाधनोत्पत्तिस्थैर्थमिति, तत्प्रभववासनोत्पन्नंस्थैर्यमिति, तत्प्रभववासनोत्पत्तिस्थैर्यस्येति पाठपञ्चकं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठचतुष्टयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—पृथक् पृथग् भिन्नसंख्यानामिति, पृथक् पृथगिति भिन्नसंख्यानामिति, पृथक् पृथगभिन्नसंख्यानामिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, इतरत् पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—तथैव स्मृतिरिति, तथैव च स्मृतिरिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, चकारस्य वैयर्थ्यात्। द्वितीयपाठे तु चकारो भिन्नक्रमः स्मृतिपदोत्तरं द्रष्टव्यः।

एतदग्रे—ग्रहैर्जुहोति इति, ग्रहान् अजुहोत् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, वेदे तथोपलम्भात्। अतएव तदभावाद्द्वितीयपाठो न युक्तः।

एतदग्रे—प्रधानोपकारायेति, प्रधानयोगकारायेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न च ग्रहैकत्वविशिष्ट इति, न ग्रहैकत्वविशिष्ट इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, स्वारस्यात्। तदभावात्तु द्वितीयपाठो न युक्तः।

एतदग्रे—क्रियायामङ्गभावाभावादिति, क्रियाया भङ्गभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः। अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—अनुभूतभेदाश्रयणादिति, अनुभूतद्रव्यान्तराश्रयणादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—चित्रगवीर्वध्नाति इति, चित्रगवींवध्नाति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, बहुत्वसंख्यायाः प्रकृते उपयोगात्। अतएव द्वितीय पाठो न युक्तः। चित्रगन्धर्वान्विगति इति तृतीयपाठोऽपि न युक्तः। शब्दाशुद्धेः।

एतदग्रे—शोणं योजय इति, शोणं याजयेत् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। तथाहि-शोणमश्वं योजय इति सुदृढा अर्थसंगतिः। द्वितीयपाठस्तु तदभावादयुक्तः। शोणमानय इति तृतीयपाठोऽपि अर्थसंगत्या युक्त एव।

एतदग्रे—चित्रशोणश्रुत्यन्यथानुपपत्या इति, शोणश्रुत्यन्यथाऽनुपपत्या इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, चित्रपदार्थस्यात्रापेक्षितस्य संग्रहात्। तदभावात्तु-द्वितीयपाठो न युक्तः। चित्रशोणश्रुत्यत्वया इति चतुर्थपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—गुणविवक्षा इति, ग्रहाणां भिन्नसंख्यानां विवक्षा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नान्यत्रविधिरस्तीति ।। ६० ।

कारिकाया अवतरणिकायाम्—इदानीमविवक्षाइति, इदानीं विवक्षा इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु तदभावादयुक्तः ।

एतदग्रे—औत्सर्गिकी इति, औत्सर्गिको इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, विशेष्यनिघ्नत्वाल्लिङ्गस्य । द्वितीयपाठस्तु भिन्नलिङ्गत्वादयुक्तः । औत्सगिका इति पाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—इतिं यत्नाद् विवक्षामिति, इयताविवक्षामिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु तदभावादयुक्तः । अस्याः कारिकायाः प्रथमेपादे - रस्तीति इति रस्तातिं इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु नैरर्थक्यादयुक्तः ।

एतदग्रे—अस्या एव कारिकाया द्वितीये पादे—चाङ्गिता इति, वाङ्गिता इति पाठद्वयं दृश्यते । तदुभयमपि साधु, वाशब्दस्यापि समुच्चयार्थकत्वात् । अस्या एव कारिकायाश्चतुर्थे पादे - विवक्षितेति, विवक्षित इति पाठद्वयं दृश्यते । तत्राद्य पाठ एव युक्तः । सा इत्यनेनसामानाधिकरण्यात् । द्वितीय पाठे तु नैतत्संभवः । एतत्कारिकाव्याख्याने हेलाराजीए - शब्दसंस्कारार्थमात्रमिति, शब्दसंस्कारमात्रार्थमिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—संमार्गे ग्रहाणामिति, संमार्गे ग्रहितामहाणामिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—हेलाराजीये उद्धृतेपद्ये—कश्चिदिति, कचिदिति पाठद्वयं दृश्यते । तत्राद्यपाठ साधुः साधुत्वात् । द्वितीयस्तु असाधुः असाधुत्वात् ।

एतदग्रे—कश्चिन्न्याय इति, कश्चित् प्रायो इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त । अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—तत्र तस्मादिति, मतस्तस्मादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—संख्या विवक्ष्यते इति, संख्याविवक्षिता इति पाठद्वयं दृश्यते । तदुभयमपि साधु । अर्थसंगतेः ।

एतदग्रे—इत्यौत्सर्गिक्या इति, इत्यैवत्सर्गिक्या इति, क्रियया औत्सर्गिक्या इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः । अर्थसंगतेः इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तम् ।

एतदग्रे—अविवक्षाया इति, अविवक्षया इति, आविवक्षाया इति, पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः । अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—विवक्षापवाद इति, आपवाद इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु तदभावादयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संमार्जनेविशेषश्चेति ।। ६१ ।

कारिकायाः प्रथमेपादे—संमार्जने इति, संमार्जनमिति, रामाज़ने इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थसंगतिशब्दाशुद्धिभ्यामयुक्तम् । अस्या एव कारिकाया द्वितीयेपादे—क्वचिदाश्रित इति, क्वचिदाश्रिता इति, क्वचिदाश्रयेस्तत इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्त, विशेषश्चेत्यनेन प्राक्तनेन ग्रन्थेन सम्बन्धसम्भवात् । इतरत्पाठद्वयन्तु तदसंभवादयुक्तम् । एतत्कारिकाव्याख्याने हेलाराजीये—ग्रहस्य संस्कारश्चोदित इति, ग्रहसंस्मरश्चोदित इति, ग्रहसंमार्गश्चोदित इति पाठत्रयं दृश्यते । तत्राद्यपाठः साधुः, पूर्वेणान्वयोपपत्तेः । इतरत्पाठद्वयन्तु तदभावादयुक्तम् ।

एतदग्रे—विहितास्ते इति, विहिताइतिस्ते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, कारिकायां तथा दर्शनात् । तदभावात्तु द्वितीयपाठो न युक्तः ।

एतदग्रे—ग्रहः स्वोत्पत्तिवाक्ये इति, ग्रहस्सौत्पत्तिवाक्ये इति, ग्रहस्योत्पत्तिवाक्ये इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । इतरत्पाठद्वयन्तु शब्दाशुद्धया अर्थासंगत्या चायुक्तम् ।

एतदग्रे—बहुत्वोनव इति, ग्रहवहत्वात्प इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—तेषां मध्यात् इति, तेषां मध्ये इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—संस्कारार्हे इति, संस्कारा‌द् बहिरिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—उत्तरत्रसोमधारणे इति, उतरषासामेधारणे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—विहितानांयद्येक इति, विहितानां वयर्थेक इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्त ।

एतदग्रे—निरदेक्ष्यत इति, निरपेक्ष्येत इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु तदभावादयुक्तः ।

एतदग्रे—न चासौनिर्दिष्ट इति, न वासो निर्दिष्ट इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाटस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः ।

एतदग्रे—इत्येवमिदमुपक्रान्तमिति, इत्येवमिदमुपात्तमुपक्रान्तमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त, अर्थसंगतेः । द्वितीयपाठस्तु उपात्तपदवैयर्थ्यादयुक्तः ।

एतदग्रे—एक वचनं न यत्न इति, एक वचने न यत्न इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्त्वर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रत्याश्रयं समाप्तायामिति ।। ६२ ।

कारिकायाः प्रथमे पादे—समाप्तायामिति, समाप्तेयामिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, जातावित्यनेन सामानाधिकरण्यसंभवात् । तदसंभवात्तु द्वितीयपाठो न युक्तः । अस्या एव कारिकायाश्चतुर्थे पादे—तत्स्यादेवप्रकल्पनमिति तत्स्यादेतत्प्रकल्पनमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः । तथाहि—एतत्प्रकल्पनमित्यस्य एकस्य पशोः प्रकल्पनमित्यर्थः अत्रपाठे भवति । स तु क्लृप्त एवेति अर्थासंगतिः स्फुटैव । एतत्कारिकाव्याख्याने हेलाराजीये -जातेरिति, जाताविति, जाते इति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं साधु अर्थसंगतेः । तृतीयपाठस्तु अर्थासंगत्याऽसाधुः ।

एतदग्रे—प्रत्याश्रयपरिसमाप्तत्वमिति, प्रत्याश्रेयपरिसमाप्तत्वमिति, प्रत्याश्रयपरिसमाप्तमिति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठे शब्दाशुद्धिः । तृतीयपाठे वाक्यार्थे अन्वयानुपपत्तिः ।

एतदग्रे—पूर्वलिङ्गेनापि इति, पूर्वेलिङ्गेनापि इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः । अर्थसंगतेः । द्वितीये तु तदसंगतिः ।

एतदग्रे—पशुत्वजातेरवैकल्यात् क्रियाङ्गतोपत्तौ इति, पशुत्वजातेरेवैकः स्यात् क्रियाङ्गतोपपत्तौ इति, पशुत्वजातेरेकत्वेनचेत्देकव्यक्रियाङ्गतोपपत्तौ इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्त, अर्थसंगतेः । द्वितीयपाठस्तृतीयपाठश्च असाधू यथायथं शब्दाशुद्ध्यर्थासिंगतिभ्याम् ।

एतदग्रे—तदैक व्यक्त्युपयोगे इति, तदैकव्यक्त्युपयोगः इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे—जात्यंशस्य इति, जात्यङ्गस्येति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, सर्वपशुगताया जातेरेकस्मिन् पशौ अंशकल्पनासम्भवात् । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—जातेर्निष्ठितत्वादिति, जातेर्निश्चितत्वादिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—भवत्वेकत्रापि इति, भवत्येकत्रापि इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—वाक्यार्थसम्बन्धेपशुना प्रक्रम्य इतरस्यास्यात्कल्पनागौरवबियहात् समाप्तौ तु पशुना निष्ठितत्व—वाक्यार्थभूता इति, वाक्यार्थभूता इति पाठद्वयं दृश्यते । तत्राद्यपाठो जवगडदशादिवदनर्थक इति हेयः । द्वितीयपाठस्तु वाक्यार्थे समन्वया द्युक्तः ।

एतदग्रे—पशुनैकेनाप्यवदानद्वारेणेति, पशुनास्तदेकद्वयप्रदानद्वारेणेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—बुद्धिस्थमनेकसंख्योत्प्रेक्षणमिति, विधस्थमनेकसंख्योपलक्षणमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽर्था-संगत्या चायुक्तः ।

एतदग्रे—अनियतैकपरिग्रहे इति, अनिवर्तकपरिग्रहे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अशक्यानुष्ठानोऽर्थ इति, अशक्यानुष्ठानार्थ इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठे तु विधेयाविमर्शदोषः । तथा हि—समासे अर्थरूपे उद्देश्ये अशक्यानुष्ठानत्वमुपदिष्टत्वञ्चविधेयं न प्रतीयेतेति एवं विधेयाविमर्शदोषः ।

एकेनचेत्प्रसिद्धायामिति ।। ६३ ।

कारिकाया अवतरणिकायां हेलाराजीये—पश्वन्तरोपादानं भविष्यति इति, पश्वन्तरोपादानं सम्भविष्यति इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः । एकेन चेत्प्रसिद्धायामिति कारिकायाः पूर्वार्धे—प्रसिद्धायां क्रियायां यदि इति, प्रसिद्धाया क्रिमया यदि इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः शब्दशुद्धेरर्थ-संगतेश्च । द्वितीयपाठस्तुशब्दाशुद्धयाऽर्थासंगत्या चायुक्तः ।

अस्याः कारिकाया व्याख्याने हेलाराजीये—इहैकस्य इति, इहैकैकस्य इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु एकस्य एकपदस्य-वैयर्थ्यादयुक्तः ।

एतदग्रे—द्वितीयेपक्षे इति, द्वितीयपक्षो इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अन्वयानुपपत्त्याऽयुक्तः ।

एतदग्रे पक्षः । तत्र च लाघवाद् इति, पक्षः तत्रत्याद्यन्यतरत्वाद् इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—एकेनैव क्रियानिष्पत्तौ इति एकेन क्रियानिष्पत्ताविति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, आवश्यकस्यावधारणस्यलाभात् । तदलाभात्तु द्वितीय-पाठो न युक्तः । असतिबाधके सर्वं वाक्यं सावधारणं भवति इति न्यायेन तल्लाभे तु युक्त एव द्वितीपाठोऽपि ।

एतदग्रे—शास्त्रचोदना इति, शास्त्रीयश्चोदना इति पाठद्वयं दृश्यते । तत्राद्य-पाठो युक्तः साधुत्वात् । द्वितीयपाठस्तु असाधुत्वादयुक्तः ।

एतदग्रे—आनर्थक्यमिति फलभूयस्त्वस्य इति, आनर्थक्यमस्ति कलभूय-स्त्वस्य इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त, अर्थसंगतेः । द्वितीयपाठस्तु शब्दा-शुद्धयाऽर्थासंगत्याचायुक्तः ।

एतदग्रे—यजौनिष्पाद्यायां फलहेतुरिति, यजेतेति निष्पाद्यायांफलहेतुरिति, यजौफलहेतुरिति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, वाक्यस्य परिसमाप्त्या स्वार्थे निराकांक्षत्वात् । तदभावात्तु द्वितीयतृतीयपाठौ न युक्तौ ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अवदानगणस्येति, अवदान गुणस्येति, अवदानग्रहणस्येति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अवदानानां त्रित्वात्। हृदयस्याग्रे अवद्यति अथ ग्रीवायाः अथ वक्षस इति। द्वितीयपाठस्तु न युक्तः, अवदानस्य क्रियात्वात्। तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः। न हि अवदानस्य क्रियारूपस्य हस्ताभ्यां ग्रहणं सम्भवति।

एतदग्रे—पशोरालम्भे इति, पशोरारम्भेकृते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः।

एतदग्रे—अपरस्यालम्भ इति, परस्यालम्भ इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। तस्यालम्भ इति तृतीयपाठस्तु अर्थासंगतेरयुक्तः, पूर्वं यच्छब्देनानुपक्रमात्।

एतदग्रे—निष्प्रयोजन इति, निष्पयोजन इति पाठद्वयं दृश्यते। तत्र द्वितीयपाठः शब्दाशुद्धयाऽयुक्तः।

यथैवाहितगर्भायामिति ॥ ६४॥

कारिकाया अवतरणिकायां हेलाराजीये—नाद्रियते इति नाश्रीयते इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः। अस्याः कारिकायाः तृतीये पादे—तथैकेन इति, तथेकेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादसंगतः। अस्यामेव कारिकायाम्—अनर्थकमित्यस्य स्थाने अनर्था इति पाठो दृश्यते। स चायुक्तः। अनन्वयात्—छन्दोभङ्गाच्च। प्रसिद्धायामित्यस्य स्थाने प्रसिद्धा इति पाठोऽपि ताभ्यामेव हेतुभ्यामयुक्तः एतत्कारिकाव्याख्याने हेलाराजीये—आहित इति, अहित इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—बीजात्मनोपक्षिप्त इति, वीतात्मनोपक्षिप्त इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—गर्भो यस्यां तत्र पुनरिति, तत्र पुनर्गर्भो यस्यामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगते। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—गर्भाधानमफलमिति, गर्भाधानफलमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—आहितस्याधाने इति, स्वाहितस्याधाने इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे सुपदं स्वपदं वा व्यर्थम्।

एतदग्रे—एवमेक पशुसाध्ये इति, एकमेक पशुसाध्ये इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सिद्धस्य साधनवैफल्यादिति, सिद्धसाधनवैफल्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, प्रकृतार्थे समन्वयात्। द्वितीय पाठोऽपि युक्त एव सिद्धे साधनस्य वैफल्यादिस्यर्थात्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—गर्भाधानमनर्थकमिति, गर्भाधानर्थकमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतद्ग्रे—नाशक्यमिति, नशक्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, दार्ष्टान्तिकानुगुण्यादिति प्राक्तनेन हेतेना सह समन्वयसम्भवात्। एतदभावाद् द्वितीय पाठो न युक्तः।

एतदग्रे—आनर्थक्यस्य साध्यस्येति, अनर्थक्यस्यसाध्यस्येति पाठद्वयं दृश्यते तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीय पाठे तु शब्दाशुद्धिर्दोषः।

एतदग्रे—विवाक्षिताः शास्त्रचोदिता इति, विवक्षितंशास्त्रचोदिता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु विशेषण विशेष्ययोर्भिन्नलिङ्गत्वेन शब्दाशुद्धिर्दोषः।

एतदग्रे—आहितगर्भायामानर्थक्यमिति, गर्भाधानायामानर्थक्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—साम्यं सुष्ठु इति, सामान्यं सुष्ठु इति पाठद्वयं दृश्यते तदुभयमपि युक्तम्। समानशब्दस्य समशब्द समानार्थकत्वात्।

तावताऽर्थस्यसिद्धत्वादिति ॥ ६५।

कारिकायाः अवतरणिकायां हेलाराजिये—इत्येकीयं मतमिति, इत्येकीयमतमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। अस्याः कारिकाया द्वितीये पादे—एकत्वस्याव्यतिक्रममिति, एकस्याप्यनतिक्रममिति पाठद्वयं दृश्यते एकत्वस्याप्यतिक्रममिति तृतीयपाठोऽपि दृश्यते। तत्राद्यपाठो युक्तः। हेलाराजीये—एकत्वस्य अव्यतिक्रमः—अत्यागः इति व्याख्या दर्शनात्। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

अस्या एव कारिकायास्तृतीयेपादे—केचिदिच्छन्ति इति केचिष्ठन्ति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। अत्रैव पादे—नत्वत्र इति, नक्षत्र इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः। अस्या एव कारिकाया व्याख्याने हेलाराजीए—उपादाने निमित्तमिति, उपादानेऽमिनिमित्तमिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः।

एतदग्रे—इदानीं त्वेकत्वपूर्वकत्वादिति, इदानीमेकपूर्वकत्वादिति, इदानीं त्वेकपूर्वकल्पनादिति पाठत्रयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। इतरत् पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—अनेकत्वस्य क्रम व्यतिक्रमे इति, अनेकत्वस्य व्यतिक्रमे इति, पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः। द्वितीय पाठे हि क्रमपदाभावेऽपि तदर्थलाभोऽर्थापत्या। क्रमस्यैव हि विपरीतः क्रमोव्यतिक्रमो भवति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—एकसंख्याकस्यैवोपादानमिति, एकसंख्या एकस्यैवोपादानमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—तत्परिमाणेनैवक्रियासिद्धिरिति, तत्परिमाणेनैकेनैवक्रियासिद्धिरिति पाठद्वयं दृश्यते । अत्र यद्यपि अर्थसंगत्या उभयं साधु तथापि द्वितीयपाठे एकपदं गतार्थत्वादयुक्तम् ।

एतदग्रे—सामर्थ्यादिति, एकत्वस्योपादाने...सामर्थ्यादिति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—तदेवं लाघवे पूर्वोक्ते सामर्थ्येवेहोपात्ते इति, तदेवं पूर्वोक्तसामर्थ्ये-एवोपात्ते इति, तदेवं लघावैवेहोपात्ते इति पाठत्रयं दृश्यते । तत्राद्यपाठः साधुः, अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिर्दोषः । लाघवस्य पूर्वमुक्तत्वात्, सामर्थ्यस्य चेहोपात्तत्वात् तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतदग्रे—एकवाक्यतयैवोपपत्तेरिति. एकवाक्यतयोपपत्तेरिति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—व्याख्यातमिति, व्याख्यानमिति पाठद्वयं दृश्यते । तत्र द्वितीयपाठो युक्तः । कृतमित्यनेन समन्वयसंभवात् । प्रथमपाठस्तु तदभावादयुक्तः ।

एतदग्रे—पूर्वैर्दूषणरसिकतया कृतमिति, पूर्वदूषणरसिकतया कृतमिति, पूर्वैर्दूषणं कृतमिति, दूषणरसिकतया कृतमिति पाठचतुष्टयं दृश्यते । तत्र प्रथम द्वितीयचतुर्थपाठा अर्थसंगत्यायुक्ताः । तृतीयपाठो अर्थासंगत्याऽयुक्तः ।

एतदग्रे—सामर्थ्यादेकत्वस्याव्यतिक्रमे तु न इति, तु न - - - - सामर्थ्यादतिक्रमे इति, सामर्थ्यादेकत्वस्याप्यातिक्रमे तु न इति, सामर्थ्यादेकत्वस्याव्यतिक्रमेऽत्र न इति, पाठचतुष्टयं दृश्यते । तत्राद्यचतुर्थपाठौ युक्तौ, अर्थसंगतेः, । द्वितीयतृतीयौ तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तौ ।

एतदग्रे—नवचन प्रापित इति, नार्थप्रापित इति पाठद्वयं दृश्यते । तत्राद्य पाठो युक्तः, शब्दस्य शाब्देएवान्वयौचित्यात् । अतएवद्वितीयपाठोऽयुक्तः ।

एतदग्रे—संख्यायाः क्रियाङ्गभाव इति, संख्यायां क्रियांगभावइति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—अव्यतिक्रममात्रमिति, अतिक्रममात्रमिति पाठद्वयं दृश्यते तत्राद्य-पाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे— कारिकावयवाद् विभज्य इति, कारिकावयवलाघवाद्विभज्य इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । तथाहि नहि लाघवस्यनिरवयवस्य विभागः सम्भवति ।

द्वितीयादिषु यल्लिंगमिति ।। ६६ ।

कारिकायाः प्रथमेपादे-द्वितीयादिषु यल्लिङ्गमिति, द्वितीयादिषु लिङ्गमिति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, छन्दः सिद्धेश्च। द्वितीयपाठे तु तदुभयाभावः।

एतदग्रे—एकत्वविवक्षासिद्धयर्थं नैतल्लिङ्गमिति, एकत्वविवक्षासिद्धयर्था-न्नैतल्लिङ्गमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः। क्रियाया अनेकोपादानस्येति, क्रियायामनेकोपादानस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः,। द्वितीयपाठे तु सिद्धिकर्मणोऽनिर्देशात्-साकांक्षं वाक्यंस्यात्।

एतदग्रे—क्रमव्यतिक्रमे प्रयोजनाभावाच्चैकत्वेति, क्रमव्यतिक्रमादन्वयाभावे-चैकत्वेति पाठद्वयं दृश्यते। तत्राद्यंपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंग-त्याऽयुक्तः।

एतदग्रे—यदेतन्न्यायद्वयमुक्तम् इति, तन्मानद्वयमुक्तमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अत्रैव उक्तमिति, उक्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। तदनुवादपरमित्यनेनान्वयसंभवात्। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—तदनुवादपरमिति, तदनुवादिपरिमुक्तमिति पाठद्वयं दृश्यते। तत्रा-द्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्यादिलिङ्गमिति, इत्यादि लिंगे इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु गमयतीत्यस्य कर्तुरनिर्देश एव दोषः।

एतदग्रे—नापूर्वमिति, न पूर्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठे तु विरुद्धार्थाभिधानं दोषः।

एतदग्रे—यस्मात्तेन इति, व्यस्मात्तेन इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अनन्तरोक्तेन न्यायद्वयेनेति, अनन्तरोक्ते न्याय न इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च।

एतदग्रे—तेन वा कारणेन इति, तेन वाक्यारणेन इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिर्दोषः।

एतदग्रे—विवक्ष्यते इति, विद्यते इति, विवक्षिते इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—तदनङ्गत्वेऽपि समीहितसिद्धेरिति, तल्लिङ्गत्वेऽपिसमीहितसिद्धे-रिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

अन्वयव्यतिरेकाभ्यामिति ॥ ६७ ।

कारिकाया अवतरणिकायां हेलाराजीये—केचिदितिवचनात् परमतम्, एतद् दूषयति इति, तल्लिङ्गत्वेऽपि समीहितसिद्धेः केचिदिति वचनं परमतम्। एतद् दूषयति तेन इति, त्वेन विद्यते इति, तदङ्गत्वे च समीहितसिद्धेरिति पाठचतुष्टयं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समुपलभ्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। प्रकृते उपयोगाच्च। इतरत्पाठत्रयन्तु तदुभयाभावादसंगतम्। अस्या एव कारिकाया द्वितीये पादे—संख्याभ्युपगमे सति इति, संख्यामुपगम्य इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः। अस्याएव कारिकायाश्चतुर्थपादे—नत्वन्यार्थोपलक्षणमिति, नत्वर्थोऽन्यपलक्षणमिति पाठद्वयं दृश्यते तत्राद्यपाठोयुक्तः, अर्थसंगतेः। व्याख्यातश्च तथैव हेलाराजेन। द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः शब्दाशुद्धेश्च। एतत्कारिकाव्याख्याने हेलाराजीये—विभक्तिप्रत्ययमन्वेति इति, विभक्तिः प्रत्ययमन्वेति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। अत्रपाठे—विभक्ति रूपं प्रत्ययमिति कर्मधारयः। संख्या च अनुवर्तनक्रिया कर्त्री। द्वितीयपाठेत्वर्थासंगतिः स्पष्टैव। नहि विभक्तिः प्रत्ययमनुवर्तते इत्यस्यार्थस्यात्रोपयोगः संभवति, नवाऽत्रपाठे—तस्मिन् सति प्रतीयते तदभावे व्यतिरिच्यते व्यावर्तते न प्रतीयते संख्या इति ग्रन्थस्य प्रकृते समन्वयः सम्भवति इति।

एतदग्रे—पशुमालभेतेत्यादौ इति, यंमत्वेत्यादाविति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः! द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शब्दोपात्तायास्त्याग इति, शब्दोपपन्नायास्त्याग इति पाठद्वयं दृश्यते। तदुभयमपि साधु। अर्थसंगतेः। द्वितीयपाठे—उपपन्नाया इत्यस्य शक्त्या प्राप्ताया इति, लक्षणया तु उपात्ताया इत्येवार्थः।

एतदग्रे—यत्साधनत्वमिति, साधनत्वमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः। प्रथमपाठे उत्तरत्रतदित्यस्याध्याहारः यत्तदोर्नित्यसाकाङ्क्षत्वात्।

एतदग्रे—इत्यर्थ इति, इत्यस्यार्थ इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—वचनमिति इति, वचनादिति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न चैतन्न्याय्यमिति, न चैतत्प्राप्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। अग्रेन्याय्यत्वस्यैवोपपादनाच्च।

एतदग्रे—न ह्येकयोगक्षेमस्येति, नह्येकयोगक्षेमतयेतिपाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठेऽपि नार्थासंगतिरिति सोऽपि युक्तः।

एतदग्रे—शब्देनाचोदिते इति, शब्देन चोदिते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। शब्देन चोदिते तु शब्दादेव प्रतिपत्तिर्न सामर्थ्यादिति द्वितीयपाठोऽयुक्तः।

एतदग्रे—एकत्वस्येति, एकस्येति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तत्कर्माज्येन इति, तत्कर्मात्येन इति पाठद्वयं दृश्यते। तत्राद्य पाठोऽर्थसंगत्या युक्तः। द्वितीयपाठस्तु न युक्तोऽर्थासंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—न निर्वर्त्येत इति, न निवर्तेत इति पाठद्वयं दृश्यते । तत्राद्य पाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—मुख्याभावे हि प्रतिनिधिरूपादीयते इति, प्रतिनिधेरभावे हि मुख्यमुपादीयते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । अत्रैव—उपादीयते इति, उपाद्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त; अर्थसंगतेः । द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च ।

एतदग्रे—संख्यानुपादाने विद्यत एवेति, संख्यानुपादाने नियत एव इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, विवक्षितार्थसिद्धेः । द्वितीयपाठस्तु तदर्थासाधकत्वादयुक्तः ।

एतदग्रे—यस्यपुनरिति, अस्यपुनरिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, यदर्थस्याग्रे तत्पदेन परामर्शात् ।

एतदग्रे—अवदान लोपे इति, अवदानात्वोपे इति पाठद्वयं दृश्यते । तत्राद्य पाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—चोदितैकत्वत्यागप्रसंगादिति, चोदितैकत्यागप्रसङ्गादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, संख्याविवक्षाऽविवक्षयोरेवात्रविमर्शविषयत्वात् । संख्येयविवक्षाऽविवक्षेतु नात्र विमृश्येते, इति द्वितीयपाठो न युक्तः ।

एतदग्रे—यागश्चेति, छागश्चेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थ संगतेः । द्वितीयपाठस्तु पदान्तरसमन्वयासंभवादयुक्तः । अस्मिन्नेव वाक्ये—न संपद्यते इति, नोपपद्यते इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—तत्रैकेनैव इति, तत्रैकेनेति पाठद्वयं दृश्यते । तदुभयं साधु । असति बाधके अवधारणस्यैवकारं विनाऽपि लाभात् ।

एतदग्रे—यागस्यनिर्वर्तित्वादिति यागस्यनिर्वृत्तत्वादिति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—पश्वन्तरेऽचोदिते इति, पश्वन्तरे चोदिते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—न लभ्यते इति, नाप्यते इति पाठद्वयं दृश्यते । तदुभयं युक्तम् अर्थसंगतेः ।

एतदग्रे—इत्यवदानान्तरकार्यमिति, इत्येविवादेनातरकार्यमिति, इत्यवदानकार्यमिति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

साधनत्वे पदार्थस्य इति ॥ ६८ ।

कारिकायाः उत्तरार्धे—संख्याव्यापारधर्मोऽतस्तेन लिङ्गेन गम्यते इति, तेन लिङ्गेन गम्यते इति, गम्यतेइत्यस्य स्थाने सम्पद्यते इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । तृतीयपाठस्तु छन्दोभङ्गाद् दुष्टः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्या एव कारिकायाः प्रथमे पादे—साधनत्वे इति साधनत्वेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु छन्दो दोषादयुक्तः। अस्या एव कारिकाया द्वितीये पादे—प्रदीयते इति, प्रह्रियते इति पाठद्वयं दृश्यते। तत्राद्य पाठोऽयुक्तः, अर्थासंगतेः। द्वितीय पाठोऽपि शब्दाशुद्ध्याऽयुक्तः। एतत्कारिकाव्याख्याने हेलाराजीये—न प्रहीयते इति पाठो दृश्यते, सोऽर्थसंगत्यायुक्तः।

एतदग्रे—न दापितं भवति इति पाठो दृश्यते। तत्र न हापितं भवति इति पाठो युक्तः:, अर्थसंगतेः। तद्धापितं भवति इति पाठस्तु अर्थासंगत्यासर्वथाऽयुक्तः। अत्र सामर्थ्यं न हापितं भवति। अतश्च परिपूर्णस्य पदार्थस्य साधनत्वात् संख्याया एकत्वलक्षणायाः व्यापाराख्यो धर्मः तेन लिंगेन गम्यते इति। अत्रैव क्वचित्पुस्तके—एकत्व लक्षणाया इति व्यापाराख्यइत्यनयोर्मध्ये—क्रियाया इति पाठो दृश्यते। सत्वसंगतः तद्रहितस्तु युक्तः। अत्रैव सामर्थ्यं न हापितं भवति। अतश्च परिपूर्णस्य पदार्थस्य साधनत्वलक्षणेन लिङ्गेन हेतुना गम्यते सांख्याया इति पाठोऽपि दृश्यते। सोऽर्थासंगत्या शब्दाशुद्ध्याचायुक्तः। अत्रैव न साम……अतस्तद्भवति इति पाठोऽपि दृश्यते। सोऽप्ययुक्तः, अर्थासंगतेः, शब्दाशुद्धेश्च।

एतदग्रे—यतस्तदप्रहेयमिति, यतस्तदप्रमेयमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—यतोऽविनाभूत इति, यतोऽग्नाविनाभूत इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तोऽर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

एतदग्रे—धूम इति, धर्म इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अतः सभवत्यग्न्यधिगमहेतुः इति, अतः सभवयत्यग्न्यधिगमहेतुरिति, अतः संभवत्यग्न्यधिगमहेतुरिति, अतस्तद्भाविन्याअधिगमहेतुरिति, अतस्तमवत्यत्र्यधिगमहेतुरिति पाठपञ्चकं दृश्यते। अत्र प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः इतरत्पाठत्रयन्तु अर्थासंगत्या शब्दाशुद्ध्याचायुक्तम्।

एतदग्रे--द्वितीयादिना एतदिति पाठः साधुः। एतदग्रे सामर्थ्यादपरिग्रहमात्रस्य इति पाठः साधुः ततः यथातैरुक्तमिति पाठः साधुः।

एतदग्रे—लिङ्गं नास्ति इति, तल्लिङ्गं नास्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु तत्पदं व्यर्थम्। अत्रैव--संख्याव्यापारसूचकमिति, संख्याव्यापारःसुचकमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे– लिङ्गाभावे इति, लिङ्गभावे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठेत्वर्थासंगतिः। अत्रैव--ग्रहं संमार्ष्टि इत्यादौ इति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहमित्यादौ इति पाठद्वयं दृश्यते । तदुभयं युक्तम् । किन्तु प्रथमपाठे स्पष्टार्थता द्वितीयपाठे तु न सा इति विशेषः ।

एतदग्रे– साधनाभाव इति, साधनाभावेन इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—निर्वाहित इति, अतिवाहीत इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगतया च न युक्तः ।

एतदग्रे—अन्यत्राविहितस्यैव इति, अन्यथापीहतस्यैव इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—इत्यादौ निर्णीत इति, निर्वाहितो......इत्यादौ निर्णीत इति पाठद्वयं लभ्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्त ।

एतदग्रे—ननु च विवक्षां प्रतिजानताऽभ्युपेतः संख्याया साधनभावः । संख्या च द्रव्यविशेषणम्, शक्तिस्तु साधनमिति कथमतद्विशेषणं तथा स्यात्, नैषदोषः शक्तेर्निराधाराया अनुपपत्तेस्तदभेदापन्नं फलतो द्रव्यमेव साधनं न्याय्यम् । तथा च कटः कर्मदेवदत्तः कर्ता इति सामानाधिकरण्यं दृश्यते इति, ननु.... करण्यं दृश्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त, अर्थसंगतेः, द्वितीयपाठस्तु अपूर्णोऽनर्थकश्चेत्ययुक्तः ।

एतदग्रे– द्रव्यायमाणमिति, द्रव्यजातियमानमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगतया चासंगतः ।

एतदग्रे—तर्हि इति, मर्हि इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः ।

एतदग्रे– शक्त्यवच्छिन्नस्य द्रव्यस्यैव इति, शक्त्यवच्छिन्नस्यैव द्रव्यस्येति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु नार्थसंगतिः । अत्र पाठे हि--शक्तेर्व्यवच्छेद्यत्वं न प्रतीयते ।

एतदग्रे—तस्मादाश्रयस्य साधनत्वादिति, तस्मादाश्रयितव्यस्य साधनत्वादिति, तथा तदाश्रयस्य साधनत्वादिति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः स्फुटा ।

अपूर्वस्य विधेयत्वादिति ॥ ६१ ।

कारिकाया अवतरणिकायां—ग्रहाणामिति, ग्रहणामिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—संस्कार्यत्वादार्थेन इति, संस्कार्यत्वादर्थेन इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—प्राधान्ये सतीति, प्राधान्येन इति, प्रधान्येन इति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं साधु, अर्थसंगतेः, तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अथ पुनः प्रकारान्तरेणात्रेति, अथ पुनरप्येनकारेरेणात्रेति पाठद्वयं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । अस्या एव कारिकाया द्वितीये पादे--प्राधान्यमवसीयते इति, प्राधान्येन वसीयते इति, प्राधान्यमवध्रीयते इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे शब्दाशुद्धिः । तृतीयपाठे अर्थासंगतिः । एतत्कारिकाव्याख्याने हेलाराजीये-- पुनर्वचनं व्य प्त्यर्थमिति, पुनर्वचनमप्राप्त्यर्थमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—प्राधान्यम् अप्रज्ञातज्ञापनेन इति, संभावनमत्र प्रज्ञायते ज्ञाते ज्ञापनेन इति पाठद्वयं दृश्यते । प्राधान्य मज्ञानज्ञापनेनेति तृतीयपाठोऽपि दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ ।

एतदग्रे—अन्यार्थत्वेन इति, अन्यार्थत्वे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--अनुवादादप्राधान्यमिति तत्र विधिवाक्यगतरूपानुसरणमिति, प्रतीयमाने प्राधान्यविधिगतवाक्यार्थत्वे इति, विधिवयगतानुसरणमिति पाठत्रयं दृश्मते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयतृतीयपाठौ तु शब्दाशुद्धयाऽर्थासंगत्या वायुक्तौ ।

संभ्र।र्गस्यविधेयत्वादिति ।। ७० ।

कारिकाया अवतरणिकायां हेलाराजीये— प्राकरणिकेऽर्थे इति, प्राकरणीकर्थे इति पाठद्वयं दृश्यते । तत्राद्यपांठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः । एतत्कारिकाव्याख्याने हेलाराजीये— विधेयत्वात्प्राधान्यमिति, विधेयत्वात्प्राधान्यादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीय-पाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—प्राजापत्या इति, प्रजायप्ता इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, शब्दशुद्धे रर्थसंगतेश्च । द्वितीयपाठस्तु तदुभयाभावादसंगतः ।

एतदग्रे--तत्र च इति, च तत्र इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, निर्दोषत्वाद् अर्थसंगतेश्च । द्वितीयपाठस्तु चकारस्यभिन्नक्रमत्वादयुक्तः ।

एतदग्रे—या श्रुता नवेति, या नवेति पाठद्वयं दृश्यते । तदुभयं युक्तम् । अर्थ-संगतेः ।

एतदग्रे—संख्यापदोपादाना इति, संख्यापदोपादानादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—संख्या सा इति, सा संख्या इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे--पूर्वोद्दिष्ट ग्रहेति, पूर्वाक्षिप्तग्रहेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्त, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—न बाध्यते न त्यज्यते अस्याविधौप्राधान्यादिति, न वाध्यते······

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राधान्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः

एतदग्रे—इहत्वनुवादवाक्ये ग्रहणमात्रोपलक्षणपरायां चोदनायां नान्तरीयिका द्रव्योपलक्षणार्था शब्दसंस्कारमात्रपरासंख्या ग्रहश्रुतिस्त्वनर्थिका इति, इहत्वनु......ग्रहश्रुतिस्त्वनर्थिका इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--यथाविहितभिन्नसंख्याकग्रहोपादानार्थमिति, यथा विभिन्नसंख्याकग्रहोपादानार्थमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। यथाविहितभिन्नसंख्याकग्रहोपादानामिति तृतीय पाठोऽपि क्वचिद् दृश्यते। सत्वयुक्तः, अर्थासंगतेः।

एतदग्रे—गुणेनप्रधानोपरोध इति, गुणोपुरोध इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याशब्दाशुद्धयाचायुक्तः।

एतदग्रे—गुणा हि इति, गुणा हा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रधानोपकाराय इति, प्रधानोपकारार्थमिति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—इत्युत्पत्तिवाक्यं क्रियाविषयमिति, इत्युत्पत्तिवाक्यं ग्रहणक्रियाविषयमिति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः. अनुवादवाक्यस्यापि क्रियाविषयत्वेन ततो भेदाभावात्। द्वितीयपाठस्तु वाक्यद्वये क्रियाभेद इति युक्त।

एतदग्रे—बहवोग्रहा गृह्यन्ताम्, एकस्तुसंमार्ज्यतामिति, बहवोग्रहा गृह्यन्ताम्, एकस्तु अनुमार्ज्यतामिति, बहवोग्रहा गृह्यन्तामितिस्तु संमार्ज्यतामिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, अनुमार्जनस्याविधानात्। तृतीयपाठोऽपि न युक्तः, शब्दाशुद्धेरर्थासंगतेश्च।

एतदग्रे—इति नास्ति बाध इति, इति नास्ति विरोध इति, इत्यविरोध इति पाठत्रयं दृश्यते। तदेतत् त्रयमपि साधु, अर्थसंगतेः।

एतदग्रे--बहिर्व्यापारभेदाभिन्नविषयत्वादिति पाठ उपलभ्यते। स तु न युक्तः, अर्थासंगतेः। किन्तु--बहिर्व्यापारभेदाद् भिन्नविषयत्वादिति पाठोऽर्थसंगत्यायुक्तः।

एतदग्रे—पूर्वं नव दश वा इति, पूर्वं वा नव दश इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अदोषात्। द्वितीयपाठस्तु वाकारस्य अस्थाने स्थितत्वादयुक्तः।

एतदग्रे—बुद्धौ समवस्थिता इति, बुधाव्यापारोऽवस्थित इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—एवञ्चान्यथाऽवगते प्रधाने इति, एवं च मते प्राधान्ये इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अनूदित इति, अनुदित इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—स्वरूपमनुवर्तव्यमिति, रूपमनुवर्त्यमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—संसार्गस्यापि इति, संसर्गस्यापि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—बहुमध्येऽवस्थितश्चानुभूत इति, बहुमध्येवाव्यवस्थितस्यनुभूत इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्मृत्या अनुवाद इति, मित्या अनुवाद इति पाठद्वयं दृश्यते। तत्राद्यपाठे शब्दशुद्धिरर्थसंगतिश्चेति युक्तः सः। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—संमार्ग वाक्य एवेति, संमार्गस्य वाक्ये एवेति पाठद्वयं दृश्यते। तदुभयं युक्तमर्थसंगतेः।

एतदग्रे—अभिहितमित्येतावता विशेष इति, अभिहितं ग्रहाणामेतावताविशेष इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु यदि परिवर्त्यते—ग्रहाणामित्येतावता विशेष इति रूपेण तदा शोभनः।

प्राधान्यमभिहितमित्येतावता विशेष ॥ ७० ॥

एतदग्रे—पशुना यजेत इत्यत्रापि तर्हि यागस्य विधेयत्वात् पशोरप्राधान्यमिति, मभिहि .... पशोरप्राधान्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

विधिवाक्यान्तरे संख्या इति ॥ ७१ ॥

इति कारिकाया अवतरणिकायां हेलाराजीये—तदीयमेकत्वमिति, तदेयमेकत्वमिति, पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। शब्दशुद्धेश्च। द्वितीयं पाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चाऽयुक्तः। एतत्कारिकाव्याख्याने हेलाराजीये—न त्यज्यते इत्युत्सर्ग इति, न त्यज्यते इत्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु—तद्विरोधिनी संख्या त्यज्यते इत्यग्रिमग्रन्थविरोधादयुक्तः।

एतदग्रे—तद्यथा पशौ इति, यथा पशो इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु तन्मात्रो दोषः।

एतदग्रे—ग्रहे नुद्यति इति, ग्रहेऽनुद्यति इति, ग्रहनुत्प्रति इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरपाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—नुद्यतिवाक्यापेक्षया इति, नुद्यतिवाक्यापेक्षायामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठोऽपि युक्तः, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri Gyaan Trust. Funding IKS-MoE-Grant-2

एतदग्रे—संमार्गं विधिवाक्ये इति, संमार्गस्य विधिवाक्ये इति पाठद्वयमुपलभ्यमानं युक्तम्, अर्थसंगतेः।

एतदग्रे—प्राथमकल्पिकी इति, प्रथमकल्पिकी इति पाठद्वयं दृश्यते। तत्राद्येऽञ्, द्वितीये तु ठन्। अतः प्रथमपाठः शब्दशुद्धया युक्तः। द्वितीयेपाठे तु प्रथमकल्पिका इति रूपंयुक्तम्।

एतदग्रे—लिंगलक्षणेन इति, लिङ्ग लक्षणे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासिंगतिः, सहशब्दान्वयविरोधश्च।

एतदग्रे—यथा पशुना यजेत इति, यथा पशुना इति पाठद्वयं दृश्यते। तत्राद्यो वाक्यप्रयोग रूपः पाठो युक्तः, निराकाङ्क्षत्वात्। द्वितीयपाठस्तु पदप्रयोगरूपत्वादयुक्तः, साकाङ्क्षत्वात्। संभाव्यते हि तत्र शुक्लादिगुणपद प्रयोगः।

एतदग्रे—तत्राक्षिप्तगुणसामान्ये इति, तत्राक्षिप्ते गुणसामान्ये इति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—यथागामभ्याजशुक्लामिति, यथा गार्हपत्या शुक्लामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासिंगत्याचायुक्तः।

एतदग्रे—सगृह्यते इति, संगृह्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एतदग्रे—एकवाक्योपात्तगुणयुक्त इति, एकवाक्यगुणपात इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः।

एतदग्रे—अत्र तु पौनरुक्त्यं दोषः इति, अत्र न पौनरुक्त्यं दोष इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अग्रिमग्रन्थेन सहसंगतेः। द्वितीयपाठे तु तदसंगतिः।

एतदग्रे—जातिः पशुत्वलक्षणा इति, जातिः पशुत्वलक्षणतया इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः। द्वितीयपाठस्तुतदसंगत्याऽयुक्तः।

एतदग्रे- कारणाभावादिति, कारकाभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। नहि कारणे कारकशब्द प्रयोगो युक्तः, अर्थभेदात्।

एतदग्रे—पशुत्वलक्षणा इति, पशुत्वलक्षणमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः; जातिविशेषणत्वेन तल्लिङ्गत्वात्। द्वितीयपाठस्तु अतल्लिङ्गत्वादयुक्तः।

एतदग्रे—कारणाभावादिति, करणाभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु तदसंगतिः।

एतदग्रे—तदेकत्वमपि इति, तदेदेकत्वमपि, तद्वदेकत्वमपि इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। अन्यत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासिंगत्याचायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—न्यायवादिमतानुसारेण इति, न्यायवादिमतेनानुसारेण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु अर्थासंगतिः। विशेष्यविशेषणयोः सामानाधिकरण्यस्य श्रुतस्य विप्लवात्।

एतदग्रे—सिद्धान्तोऽत्रावस्थापित इति, सिद्धान्तोऽत्र व्यवस्थापित इति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—पूर्वपक्षोऽत्रकृत इति, कृतपूर्वपक्षोऽत्र इति, पूर्वपक्षेऽत्रकृत इति, पूर्ववक्रत्वकृत इति पाठचटुष्टयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु—कृतः इति विसर्गान्तपाठे साधुः। तृतीयपाठस्तु अर्थासंगत्याऽसाधुः। चतुर्थपाठोऽपि अर्थासंगत्याऽसाधुः।

एतदग्रे—य एवामिति, यः एवमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—दशापवित्रेण इति, देशावयविपक्त्रिेण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभायाभवादसंगतः।

एतदग्रे—एकत्वश्रुतिसंयुक्तो इति, तिष्ठंयुक्तो इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—लक्षणत्वादविशिष्टम् इति, लक्षणत्वाविशिष्टमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अविशिष्टं हि लक्षणम् इति, अविशिष्टं लक्षणनिमित्तमिति, अविशिष्टं च लक्षणमिति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः, मध्यमपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—ते अतोग्रह इति, नह्यन्तरेण इति, प्राधान्येन संमार्गो विधीयते इति पाठा उपलभ्यन्ते। एते सर्वेऽपि अनुपादेयाः, वाक्येऽनन्वयात्।

एतदग्रे—चोदिते तु इति, चोदितेति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

निर्ज्ञातद्रव्यसंबन्धे ॥ ७२ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—संख्यावदन्यस्यापि गुणस्य इति, संख्यावदङ्गष्वपि वा गुणस्य इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अस्याः कारिकाया अवतरणिकायामेव—इत्युपोद्घाते सत्याह इति, इत्युपोद्घाते स इत्याहेति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽनुपादेयः।

अस्या एव कारिकाया द्वितीये पादे—यः कर्मण्युपदिश्यते इति, य कर्माण्युपदिश्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः, व्याख्यातश्चैष एव पाठो हेलाराजेन। द्वितीयपाठस्तु वाक्ये अनन्वयादयुक्तः। अस्या एव कारिकायाश्चतुर्थे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पादे—द्रव्येणेव इति, द्रव्येणैव इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः, व्याख्यातञ्चैतद्धेलाराजेन— द्रव्यवदिति ।

एतत्कारिकाया व्याख्याने हेलाराजीये—प्रथमं द्रव्यसम्बन्ध इति, प्रथमसंबन्ध इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः, हेलाराजेन तस्यैव व्याख्यानाच्च । द्वितीयपाटस्तु तदुभयाभावादयुक्तः ।

एतदग्रे—तेनापितस्यकर्मण इति, तेनापिकृतस्यकर्मण इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—विचारवीजोपक्षेप इति, विचार वीजो ··· ··· ···इति च इति पाठद्वयं दृश्यते तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—द्रव्यपदार्थपक्षे इति, द्रव्यपदार्थसंवन्धपक्षे इति, द्रव्यपदार्थस्यपक्षे इति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । तृतीयपाठोऽपियुक्तः, अर्थसंगतेः । तृतीयपाठेहि—द्रव्यं पदार्थो यस्य तस्य वादिनः पक्षे इत्यर्थः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—गुणेतुकापेक्षा इति, गुणेत्रुकाः आपेक्षा इति, गुणेतुकामापेक्षा इति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठे तु शव्दाशुद्धिरर्थासंगतिश्च तृतीयपाठेऽपि अर्थासंगतिः ।

एतदग्रे—निर्गुणस्यासंभवाज्जन्या इति, निर्गुणस्यासंभवाज्जात्या इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—क्रियेत्युभयापेक्षा इति, क्रियेत्रुभवापेक्षया इति, पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तुशव्दाशुद्धयाऽर्थासंगत्याचायुक्त : ।

एतदग्रे—तर्हिक्रमोऽयंकुत इति, तर्हिकुत इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तुअर्थासंगत्या वाक्यापरिसमाप्त्याऽयुक्तः ।

एतदग्रे—निर्ज्ञातद्रव्यसंवन्धे इति, नितान्तद्रव्यसंवन्धे इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे—अपेक्षाऽसाम्याच्चेति, आपेक्षासाम्यच्चेति पाठद्वयं दृश्यये । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तुअर्थाऽसंगत्याऽयुक्तः ।

एतदग्रे—साध्यस्वभावत्वादिति, साध्यस्वभावा इति पाठद्वयं दृश्यते । तदुभयमपि साधु, अर्थसंगतेः ।

एतदग्रे—साधनावच्छेदोपयोगादविद्यत एव क्रियायाः । तत्र इति, साधनावच्छेदोपयोगात्त्रियत तत्र इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठस्तु शव्दाशुद्धयाऽर्थासंगत्याचायुक्तः ।

एतदग्रे—साक्षादसमन्वयादुपमा इति, साक्षादश्रवणादुपमा इति पाठद्वयं दृश्यते तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे -एतच्चार्थक्रमापेक्षयोच्यते इति, यतत्रार्थक्रमाश्रयेणोच्यते इति, एतच्चार्थक्रमाश्रयेणापेक्षयोच्यते इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च। तृतीयपाठे तु आश्रयापेक्षाशब्दयोरन्यतर दधिक्रम्।

एतदग्रे—तत्रकश्चिदिति, कश्चित्तत्र इति पाठद्वयं दृश्यते तदुभयमपि साधु अर्थसंगतेः।

कश्चिदेवगुणो द्रव्ये इति ॥ ७३।

कारिकाया अवतरणिकायां हेलाराजीये—गुणद्रव्ययोरिति, द्रव्यगुणयोरिति पाठद्वयं दृश्यते तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—क्रियासम्बन्ध इति क्रियया सम्बन्ध इति पाठद्वयं दृश्यते तदुभयं साधु अर्थसंगतेः।

अस्या एव करिकाया द्वितीये पादे—यथासामर्थ्यलक्षण इति, तथा सामर्थ्यलक्षण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु चतुर्थपादे एवं प्राप्त इत्यनेन विरोधादयुक्तः।

अस्या एव कारिकाश्चतुर्थेपादे—प्राप्तः सामर्थ्यलक्षण इति, प्राप्तः सामान्यलक्षण इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽपि युक्तः हेलाराजीये सामान्यमात्रेप्रतीत्य व्यभिचारादिति व्याख्यानेन तस्याऽपि संमतत्वात्।

एतत्कारिकाव्याख्याने हेलाराजीए—तेन लक्ष्यते इति, तेन लक्षणेन इति, लक्षणेन तेन इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। इतरत् पाठद्वयन्तु वाक्यानन्वयादयुक्तम्।

एतदग्रे—तत्र द्रव्ये इति पाठो दृश्यते स न युक्तः अर्थासंगतेः। तत्र द्रव्यमिति पाठोयुक्तः लक्ष्यते इति पूर्वेणान्वयात्।

एतदग्रे—सामर्थ्येननिराधारगुणासंभवस्वभावेन इति, सामर्थ्यं निराधारगुणासंभवस्वभावेन इति, सामर्थ्येननिराधारगुणभावेन इति पाठत्रयम् उपलभ्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

अत्रैव—लक्ष्यते इति, संलक्ष्यते इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—प्रतीतिलब्ध इत्यर्थ इति, प्रतीतिलब्धमित्यर्थ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः कारिकायां प्राप्त इति पुंसः श्रवणात्।

एतदग्रे—विशेषाणां व्यभिचारादिति, विशेषणाव्यभिचारादिति, विशेषिणा व्यभिचारादिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तयोस्तुपृथगर्थित्वे इति ।। ७४ ।

कारिकायाः पूर्वार्धे— पृथगर्थित्वे संबन्ध इति, पृथगर्थत्वसंबन्ध इति, पृथगर्थित्व संबन्ध इति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः, गुणद्रव्ययोराकाङ्क्षायांसत्यामेकवाक्योपात्तयोरेवसमन्वयो यः प्रतीयते इति हेलाराजीए तद्व्याख्यानदर्शनात् । एतद्विरोधादेव द्वितीयतृतीयपाठौ न युक्तौ ।

अस्या एव कारिकाया उत्तरार्धे—न तस्मिन्नुपघातोऽस्ति इति, न तस्मिन्नुपघातो नीलइति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः द्वितीयपाठस्तुशब्दाशुद्धयाऽर्थासंगत्या चायुक्तः । अत्रैव—कल्प्यमन्यन्नचाश्रुत मिति, कल्प्यमन्यत्रचाश्रुतमिति, कल्प्यमन्मन्न चाश्रुतमिति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयतृतीयपाठौ तु अर्थासंगत्याशब्दाशुद्ध्याचायुक्तौ ।

एतत्कारिकाव्याख्याने हेलाराजीये—एकवाक्योपात्तयोरेव इति, एकवाक्यात्तयोः श्रुतयोरेव इति, पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासिंगत्याऽयुक्तः ।

एतदग्रे—समन्वयो यः प्रतीयते इति, सामर्थ्येन ...... प्रतीयते इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु स्वरूपदर्शनेनैव पराकृतो भवति ।

एतदग्रे—न तत्र बाध इति, न तु तत्र भाग इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे—न न्याय्या इति, न न्यायाश्रया इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—प्रतीतिप्रमाणतामाह इति, प्रतीतिः प्रमाणतामाह इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अपोद्धारबुद्ध्याश्रयणे इति, आथोद्धारबुद्धयाश्रयणे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तुशब्दाशुद्धयाऽर्थासंगत्याचायुक्तः ।

एतदग्रे—निरंशेहि इति, निरंशेऽपि हि इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठे अपिशब्दो व्यर्थः ।

एतदग्रे—अंशांशिकतया इति, अंशांशिकया इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, तदर्थस्यहेतुत्वोपपत्तेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—पूर्वमेव इति पाठः, अपोद्धारपदार्थइत्यतः प्रागुपलभ्यते । स तुस्पष्टप्रतिपत्यर्थं इति युक्तः ।

एतदग्रे—स एव विशेषोभवति इति, विशेषोभवति इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः । अर्थसंगतेः । द्वितीयपाठस्तु उद्देश्यानिर्देशादयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तद्विशेषनिष्ठ एवावतिष्ठतेइति, तद्विशेषइति। अतएवावतेष्ठते इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तुशब्दाशुद्ध्या-र्थासिंगत्या चायुक्तः।

एतदग्रे—सामान्येऽवस्थितानामिति, सामान्येन स्थितानामिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—पदानां विशेषे इति, यदा विशेषे इति, अवस्थितानां विशेषे इति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः। द्वितीयपाठे तु यदाशब्दपाठो वहेगड्डुवदनर्थकः स्थितः।

अत्रैव—विशेषेऽवस्थानामिति, विशंवेऽवस्थानामिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—सामान्यवृत्तीनामुच्चरितानामिति, सामान्यवृत्तीनामुपचरिताना मिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, तथाभूतानामेव तिरोभावादित्यग्रे पाठात्। द्वितीयपाठस्तु पूर्वपरार्थासंगत्याऽयुक्तः। नहि-तथाभूतानामेव तिरोभावादिति ग्रन्थो द्वितीयपाठे संगच्छते।

एतदग्रे—विशेषेऽवतिष्ठतामिति, विशेषे च तिष्ठतामिति, विशेषावतिष्ठते इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयतृतीयपाठौ तु शब्दा-शुद्ध्याऽयुक्तौ।

एतदग्रे—सर्वस्यां नियमेन इति, सर्वस्मान्निमः इति पाठद्वयं दृश्यते। तत्राद्य-पाठोयुक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च।

एतदग्रे—स च नित्ये इति, से य नित्ये इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—तिरोभूतश्च निवृत्तोऽनवधार्यमाणात्मा शब्दोऽन्यस्याऽपि पदस्य सामा-न्यनिष्ठत्वात् केनचिदप्यप्रतिपादिते विशेषे निर्विषयः इति, तिरोभूतश्च··· निर्विषयः इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अपूर्णत्वात् पदान्तरसाकाङ्क्ष इत्ययुक्तः।

एतदग्रे—क्वावतिष्ठतामिति, क्वदुतिष्ठतामिति पाठद्वयं दृश्यते। तत्राद्य-पाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

एतदग्रे—वाक्यादवगन्तव्य इति, वाक्यादनवगन्तव्य इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः, वाक्यादर्थविशेष-स्यावगतेः।

एतदग्रे—आपोद्धारपदार्थाश्रयेण इति, अपोद्धारपदार्थाश्रयेण इति, आपो-दार्याश्रयोह्ययमिति पाठत्रयं दृश्यते। तत्रमध्यमः पाठो युक्तः शब्दशुद्धेरर्थसंगतेश्च। प्रथम तृतीयावयुक्तौ, शब्दाशुद्धेरर्थासंगतेश्च।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तथा च इति, च तथा इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः शब्द-स्वारस्यात् । द्वितीयपाठस्तु तदभावादयुक्तः

एतदग्रे—इत्यभिन्न इति, इत्यभिन्नमिति पाठद्वयं दृश्यते । तत्राद्यपाठो-युक्तः अर्थसंगतेः । द्वितीयपाठे तु वाक्यभेदोदोषः ।

एतदग्रे—श्रुतिप्रतिपादितस्य योगस्य इति, श्रुतिप्रतिपादितस्य श्रौतार्थस्येति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तःअर्थसंगतेः । द्वितीय पाठे तु श्रौतार्थस्येति व्यर्थम् ।

एतदग्रे—एकवाक्यताऽपीष्यते इति, एकवाक्यतोऽपीष्यते इति, एकवा-क्यताऽपोह्यते इति पाठत्रयं दृश्यते । तात्राद्यपाठोयुक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

क्रिययायोऽभिसंबन्ध इति ।। ७५ ।

कारिकायां द्वितीयपादे—सश्रुतिप्रतिपादितयोरिति, सश्रुतिप्रतिपादितः इति, सश्रुतिप्रतिपादितयोरिति पाठत्रयं दृश्यते । तत्राद्यपाठत्रयमपि युक्तम् । अर्थसंगतेः । सश्रुतिप्रतिपादित इति [illegible] तृतीयपादे श्रुत्याप्राप्ति-रिति तृतीया समासः ।

अस्याः एव कारिकायाश्चतुर्थपादे—नियमःस्वप्रतिष्ठो इति, नियमोऽस्वप्र-तिष्ठो इति, नियमःस्वप्रतिष्ठो इति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः । शब्द-शुद्धेरर्थसंगतेश्च । इतरत्पाठद्वयन्तुशब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम् ।

एतत्कारिकाव्याख्याने हेलाराजीये—कारकविभक्त्या क्रियायामितिपाठो दृश्यते तत्र कारकविभक्त्या इति तृतीयान्तं श्रुतेर्विशेषणम् ।

एतदग्रे—समशीर्षकतया इति, समशीर्षकया इति, समशीर्षिकाया इति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । अत्र हि समशब्दार्थस्य शीर्षकतापदार्थेऽ-भेदेनान्वयः । शीर्षकशब्दस्यमूर्धवाचिनोः प्रधानेलक्षणा । प्राधान्यमुभयोः साधारणो धर्मः । समप्राधान्येनेत्यर्थः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—अपोद्धारेण इति, अपोद्धारे इति, अपोद्धारादिति, पाठत्रयं दृश्यते । तत्त्रितयमपिसाधु, अर्थसंगतेः ।

एतदग्रे—पदार्थविभजनादिति, पदार्थप्रविभजनादिति, प्रतिपदार्थविभजना-दिति, पदार्थप्रतिभजनादिति, पदार्थप्रतिविभजनादिति पाठपञ्चकं दृश्यते । तत्र—चतुर्थपाठोऽर्थासंगत्याऽयुक्तः । इतरत्पाठचतुष्कं तु अर्थसंगत्या युक्तम् ।

एतदग्रे—गुणकानेकेति इति, गुणकानेके इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

एतदग्रे—तं क्रियालक्षणं प्रधानमुद्दिश्य द्रव्यगुणौ शेषभूतौ विधीयेते इति तयोः परस्पराकाङ्क्षाभावादेकवाक्यतायां [illegible] करणत्वाद्यथाऽनुपपत्त्याऽसत्यपि-[illegible] [illegible] [illegible] विशेषणविशेष्यभावसंबन्धाभाव इति सूत्रार्थोऽस्मन्नयानुगुणः एवमवस्थिते सति इदमत्रापततीत्याह—इतिपाठः क्वचिदुपलभ्यते ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्वचित्तु एकं हि कर्म वाक्यार्थभूतं क्रियालक्षणं प्रधानमुद्दिश्य द्रव्यगुणौ-शेषभूतौ विधीयेते इति तयोः परस्पराकाङ्क्षात्वादेकवाक्यतायां सामानाधिकरण्या-न्यथानुपपत्त्या असत्यपि संबन्धवाचकषष्ठीलक्षणविभक्तिश्रवणे विशेषणविशेष्य-भावसंबन्धावसाय इति सूत्रार्थोऽस्मन्नयानुगुणः।

एवमवस्थिते सत्तीदमत्रापतत्तीत्याह इति पाठो दृश्यते। तत्र प्रथमपाठे—अर्थासंगतिः शब्दाशुद्धिश्च स्फुटा। तथाहि--अत्रपाठे प्रथमवाक्येऽर्थासंगतिः, पूर्वं यच्छब्दानुल्लेखात्विशेषणविशेष्यभावसंबघ्नासाप इत्यत्र च शब्दाशुद्धिः।

इतःपूर्वम् विनियोगोवाक्यस्य इत्यतोऽनन्तरम्—प्रामाण्येनावतिष्ठते इति नियमेनाऽवतिष्ठते इति पाठद्वयं दृश्यते तदुभयं साधु अर्थसंगतेः।

एतदग्रे—अश्रुतगुणद्रव्यपरिकल्पने हि इति, अश्रुतगुणद्रव्यकल्पने हि इति, अश्रुतगुणद्रव्यकल्पनेऽपि इति, पाठत्रयं दृश्यते। तदेतत् त्रितयं साधु अर्थसंगतेः।

एतदग्रे—एकरसयैव प्रवृत्त्या इति, एकरसतयैव प्रवृत्त्या इति पाठद्वयं दृश्यते, तदुभयं साधु अर्थसंगतेः।

एतदग्रे—पोषितं भवति इति, बोधितं भवति इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—द्रव्यगुणयोरिति, गुणद्रव्ययोरिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—आधारान्तराच्च व्यवच्छेद इति, आधाराद्द्रव्यच्छेद इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—न चान्यनिवृत्तेरिति न चात्रान्यनिवृत्तेरिति पाठद्वयं दृश्यते। तदुभयमपि साधु अर्थसंगतेः।

एतदग्रे—एकवाक्याख्यशब्दोपादानाऽसाविति, एकवाक्याख्यक शब्दोपादाना-साविति, एकवाक्याख्याशब्दोपादानाऽसाविति पाठत्रयं दृश्यते। अत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे—असौ न श्रौती इति, असौ श्रौती इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। तथाहि—अन्यनिवृत्तिर्वाक्यीयेति न श्रौती, अत्र वाचकपदाभावो हेतुः। अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—वाक्यीया इति, वाचीया इति, वाक्याया इति पाठत्रयं दृश्यते। तत्राद्यपाठः साधुः शब्दशुद्धेः। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽयुक्तम्।

एतदग्रे--तदुक्तमिति, तदुक्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थ-संगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—द्रव्यगुणयोरैककर्म्यादिति, द्रव्यगुणयोरैकर्मादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे--यत्रार्थैकत्वमिति, यत्रपदार्थैकत्वमिति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतदग्रे—वाक्यार्थभूतमिति, वार्थभूतमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—प्रधानमुद्दिश्येति, प्राधानमुद्दिश्येति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः

एतदग्रे—एकवाक्यतायामिति, एकवाक्यतया इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः मतस न्तम्यामर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—संबन्धावसाय इति, समन्वयावसाय इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

तत्रद्रव्यगुणाभावे इति ॥ ७६ ।

कारिकाया अवतरणिकायां हेलाराजीये—सतीमत्रापतति इति, सति इदमत्रापतीति इति, इदमापतति इति पाठत्रयं दृश्यते । तत् त्रितयं साधु अर्थसंगतेः ।

अस्याः कारिकायाश्चतुर्थपादे—वाक्यलक्षणात् इति, चाकलक्षणादितिपाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः ।

एतत्कारिकाव्याख्याने हेलाराजीये—तिङ्विभक्तिश्चेति, तद्विभक्तिश्चेति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—श्रौतसंबन्धावेदिकेति, श्रौतसंबन्धोवेदिकाः इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः । पूर्वत्रप्रथमैकवचनश्रवणात् । अतएव द्वितीयपाठो न युक्तः ।

एतदग्रे—प्रतीतेः । वाक्यस्य तु इति, प्रतीतिर्वाक्यस्य तु इति, प्रतीतेः । यस्य तु इति, प्रतीतेः । वाक्यस्य तु इति पाठचतुष्टयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । इतरत्पाठत्रयन्तु यथायथं अर्थासंगत्याशब्दाशुद्धयाचायुक्तम् ।

अत्रैव—वाक्यस्यतुसंबन्धस्येति, यस्यतत्संबन्धस्येति, यस्यास्यसंबन्धस्येति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तुअर्थासंगत्याऽयुक्तम् ।

एतदग्रे--उभयस्मैकवाक्योपादानादिति पाठ :उपलभ्यते । सचायुक्तः शब्दाशुद्धेः । उभयस्यैकवाक्योपादानादिति पाठस्तु अर्थसंगत्या युक्तः ।

एतदग्रे—व्यवस्थाप्यते इति, व्यवस्थापित इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—पदान्तरापेक्षत्वाच्चपदान्तस्स्येति, पदान्तरापेक्षत्वाच्चावान्तस्येति, यज्ञन्तेरापेक्षत्वाच्चेति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याशब्दाशुद्धयाचायुक्तम् । अत्रैव-वाक्यीयसंबन्ध इति, वाक्यीयः संबन्ध इति पाठद्वयं दृश्यते । तदुभयंसाधु, अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदा तु जातिः शक्तिर्वा ।। ७७ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—श्वेतं छागमालभेतेति वाक्ये श्वेताभावे इति, श्वेतं छागमालभेतेति श्वेताभावे इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतदग्रे—सिध्यतीष्टव्यवस्थेति, सीध्यतीष्टाव्यवस्थेति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । शब्दशुद्धेश्च । द्वितीयपाठे तु शब्दाशुद्धिदोर्षः ।

एतत्कारिकाया द्वितीये पादे—शक्तिर्वा इति, शक्तिवाइति पाठद्वयं दृश्यते । तत्राद्यपाठो निर्दोषः । द्वितीयपाठे तु शब्दाशुद्धिश्छन्दोभङ्गश्चदोषः ।

अस्या एव कारिकायास्तृतीयेपादे—संनिधीयेते इति, संनिधीयते इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, द्रव्यगुणयोर्द्वयोः कर्त्रोः कर्मवद्भावात् । अतएव द्वितीयपाठो न युक्तः ।

एतत् कारिकायश्चतुर्थेपादे—तत्र इति,—तत्रतत्रइति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, छन्दः शुद्धेः । द्वितीयपाठे तु छन्दोभङ्गो दोषः ।

एतत्कारिकाव्याख्याने हेलाराजीये—शक्त्युपलक्षणमिति, शक्त्युपलक्षणा इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । अत्रपाठे हि शक्तेरुपलक्षणमिति, शक्तावुपलक्षमिति वा तत्पुरुषः । द्वितीयपाठे तु बहुव्रीहावर्थासंगतिः ।

एतदग्रे—प्रतिनिध्युपादानार्थमिति, प्रतिनिध्युपपादनार्थमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अत्रदर्शने इति, अत्र हि दर्शने इति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः । द्वितीयपाठे हि शब्दो वाक्यालङ्कारे ।

एतदग्रे—क्रियाभिसंबन्ध इति, क्रियासंबन्ध इति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतदग्रे—संनिधापितं स्वाधारमिति, संनिधाहितं अस्वाधारं इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या-चायुक्तः ।

एतदग्रे—तेनापि स्वाधेय इति, तेन स्वाधेय इति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतदग्रे—सामर्थ्यप्राप्तत्वमिति, सामर्थ्याप्राप्तत्वमिति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

जातीनाञ्चगुणानाञ्चेति ।। ७८ ।

कारिकायाः प्रथमे पादे - जातीनाञ्च इति, जातिनां चेति, जातानाञ्चेति पाठत्तयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठे शब्दाशुद्धिः, तृतीयपाठे अर्थासंगतिः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्या एव कारिकायास्तृतीयेपादे—प्रतिनिधीयन्ते इति, प्रतिनिधायन्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः शब्दशुद्धेश्च। द्वितीयपाठे तु शब्दाशुद्धिर्दोषः।

एतत्कारिकाव्याख्याने हेलाराजीये—द्रव्यव्यवधानादिति, द्रव्यव्यवधिना इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

अत्रैव--द्रव्यव्यवधानाद्द्वावपि इति, द्रव्यव्यवधानादावपि इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव—द्वावपि जातिगुणौ इति, द्वावपिद्रव्यगुणजातिनौ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः।

अत्रैव--जातिगुणौ क्रियाङ्गभावमिति, जातिगुणक्रियाङ्गभावमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु अनुभवकर्त्रभावेनार्थासंगतिः।

एतदग्रे—तत्रतथापि इति, तत्रननु तथापि इति पाठद्वयं दृश्यते। तत्र 'ननु' इति पाठोऽनर्थकः संपातायातः।

एतदग्रे—जातयो न प्रतिनिधीयन्ते इति, जातयो म प्रतिनीधीयन्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिर्दोषः।

एतदग्रे—श्वेताभावे इति, श्वेताः भावे इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिर्दोषः।

व्यक्तिंशक्तेःसमासन्नेति ।। ७८ ।

कारिकायाः प्रथमे पादे—व्यक्तिशक्तेः समासन्नाइति, व्यक्तिशक्ते यथासन्ना इति, पाठद्वयं दृश्यते। तदुभयमसाधु, अग्रे तथाशब्ददर्शनात्। द्वितीयपाठे शब्दाशुद्धिर्दोषोऽर्थासंगतिश्च। एवञ्चव्यक्तिशक्तेर्यथासन्नाइतिपाठोयुक्तः। व्यक्तिशक्तेयथासन्ना-समासन्ना इति पाठोऽपिक्वचिद् दृश्यते। सोऽप्ययुक्तः अर्थासंगतेः शब्दाशुद्धेश्च।

अस्या एव कारिकायाश्चतुर्थे पादे—विकल्पते इति, विकल्प्यते इति पाठद्वयं दृश्यते। तदुभयं साधु, आद्यपाठे गुणः कर्ता, द्वितोयपाठे तु स कर्म।

एतत्कारिकाव्याख्याने हेलाराजीये—द्रव्यस्यक्रियोपयोग इति, द्रव्यस्योपयोग-इति, द्रव्यक्रियोपयोग इति पाठत्रयं दृश्यते। तत्त्रितयमपिसाधु, अर्थसंगतेः।

एतदग्रे—उत्पत्तिप्रभृत्याविनाशादिति, उत्पत्तिः प्रभृत्याविनाशादिति पाठद्वयं दृश्यते। तत्राद्यपाठः साधुः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या-चायुक्तः।

एतदग्रे—आविनाशादन्वयादधिष्ठानसंबन्धयोरिति, आविनाशादन्वयानिष्ठा-नसंबन्धयोरिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—गुणास्तुतन्निष्ठोत्तरकालभाविन इति, गुणास्तुनिष्ठोत्तरकालभाविन इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः । अर्थसंगतेः । तन्निष्ठाउत्तरकालभाविन इति कर्मधारयः । द्वितीयपाठे तु अर्थासिंगतिः ।

एतदग्रे—तत्रासन्नमिति, तत्रसन्तमिति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तुशब्दाशुद्ध्याऽयुक्तः ।

एतदग्रे—छागबुद्धिरन्वेत्येव, छागबुद्धिर्भवत्येव इति पाठद्वयं दृश्यते । तदुभयं-साधु, अर्थसंगतेः ।

एतदग्रे—सर्वथैवसाधनभेदादिति, सर्वथैवभेदादिति पाठद्वयंदृश्यते । तत्राद्य-पाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगति । नहि भेदसामान्यं भेदविशेषं प्रतिहेतुर्भवति ।

एतदग्रे—एतच्चजातिपक्षे इति, एतश्चजातिपदार्थपक्षे इतिपाठद्वयंदृश्यते । तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तुशब्दाशुद्ध्याऽयुक्तः ।

अत्रैव—खदिरबुद्धेरनपगमः । एतच्चजातिपक्षे युज्यते इति, खदिरबुद्धेरनपगम इति युज्यते एतत्स्वजातिपक्षे इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—द्रव्यपदार्थपक्षे तु इति, द्रव्यपदार्थे तु इति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः । एतदनन्तरम्—जातेरनभिधेयाया इति, जातिरमभिधेयाया इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः ।

एतदग्रे—तत्त्यागेऽपिनास्ति इति, तत्त्यागो नास्ति इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—पूर्वगुणद्रव्ययोरिति, पूर्वगुणद्रव्ययोरिति पाठद्वय दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तुअर्थासंगत्याऽयुक्तः ।

एतदग्रे—सामर्थ्यादाक्षेपे इति, सामर्थ्याक्षेपे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः नहि सामर्थ्यस्याक्षेपोऽत्राभिमतः ।

एतदग्रे—इति जातिपदार्थमुत्कर्षयितुमिति, इतिपदार्थमुत्कर्षयितुमिति, इति जातिपदार्थमुत्कर्षयितुमेवं विचारितमिति, इति जातिपदार्थमुत्कर्षयितुं विचारित-मिति पाठचतुष्टयं दृश्यते । तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः । द्वितीयचतुर्थौ तु अर्थासंगत्याशब्दाशुद्ध्या चायुक्तौ ।

एतदग्रे—यदा तु जातिः इति-इति, यदा तु इति इतिपाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतदग्रे—भाष्येऽभिहितमिति, भाष्येविहितमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—यत्र हि अन्यतरद् द्रव्यम् तत्प्रधानम, नहि शुक्लामालभेतेति पिष्ट-पिण्डीमालभ्य कृतीभवति इति, यत्र ह्यन्यतरद् द्रव्यमन्यतरोगुणः तत्र यद् द्रव्यम् तत्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रधानम् । तद्यथा शुक्लामालभेत कृष्णामालभेत न पिष्टपिण्डीमालभ्य कृतीभवति इति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतदग्रे--गुणोपर्संजनद्रव्यवाची इति, गुणोपसर्जन प्रदव्यवाची इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः । द्वितीयपाठे प्रशब्दोऽधिकः ।

एतदग्रे—अनिर्धारित रूपस्यहि द्रव्यस्य जातिरात्मरूपनिर्धारणायोपयोगिनी, अनिर्धारित रूपं निर्धारणायोपयोगिनी इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः स्पष्टैव ।

एतदग्रे—आत्मप्रदानेनारूपिता इति, आत्मप्रदर्शनेनारूपिका इति पाठद्वयं दृश्यते । तदुभयमसाधु अर्थासंगतेः । तस्मात्—आत्मप्रदानेनारूपिका इति तृतीयः पाठः कल्प्यः साधुः ।

एतदग्रे—तदाकारतां प्राप्नोति इति, तदाकारतामाप्नोति इति पाठद्वयं दृश्यते, तदुभयं साधु अर्थसंगतेः ।

एतदग्रे—वस्त्वन्तरभावाच्चोदितस्येति, वस्त्वन्तरावभासाच्चोदिस्येति, वस्त्वन्तरभावाश्चोदितास्येति पाठत्रयं दृश्यते । तत्राद्यं पाठद्वयं साधु अर्थसंगतेः । तृतीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तः ।

साम्येनान्यतराभावे॥ ८० ।

इति कारिकायाः प्रथमे पादे—साम्येनान्यतराभावे इति, सौम्येनान्यतराभावे इति, साम्येनान्येतराभावे इति पाठत्रयं दृश्यते । तत्राद्यः पाठः साधुः अर्थसंगतेः ।

द्वितीये पादे—विकल्प इति, विकल्पा इति पाठद्वयं दृश्यते । तत्राद्यः पाठः साधुः इष्यते इत्यस्य कर्मत्वात् । द्वितीयपाठस्तु तदसंभवादयुक्तः ।

एतदग्रे—कैश्चिदिष्यते इति, कैश्चिदीष्यते इति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः, । द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः ।

तृतीयेपादे—अतद्गुणोऽतः छागःस्यादिति, अतद्गुणोऽतं छागस्येति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः, शब्दशुद्धेश्च । द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च ।

चतुर्थेपादे--मेषोवाइति, मेघोवाइति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतत्कारिकाव्याख्यानेहेलाराजीये - यथाजातिरिति, तथाजातिरिति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—वाय्वाकाशादेरिति, वाद्याकाशादेरिति, बाधाकाशादेरिति पाठत्रयं दृश्यते । तत्राद्यपाठोयुक्तः, अर्थसंगतेः । इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम् ।

एतदग्रे—तदभावादिति, तदभावोदिति पाठद्वयं दृश्यते । तत्राद्यपाठोयुक्तः । अर्थसंगतेः । द्वितीयपाठस्तुअर्थासंगत्याऽयुक्तः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—द्रव्यलक्षणप्राप्तमिति, लभ्यलक्षणप्रासमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। शब्दाशुद्धेश्च।

एतदग्रे—व्याडिदर्शनस्थिताइति, वाडिदर्शनस्थिताइति पाठद्वयंदृश्यते। तत्राद्यपाठोयुक्तः। व्याडेः संग्रहकर्तुः प्रसिद्धत्वात्। इतरः पाठस्तु न युक्तः, वाडेरप्रसिद्धत्वात्।

एतदग्रे—द्रव्यद्वारेणार्हति इति, द्रव्यद्वारेअर्हतिइति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः। अर्थसंगतेः। द्वितीयपाठस्तुअर्थासंगत्याऽयुक्तः। इतः प्राक् – क्रियासंवन्धमिति, कर्मसंवन्धमिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तुकर्मशब्दः क्रियापरः फलाश्रयपरोवा इतिसंदेहाद्धेयः।

एतदग्रे—जातिवद्द्रव्यद्वारेण इति, जातिद्रव्यद्वारेण इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः, द्वितीयपाठे त्वर्थासंगतिः।

एतदग्रे—द्वयोरपि द्रव्यगुणयोरिति, द्वयोरपिगुणद्रव्ययोरिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः, अत्रपूर्वनिपातस्यानियतत्वात्।

एतदग्रे—द्रव्यस्य हि इति, द्रव्य स हि इति, ब्रह्मस्य हि इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

एतदग्रे—भाष्यकारप्रभृतिभिरिति, भविष्यकारप्रभृतिभिरिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अत्रानुपयोगादयुक्तः।

एतदग्रे—नाङ्गीकृत इति, नीगाकृत इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठस्तुशब्दाशुद्धयाऽयुक्तः।

जातेराश्रितसंख्याया ॥ ८१ ॥

इति कारिकायाः प्रथमे पादे—आश्रितसंख्याया इति, आश्रित संख्यायामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः विशेष्यविशेषणयोः समानविभक्तिकत्वस्यौचित्यात्। द्वितीयपाठस्तु अतएवाऽयुक्तः।

एतत्कारिकाव्याख्याने हेळाराजीये—पूर्वप्रस्तुतस्येति, पूर्वस्तुतस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अत्रैव— प्रासङ्गिकेन स्तुतस्येत्यपि क्वचित्पाठो दृश्यते। सोऽप्यर्थासंगत्याऽयुक्तः।

एतदग्रे—सामान्येनाधिकं। विशेषंवक्तुमिति, सामान्येनाधिकं वक्तुमिति पाठद्वयं दृश्यते। तदुभयं युक्तमर्थसंगतेः।

पराङ्गभूतं सामान्यम् ॥ ८२ ॥

इति कारिकायाः प्रथमेपादे—पराङ्गभूतमिति, परागभूतमिति, पराङ्गभूतः सामान्यमिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्याः कारिकायाः द्वितीये पादे—द्रव्यसंख्यया इति, द्रव्यसंख्ययाः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

तृतीये पादे—स्वार्थंप्रवर्तमानमिति, स्वार्थप्रवर्तमानमिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतत्कारिकाव्याख्याने हेलाराजीये—शाब्देन व्यापारेणइति, शाब्दे व्यापारे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। प्रतिपादनक्रियायां शाब्दव्यापारस्य करणत्वस्यैवौचित्यात्।

एतदग्रे—गुणेऽपि ग्रहे इति, गुणेऽपि गृहे इति, गुणे विग्रहे इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। इतरत् पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—संख्या विवक्षितेति, संख्या विवक्षत इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः शब्दशुद्धेश्च। द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—न्यायोऽवतार्यते इति, न्यायो नावतार्यते इति, न्यायो विचार्यते इति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

यजेत पशुनेत्यत्र ॥ ८३ ।

इति कारिकायाः पूर्वार्धे—यजेत इति, यजेते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु तयोरभावः।

अत्रैव—यजेत पशुनेत्यत्र यज्यर्थायां पशु श्रुताविति, यजेत पशुने.......पशु श्रुताविति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः द्वितीयपाठस्तु वाक्यासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—यागस्येति, तथाहि यागस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः तथाहि इत्यस्य व्यर्थत्वात्।

एतदग्रे—क्रियालक्षणस्येति, क्रियोपलक्षणस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—गुणभेदं प्रत्यनादरादिति, गुणभेदप्रत्यनादरादिति, गुणभेदे प्रत्यनादरादिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः शब्दशुद्धेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽयुक्तम्।

एतदग्रे—पराङ्गभूतमत्रेति, पराङ्गभूतमंत्रेति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्ध्या चायुक्तः।

एतदग्रे—प्रधानं गुणानुयायीत्येतदिति, प्रधानं गुणयायीत्येतदिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रसज्येतेति, प्रसज्यते इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। अत्रैव—प्रसज्येतेत्याह इति, प्रसज्ये तथाहि इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यावतां संभवो यस्येति ॥ ८४ ।

कारिकायाः पूर्वार्द्धे द्वितीयेपादे—स कुर्यात् तावतां यदि इति, सक्तुर्यातावता यदि इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्ध्या चायुक्तः ।

तृतीयेपादे—गुणैस्तेन इति, गुणस्तेन इति, गुणेस्तेन इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्त अर्थसंगतेः । इतरत् पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम् ।

चतुर्थेपादे – प्रधानं स्यादिति, प्राधान्यं स्यादिति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतत्कारिका व्याख्याने हेलाराजीए—प्रधाने इति, प्राधाने इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठे तु अर्थासंगतिः ।

एतदग्रे तत्प्रति च गुणानां गुणत्वमिति, तत्प्रतिपन्नानां च गुणानां गुणत्वमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

संमृज्यमानतन्त्रे तु ॥ ८५ ।

इति कारिकायाः प्रथमे पादे—संमृज्यमान तन्त्रे इति, संमृज्यमानं तंत्रे इति पाठद्वयं दृश्यते । संमृज्यमान तन्त्रेषु इति तृतीयपाठोऽपि क्वचिद् दृश्यते । तत्राद्यपाठोयुक्तः, ग्रहे इति विशेष्येण सामानाधिकरण्यस्य संभवात् । द्वितीयपाठस्तु तदभावादयुक्तः । तृतीयपाठोऽपि विशेष्यसमानविभक्तिकत्वासंभवादयुक्तः ।

अस्याः कारिकाया उत्तरार्धे—संख्याविशेषग्रहणं नैव इति, संख्याविशेष श्रवणं नैव इति पाठद्वयं दृश्यते । तदुभयं साधु अर्थसंगतेः ।

एतत्कारिका व्याख्याने हेलाराजीये—यत्र ग्रहे इति, यत्रगृहे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः ग्रहस्य प्रक्रान्तत्वात् । द्वितीयपाठस्तु गृहस्याप्रक्रान्तत्वादयुक्तः ।

एतदग्रे—ग्रहे संस्कार्यत्वादिति, ग्रहं संस्कार्यत्वादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः प्रधाने इत्येनेन सम्बन्धसंभवात् । द्वितीयपाठस्तु तदसंभवादयुक्तः ।

एतदग्रे—शब्देन प्रधानभूताया इति, शब्दे प्रधानभूताया इति, शब्दप्रधानभूताया इति पाठत्रय दृश्यते । तत्राद्यपाठो युक्तः, श्रवणक्रियाया करणत्वसंभवात् । श्रवणक्रियाया धिकरणत्वस्यापिसंभवात् द्वियीयपाठोऽपि युक्तः । तृतीयपाठस्त्वर्थासंगत्याऽयुक्तः । शब्देनप्रधानभूतायामिति चतुर्थपाठोऽपि क्वचिद् दृश्यते । सत्वयुक्तः, संमार्जनक्रियाया इति विशेष्येण सहान्वयविरोधात् ।

एतदग्रे—ग्रहंसंमार्ष्टि इति, ग्रहंसम्मार्ष्टि इति पाठद्वयं दृश्यते । तदुभयंयुक्तम् । पदान्ते परसवर्णस्यवैकल्पिकत्वात् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—उत्पत्तिवाक्यानुसारेण इति, तदुत्पत्तिवाक्यानुसारेण इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

अत्रैव—उत्पत्तिवाक्यानुसारेण इति, उत्पत्तिवाक्यमनुसारेण इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। यदि तु-उत्पत्तिवाक्यमनुसृत्य इतिपाठः तदा स युक्तः।

एतदग्रे—ग्रहलक्षणेन साधनेन तस्य इति, ग्रहलक्षणेन तस्येति, ग्रहलक्षणेन-साधने तस्येति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दार्थयोरौचित्यस्यसंभवात्। द्वितीयपाठे तु विशेष्याप्रतीतिः। तृतीयपाठेतु-विशेष्यविशेषणयोः समानविभक्तिकत्वाभावः।

एतदग्रे—पशुवन्निष्फलंस्यात् इति, पशुबलिफलंस्यादिति, पशुवह्निफलंस्यादिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—उत्सृज्यात्रजारिति, उत्सृज्यजातिः प्रवर्तते इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः द्वितीयपाठस्तुआवश्यकस्यात्रपदस्याभावाद्युक्तः।

शिष्यमाणपरे वाक्ये इति ॥ ८६ ।

कारिकाया अवतरणिकायां हेलाराजीये—प्रभानभूतइत्यत्र-इति, प्रधान-इत्यत्रेतिपाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु-शब्दाशुद्धयाऽयुक्तः। प्रधानशब्दस्य सदा क्लीबत्वात्।

एतत्कारिकाव्याख्याने हेलाराजीये—इतिशेष इति कर्मसाधनशेषशब्दाश्रयेण इति, इतिशेषकर्मसाधनशब्दाश्रयेण इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अवतिष्ठमानः परः, अवतिष्ठः माणः परः इति, अवतिष्ठमानः परः इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः। शब्दाशुद्धेः। एवंतृतीयपाठोऽप्ययुक्तः समासासंगत्या शब्दाशुद्धेः। अवतिष्ठमानः प्रधानं प्रधानामिति चतुर्थपाठोऽप्ययुक्तः, पुनरुक्तेरर्थासंगतेश्च।

एतदग्रे—एकशेषलक्षणेनसंस्कारेणसंस्कार्यत्वादिति, संस्कारेणसंस्कार्यत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः वाक्यपरिसमाप्त्या निराकाङ्क्षार्थप्रतिपत्तेः। द्वितीयपाठस्तु स्वार्थेवोधने पदान्तरसाकाङ्त्वादयुक्तः।

एतदग्रे—सामान्यमाधारगतसंख्याश्रयेण न प्रवर्तते इति, सामान्यगतसंख्याश्रयेण न प्रवर्तते इति, सामान्यमाधारगतसंख्याश्रयण न प्रवर्तते इतिपाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तृतीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—शेषणक्रियायाः प्राधान्यम्, न शिष्यमाणस्येति, शेषणक्रियायाः प्राधान्येन शिष्यमाणस्येति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठे त्वर्थाऽसंगतिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—द्विबह्वोरपिशेषणमेकमेवेति, द्विबह्वोरविशेषणमेकमेवेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

समासप्रत्ययविधाविति ॥ ८७ ।

कारिकाया अवतरणिकायां हेलाराजीये—न्यायमिति, न्याय्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—वैदिकोदाहरणपृष्ठपातितयेति, वैदिकोदाहरणपक्षपातितयेति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—अवस्थाप्येति, व्यवस्थाप्येति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—व्याकरणेऽपि इति, व्याकरणे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः समुच्चयार्थकापिशब्दस्यावश्यकत्वात्।

अस्याः कारिकायाश्चतुर्थे पादे—न्यायेनैवोपपद्यते इति, सा तथैवोपपद्यते इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। हेलाराजीये तु आद्यपाठ एव व्याख्यातः।

एतत्कारिका व्याख्याने हेलाराजीये—न चाप्यवयवा इति, न चात्रावयवा इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—समासपदस्याभिन्नस्यैव प्रवृत्तेरिति, समासपदनाभिन्नस्यैव प्रवृत्तेरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—वाक्यकाण्डे इति, वाक्यके इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठेऽर्थासंगतिः।

एतदग्रे—ब्राह्मणार्थं इति, ब्रह्मणार्थं इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठे त्वर्थासंगतिः।

एतदग्रे—ब्राह्मणकम्बले इति ब्राह्मणकेवलम् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—परिकल्पितपूर्वपरावयवविभागस्यसंचिकीर्षितत्वम् इति, परिकल्पितपूर्वपरावयवानां विभागः संचिकीर्षितः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठोऽपि परिकल्पितः पूर्वपरावयवानां विभागः संचिकीर्षित इति व्यस्तपाठे सति साधुः।

एतदग्रे—तौ चात्र इति, ते चात्र इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। तथाहि-प्रथमपाठे तौ इत्यस्य पूर्वपरावयवौ इत्यर्थः। द्वितीयपाठे-ते इति समास पदे इत्यस्य विशेषषम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अवयवसंस्कारनान्तरीयकत्वात् समुदायसंस्कारस्य इति, अवयवसंस्कारादिनान्तरीयकत्वात् समुदायसंस्कारस्येति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसगतेः। द्वितीयपाठे तु आदिपदं व्यर्थम्।

एतदग्रे—तेनैवप्रकारेणेति, केनैवप्रकारेण इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः द्वितीयपाठे तु अर्थासगतिः।

एतदग्रे—न्यायेनोपपद्यते इति, न्यायेनैवोपपद्यते इतिपाठद्वयं दृश्यते। तदुभय साधु, अर्थसंगतेः। कारिकायान्तु—न्यायेनैवोपपद्यते इति पाठो दृश्यते।

एतदग्रे—सती-सुप्सुपाइतिश्रुतिरिति, सतिश्रुता—सुप्सुपाइतिश्रुतिरिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादसंगतः :

एतदग्रे—प्रतिपादयतीत्येकैकस्यसुबन्तस्येति, प्रतिपादयन्तीत्येकैकस्य सुबन्तस्येति, प्रतिपादयत्येकस्यसुबन्तस्येति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठद्वयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—न तु बहूनामिति, ननु बहूनामिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अनेकस्य हि समासे तस्यानियतत्वादिति, अनेकस्यहिसमासे नियतस्यानियतत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—विप्लवात्तस्यानुग्रहो निराकृतः स्यादिति, विषयातस्यानुग्रहो नः कृतः स्यादिति, विप्लवातस्यानुग्रहोऽनुकृतः स्यादिति, विप्लवात्तस्यानुग्रहो न कृतः स्यादिति विप्लवातस्यानुग्रहोनिराकृतवादितिपाठपञ्चकं दृश्यते। तत्राद्यचतुर्थपाठौयुक्तौ, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—अतएव च लिङ्गादन्यत्रसंख्याविवक्षासिद्धिरिति, अतएवचलिङ्गात्संख्याविवक्षासिद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—प्रत्ययविधौ अपि इति, प्रत्ययविधाविति इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रकृतेः सिद्धरूपायाः अनुवादात् स्वादिविधिवाक्येऽधिकारात् अपूर्वस्य स्वादेरेकवाक्यतया इति, प्रकृते......क्यतया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः वाक्यस्य पूर्णत्वात् अर्थसंगतेश्च। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—प्रातिपदिके यथाश्रुतसंख्याङ्गीकार इति, प्रतिपादियथाश्रुत संख्याङ्गीकार इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—एकत्वस्य प्रतिपादितत्वादिति. एकत्वप्रतिपादित्वादिति, एकत्वस्य प्रतिपादितत्वादिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयतृतीय पाठौ तु यथायथम् उद्देश्यविधेयभावानवगमात् शब्दाशुद्धेश्चायुक्तौ।

एतदग्रे—विवक्षोच्येत। यदि इति, विवक्षौच्येतास्य यदि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः शब्दशुद्धेश्च। द्वितीयपाठस्तु तदुभयाभावाद-संगतः।

एतदग्रे—समुदायसंबन्धित्वात् इति, समु......त्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—समुदायाच्च प्रत्ययोत्पत्तेरिति. समुदायात्प्रत्ययोत्पत्तेरिति पाठद्वयं दृश्यते। तत्राद्यपाठ एव युक्तः त्वर्थकस्य चकारस्यावश्यकत्वात्। अतएत द्वितीय-पाठो न युक्तः।

एतदग्रे—स्वरूपमात्रेण इति, स्वरूपमात्रेणैव इति पाठद्वयं दृश्यते। तदुभयं-साधु, एवकारविनाऽपितदर्थलाभात्। असतिबाधके सर्वाणि वाक्यानि सावधारणा-नि भवन्तीतिन्यायात्।

एतदग्रे—ङ्याप्प्रातिपदिकानि इति, ङ्याप्प्रतिपादिकानि इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्था-संगत्या चायुक्तः।

एतदग्रे—वयमप्यधुनातर्ह्येवंव्याचक्ष्महे इति, वयमप्यधुनैवंव्याचक्ष्महे इति, वयमप्यधुनातर्ह्येवं व्याचक्ष्यमहे इति पाठत्रयं दृश्यते। तत्राद्यपाठद्वयं साधु, अर्थ-संगतेः। तृतीयपाठस्तुशब्दाशुद्धयाऽयुक्तः।

एतदग्रे—प्रतिपादयन्तीनिपतिता इति, प्रतिपादयन्तीति पतिता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तुअर्थासंगत्याऽयुक्तः।

एतदग्रे—तथा च तावति इति, यथा च तावति इति पाठद्वयं दृश्यते। तत्राद्य-पाठः साधुः अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः। निपतिता तथा चतावति प्रात्पर्यमिति तृतीयपाठोऽपि दृश्यते। स तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—न द्वितीयमपेक्षते इति, न द्वितीयमपेक्ष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, श्रुतेः कर्तृत्वेन कर्तरिप्रत्ययस्यसंभवात्। द्वितीयपाठस्तु न युक्तः, श्रुतिरिति प्रथमान्तपाठस्यास्मिन्पाठेऽसंगत्यापत्तेः।

एतदग्रे—प्रतियोगापेक्षामन्तरेण इति, पाठो यद्यपि उपलभ्यते तथापि स न-युक्तः। अर्थासंगतेः। किन्तु प्रतियोग्यपेक्षामन्तरेण इति पाठोऽत्र साधुः। अर्थसंगतेः।

एतदग्रे—एकत्वं ङ्याप्प्रातिपदिकात् इति, एकत्वंङ्यापप्रतिपादिकादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च।

एतदग्रे—नहिप्रातिपदिकमिति, नहिप्रतिपदिकमिति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु तदुभयाभावः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—गुणानुयायिप्रधानं स्यादिति, गुणानुयायिन प्रधानं स्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—संचिकीर्षिता इति, संविचिकीर्षिता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु विपदवैयर्थ्यादयुक्तः।

एतदग्रे—तस्यैवलोके प्रयोगादिति, तस्यैवलोकेप्रत्यय परतया......प्रयोगादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठे तु किंविवक्षितमितिन विज्ञायते। विन्दुलेखैः पाठभ्रंशानुमानात्। प्रप्ययपरतयेति च व्यर्थम्। तस्यैव-इत्येननगतार्थत्वात्।

एतदग्रे—यद्यपि च प्रत्ययपरत्वेन संस्कृताप्रकृतिरेव इति, यद्यपि... प्रकृतिरेव इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अपूर्णत्वादयुक्तः।

एतदग्रे—प्रक्रियाभेदेनासत्यत्वादिति, प्रक्रियाभावेनासत्यत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। प्रक्रियाभेदस्यैव प्रकृत्यसत्यत्वप्रयोजकत्वात्। प्रक्रियाभावस्य प्रक्रियात्वरूपस्य प्रक्रियासत्त्वरूपस्यवासत्त्यत्वाप्रयोजकत्वात्। तयोरव्यभिचरितान्वयव्यतिरेकविरहात्।

एतदग्रे-- इत्थश्चनात्र इति, इत्थंचात्र इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, एकवाक्यताया एवाग्रे समर्थनात् अतएव द्वितीयपाठो न युक्तः।

एतदग्रे—सुप्तिङोरविशेषविधानादिति, सुपिङोरविशेषविधानादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्त, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः। अविशेषविङोऽभिधानादिति तृतीयपाठोऽपि क्वचिद् दृश्यते। स तु न युक्तः, शब्दाशुद्धेरर्थासंगतेश्च।

एतदग्रे—संख्यावाक्यभेदाभिप्रायमिति, संख्याभेदाभिप्रायमिति, संख्यावाक्याभेदाभिप्रायमिति पाठत्रयं दृश्यते। तत्राद्यपाटोयुक्तः, अर्थसंगतेः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। एवं तृतीयपाठोऽपि।

एतदग्रे--लब्धसत्तानां स्वादीनामिति, सत्तानां स्वादीनामिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विषयीकरणाद्भाव्यमानावस्थानामेवेति, विषविकरणाद् भाव्यमाभिधानदिति, विषयोकृतत्वादिति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्त, शब्दशुद्धेरर्थसंगतेश्च। इतरत्पाठद्वयन्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तम्। विषयीकरणाद्भाव्यमानावस्थायामेवेति चतुर्थपाठोऽपिक्वचिद् दृश्यते। स तु युक्तः अर्थसंगतेः।

गुणेऽपिनाङ्गीक्रियते इति ॥ ८८।

कारिकाया अवतरणिकायां हेलाराजीये--गुणे संख्याविवक्ष्यते इति, गुणसंख्याविवक्ष्यते इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः। गुणेऽपिनाङ्गीक्रियते इति कारिकायाः प्रथमे पादे—गुणेऽपि इति, गुणोऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत्कारिकायाश्चतुर्थपादे—कर्मण्यविशिष्ट इति, कर्माण्यविशिष्ट इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्त, अर्थसंगतेः। व्याख्यातश्च स एवहेलाराजेन।

एतत्कारिकाव्याख्याने हेलाराजीये—ईप्सिततमं तु कर्म इति, विःप्सिततमंतुकर्म इति, ईप्सिततमं कर्म तु इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः। तृतीयपाठोऽपि प्रथमपाठवद् युक्त एव।

एतदग्रे—संज्ञाद्वारेणाधीयमानसंस्कारमिति, संज्ञाद्वारेणधीयमानसंस्कारमिति, संज्ञाद्वारेणविधीयमानसंस्कारमिति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौयुक्तौ, अर्थसंगतेः द्वितीयपाठस्तुअर्थासिंगत्याऽयुक्तः।

एतदग्रे—सूत्रोपात्तलिङ्गसंख्याभ्यामिति, सूत्रोयातलिङ्गसंख्याभ्यामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे - समासेऽव्यवस्था इति, समानं व्यवस्था इति, समासेव्यवस्था इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासिंगत्याऽयुक्तम्।

एतदग्रे—न दोष इति, दोष न इति पाठद्वयं। तत्राद्यपाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—संख्याश्रीयते इति, संख्याङ्गीक्रियते इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—प्रधान संकोचे इति, प्रधानसंस्कारे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितियपाठे तु अर्थासंगतिः। नहि प्रधानसंस्कारे प्रधानोपरोधः संभवति इति।

एतदग्रे - प्राधानान्तरसिद्धिरिति, प्रधानान्तसिद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—कर्तुरीसिततमं कर्म इत्यत्र इति, कर्तुरीप्सितमित्यत्र इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

यस्यान्यस्यप्रसक्तस्येति ॥ ८९ ।

कारिकाया द्वितीये पादे—नियमार्था इति, नियमार्थः इति, नियमार्थात् इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, पुनः श्रुतेर्विशेषणत्वसंभवात्। तदसंभावाद् द्वितीयपाठो न युक्तः। तृतीय पाठोऽपि न युक्तः, अर्थासंगतेः। यदि तु ल्यब्लोपेपञ्चमी स्वीक्रियते, नियमरूपं प्रयोजनं स्वीकृत्येति तदा सोऽपि युक्तः।

अस्याः कारिकाया उत्तरार्धे—निवृतौ चरितार्थत्वात् संख्यातत्राविक्षिता इति, निवृत्तौ क्षिता इतिपाठद्वयं तदृश्यते। तत्राद्यपाठो युक्तः, स्वार्थे पूर्णत्वात्। तदभावादद्वितीयपाठो न युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत् कारिकाव्याख्याने हेलाराजीये—यस्य पुनः श्रुतिरिति, यस्यः पुः श्रुतिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे - प्रसक्तस्य प्राप्नुवत इति, शब्दोपात्तशब्दस्यार्थे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसङ्गतेः। द्वितीयपाठस्तु अर्थासङ्गत्याऽयुक्तः।

एतदग्रे –नियमार्था निवृत्यर्था इति क्वचित्तु–निवृत्यर्था इत्येवपाठो दृश्यते। तत्राद्यपाठो युक्तः, व्याख्यानरूपतया संगतेः। द्वितीयपाठस्तु विवक्षितार्थासाधकत्वादयुक्तः।

एतदग्रे –संबन्धिशब्दत्वाद्येन इति, संबन्धिशब्दस्यत्वाद्येन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—निवारिताः, तथापि इति, निवारितास्ता तथापि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासिगत्या चायुक्तः।

एतदग्रे—पशुनेतिकरणान्तरनिवृत्तितात्पर्येणोच्यमानामिति, पशुनेतिकरणान्तरनिवृत्तितात्पर्यंनोच्यमानमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—पुनः श्रुतिर्भवति इति, पुनः श्रुतिर्नभवति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु विरूद्धार्थप्रत्यायकत्वादयुक्तः।

एतदग्रे –यजेः करणाक्षेपइति, यत्ते करणाक्षेप इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगते। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः।

एतदग्रे यज्यर्थत्वात्त्यज्यमानस्यैव इति, यज्यर्थत्वात् त्यक्ष्यमाणस्यैवेति, यज्यर्थत्वाद् यजमानस्यैवेति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय तृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ। तत्र द्वितीयपाठे कालासंगतिः। तृतीयपाठे तु कर्तुराक्षेपस्यासंगतिः। यज्यर्थरूपयाहविः प्रक्षेप क्रियया स्वकर्मणो द्रव्यस्यैवाक्षेपात्। कर्ता तु तिङर्थरूपयाभावनयाऽऽक्षिप्यते इति न तस्य यज्यर्थेनाक्षेपः।

एतदग्रे—करणाक्षेपनान्तरीयकत्वाभावादिति, करणाक्षेपव्यापकत्वाभावादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे -यजे प्रयोगो दृश्यते इति, यजेरप्रयोगोदृश्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्य अर्थासंगत्याऽयुक्तः।

तथाहि—यजरेप्रयोगो दृश्यते इत्युच्यते, अग्नौ सुष्ठुयजते इत्युदाह्रियते इति विरोधादसंगतिः।

एतदग्रे—अग्नौ इति, जेग्नयु इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सुष्ठु यजते इति, सुश्रु इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दशुद्धयाऽयुक्तः। सुप्सु इति तृतीयपाठोऽपि क्वचिद् दृश्यते, सोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—एवं तर्हि इति, एवमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—नामसामर्थ्यादिति, नामसाध्यत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्येव प्रतीतेरिति, इत्येव प्रतीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, प्रतीतिविशेषनिष्ठस्य अपूर्वचोदनात्वनिश्चयहेतुत्वस्य तस्मिन्नेव पाठे उपपत्तेः।

एतदग्रे—नापियागान्तरे इति, नापिप्रयागान्तरे सिद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या निरस्तो वेदितव्यः।

एतदग्रे—सार्थाद्धीयते इति, सामर्थ्यात्सार्थाद्धीयते इति, सामर्थ्याद्धीयते इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—आपादानेन सार्थेन इति, वादानेनसामर्थ्येन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—ईप्सिततमस्य पथिकस्येति, पथिकस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठेनु सार्थे पथिकस्येति नान्वयः सम्भवति।

एतदग्रे—लकारोत्पत्तिः कथमिति, लकारानुत्पत्तिः कथमिति पाठद्वयं दृश्यते तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठे त्वर्थासगतिः।

एतदग्रे--कर्मकर्तृविषय इति, कर्तृविषय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठे त्वर्थासंगतिः।

एतदग्रे—त्यागमात्रवचन इति, त्यागवचन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः। तथाहि--मात्रपदाभावे त्यागादधिकस्याप्यर्थस्य सम्भावनया कर्तृस्थक्रियत्वानुपपत्तिः।

एतदग्रे—हित्यजति इति, हिव्यंजति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे--न धातुवाच्य इति, न धातुवाच्यमिति पाठद्वयं दृश्यते। तत्रापायविशेषणत्वे पुंस्त्वम्, फलविशेषणत्वे तु नपुंसकत्वमिति तदुभयं युक्तम्।

एतदग्रे- पूर्वं कर्मणः सत इति, पूर्वकर्मणः सत इति पाठद्वयं दृश्यते। पूर्वंततः कर्मणः इति तृतीयपाठोऽपि क्वचिद् दृश्यते। तत्राद्यपाठोयुक्तः पूर्वमिति काल

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाचिनः सत इति क्रियावाचिनि विशेषणत्वेन कर्मत्वसम्भवात्। द्वितीयपाठे तु सत इत्यस्यवैयर्थ्यम्। तृतीयपाठे तु पूर्वमित्यस्य प्रयोगस्यानुपपत्तिः, तत इत्यस्यानर्थक्यञ्च।

एतदग्रे—सर्वेषामेव विद्यते इति, सर्वेषामपि विद्यते इति पाठद्वयं दृश्यते तदुभयं युक्तम्। अर्थसंगतेः।

एतदग्रे—स्वातन्त्र्यमपादानस्यानपगतमेव इति स्वातन्त्र्यमपादानस्यानवगतमेव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्वव्यापारे स्वातन्त्र्यमिति, संख्याव्यापारे स्वातन्त्र्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—स्वातन्त्र्यं प्रधानेन कर्त्रा न्यग्भावितमिति, स्वातन्त्र्यं न कर्त्रा न्यग्भावितमिति, स्वातन्त्र्यं न प्रधानकर्त्रा न्यग्भावितमिति, स्वातन्त्र्यं प्रधानेन कर्त्रान्यद्भावितमिति पाठचतुष्टयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु शब्दाशुद्ध्याऽर्थासंगत्या चायुक्तम्।

एतदग्रे—सार्थस्यापगमाङ्ग इति, सामर्थ्यस्यापगमाङ्गे इति, सार्थस्यापगमान्ते इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः : इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—त्यागे इति; त्रागे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंसंगतेः द्वितीयपाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—वर्तनादपगमेइति, वर्तनादनपगमे इति पाठद्वयं दृश्यते। तत्राद्यपाठोः युक्तः अर्थसंगतेः। द्वितीयपाठस्तु विवक्षितार्थविरोधादयुक्तः।

एतदग्रे—त्यागे तु इति, त्यागेपि इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तथाहि—तत्र पाठे अपिना अपगमः परामृश्यते। अपगमे तु सार्थस्य न स्वातन्त्र्यम्, अतएव तत्र तस्यापादानत्वम् इत्येवं विवाक्षितार्थविरोधः।

एतदग्रे—शरनिःसरणेऽवधिभावगमनमिति, शरणीसरनिबधीभावगमनमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—वेधने इति, व्यधने इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। यद्यपि विधविधाने इति पठ्यते। तथाऽपि धातूनामनेकार्थत्वाद्व्यधनमपि तदर्थः संभवति। साधने इति तृतीयपाठोऽपिक्वचिद् दृश्यते। सतु अर्थासंगत्याऽयुक्तः।

एतदग्रे—करणसंज्ञयाऽपादानसंज्ञाबाधनादिति, करणसंज्ञायामपादान संज्ञाबाधनादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु अपादानसंज्ञाबाधनकर्तुरलाभः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—तुल्यवलत्वादिति, तुल्यलत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो-युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दशुद्ध्या अर्थासंगत्याचायुक्तः।

एतदग्रे—कर्तृत्वमेव गम्येत, कर्तृत्वमेवावगम्येत इति, कर्तृत्वमेव गम्यते इति पाठत्रयं दृश्यते। तत्राद्यपाठोयुक्तः, ज्ञानरूपस्य गमनस्यात्रापाद्यत्वस्यैवौचित्यात्। अतएव गमनस्य वर्तमानत्वाभावादितरत् पाठद्वयं न युक्तम्।

एतदग्रे—ततोऽनपेत इति, ततोऽनापेत इति पाठद्वयं दृश्यते। तदुभयमप्ययुक्तम् अर्थासंगतेः। तस्मात्-यावच्चासावपि ततोऽपेत इति तृतीयः पाठः साधुः कल्प्यः अर्थसंगतेः।

एतदग्रे—तावत्सार्थस्येति, ततो सार्थस्येति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्य तु शब्दाशुद्धयाऽर्थासंगत्याचासाधुत्वम्।

एतदग्रे—इति तदभिधातुमिति, इति तदभिधानमुपादातुमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अपादाने पञ्चम्येवात्र, अपादाने पञ्चमे वात्रेति, अपादानपञ्चम्येवात्रेति पाठत्रयं दृश्यते। तत्राद्यतृतीयपाठौ युक्तौ अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—तत्र च त्यागफलरूपापायस्येति, तत्र त्यागफलरूपापायस्येति, तत्राप्यपायस्येति पाठत्रयं दृश्यते। तत्राद्यद्वितीयौ पाठौ युक्तौ अर्थसंगतेः। तृतीय पाठस्तु विवक्षितार्थासाधकत्वादयुक्तः।

एतदग्रे—हीयते इति कोऽर्थइति, हीयते इत्यत्र कोऽर्थइति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—सार्थादपेयात्पथिकइति, साक्षादपेयात्पथिक इति, साक्षादेवेयातपथिकइतिपाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ। तृतीयपाठे शब्दाशुद्धिरपि।

एतदग्रे—ततोऽस्य सार्थस्येति, ततोऽर्थस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—हीयते इति, होयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः। द्वितीय पाठस्तु तदभावादयुक्तः।

एतदग्रे—सार्थेनात्मन इति, सामर्थ्येनात्मन इतिपाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या हेयः।

एतदग्रे—सार्थेनापकृष्यतेइति, सार्थेनापिकृष्यते इति, सार्थोऽवकृष्यते इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठयोस्त्वर्थासंगतिः।

एतदग्रे—नियतमवगम्यतेइति, नित्यमित्यवगम्यतेइति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। कर्तृत्वमवगम्यते इति तृतीयपाठोऽपि युक्तएव, अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—फलभेदेसत्यतुल्यबलत्वादिति, फलभेदे सत्यम्। तुल्यबलत्वेनइति, फलभेदे सत्यतुल्यबलत्वादाश्रयितुं ····फलत्वे सति इति पाठत्रयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे - विवक्षितार्थप्रतिपादनसामर्थ्यादिति, विवक्षितार्थप्रतिपाद्य-सामर्थ्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः द्वितीयपाठस्तु अर्था-संगत्याऽयुक्तः।

एतदग्रे—स्वातन्त्र्योपलक्षणार्थत्वादिति, स्वातन्त्र्योपलक्षकलक्षणात्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे - शब्देन लक्ष्यते इति, शब्देनोच्यते इति पाठद्वयं दृश्यते। तत्राद्य-पाठो न युक्तः। स्वतन्त्रः कर्तेति पाणिनिसूत्रदर्शनात्। अतएव द्वितीय पाठो युक्तः।

एतदग्रे—परस्मैपदात्मनेपदयोरविशेषेण इति, परस्मैपदात्मनेपदयोर-विशेषणमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्त्वर्था-संगत्याऽयुक्तः।

एतदग्रे—प्रसक्तौ इति, प्रसक्तो इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—शेषात्कर्तरि इति, शेषात् रविशेषात् कर्तरि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीय पाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—नियमार्था पुनःश्रुतिरिति, नियमार्था पुनःश्रुतिरिति इति पाठ-द्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—अविवक्षितसंख्येति, अविवक्षिता संख्येति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—प्राधान्येऽर्थानामिति, प्राधान्येनार्थानामिति, प्राधान्येनान्यार्थाना-मिति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम् अर्थसंगतेः। तृतीयपाठस्तु अर्था-संगत्याऽयुक्तः।

एतदग्रे—संख्यानाङ्गीक्रियतेऽत्रेति द्विवहुष्वपि इति, संख्यानाङ्गीक्रियतेति द्विवहुष्वपि इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु शब्दाशुद्धिर्दोषः।

एतदग्रे—पूर्वश्रुत्यैव, पूर्वं श्रुत्यैव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः। तथाहि—आद्यपाठे एव पुनः शब्देने-त्युक्तिः संगच्छते।

एतदग्रे—विधावुपादानादिति, विधावुपादनादानादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—नियमार्थमेवानुवादादिति, नियमार्थवेदानुवादादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे– तथा च यजेत पशुना इति तद्यथा पक्वेन पक्वेन इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--सरूपाणामिति, स्वरूपाणामिति पाठद्वयं दृश्यते। तत्राद्यपाठः प्रकृतोपयुक्तः। द्वितीयपाठस्तु अनुपयुक्तत्वाद्धेयः।

एतदग्रे--एक शेष इति, एकः शिष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः. सूत्राविरोधात्। अतएव द्वितीय पाठो न युक्तः।

एतदग्रे--अत्र तु भाष्ये इति, तत्र तु भाष्ये इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—एकविभक्तावेकशेष इति, एकविभक्तोवैकशेष इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

सरूपसमुदायात्तु इति ॥ ८० ।

कारिकाया द्वितीये पादे--विभक्तिर्या विधीयते इति, विभक्तिर्याऽभिधीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठोऽर्थसंगत्या युक्तः। द्वितीयपाठस्तु तदभावादयुक्तः।

अस्या एव कारिकायास्तृतीये पादे—तत्रार्थवान् इति, तत्रार्धवात् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः। द्वितीयपाठस्तु तदभावादयुक्तः। एतस्मिन्नेवपादे-सिद्धपदं सविभक्तिकं सिद्धः इति, अविभक्तिकं सिद्धेति दृश्यते। तत्र सविभक्तिकं साधु, अविभक्तिमसाधु, अपदं न प्रयुञ्जीतेति निषेधात्। एष एव निर्णयश्चतुर्थपादगते वाचकपदेऽपि।

एतत्कारिकाव्याख्याने हेलाराजीये—परस्परापेक्षावयवार्थोपपादित समुदायार्थप्रादुर्भावादिति, परस्परापेक्षापपादितसमुदायार्थप्रादुर्भावादिति, परस्पयापेक्षावयवार्थोपपादितसमुदायार्थप्रादुर्भावादिति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठोऽयुक्तः। अर्थासंगतेः एवं तृतीयपाठोऽप्ययुक्तः। अर्थासंगतेरेव।

एतदग्रे—सरूपप्रातिपदिकविषये इति, सरूपप्रातिपदिकार्थविषये इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीय पाठे तु सरूपप्रातिपदिकार्थानामर्थवत्त्वानुपपत्तिः।

एतदग्रे—अस्त्येकाविभक्तिरिति, अन्यैकाविभक्तिरिति पाठद्वयं दृश्यते तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। प्रातिपदिकार्थदरूर्पकविभक्तिरिति तृतीयपाठोऽपि दृश्यते। सचायुक्तः, शब्दाशुद्धेविर्वक्षितार्थाप्रत्ययाच्च।

एतदग्रे--ङ्याप्प्रातिपदिकादिति, ङ्याप्प्रातिपदिकार्थदरूर्पकादिति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। शब्दशुद्धेश्च। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—अन्त्यावयवविभक्त्या इति, अन्यावयवविभक्त्या इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सुबन्तः शिष्यते इति, सर्वतरः शिष्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु प्रकृतानुपयोगादयुक्तः।

एतदग्रे—विभक्तिरपि शिष्यते इति, विभक्तिरवशिष्यते इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—समुदायावयवसंनिधाने इति, समुदायावयवसंनिधानेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः। नहि समुदायावयवसंनिधानं समुदायकार्यप्रवृत्तेः प्रयोजकं लघवेन समुदाय-संनिधानस्यैव तत्प्रवृतेः प्रयोजकत्वात्।

एतदग्रे—समुदायपारतन्त्र्यादिति, समुदाये पारतन्त्र्यादिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। समुदाये कारतन्त्र्यादिति तृतीयपाठस्तु अर्था-संगत्याऽयुक्तः।

एतदग्रे—सरूपार्थ समवेत जातिसंभवादिति, सरूपार्धे समवेतजातिसंभ-वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्था-संगत्याऽयुक्तः।

एतदग्रे—तद्वाचकत्वेऽभिन्नसमुदायार्थोपपत्तिरिति, तद्वाचकत्वेभिन्न समुदार्थो-पपत्तिरिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः द्वितीयपाठेत्वर्थासंगतिः।

एतदग्रे—जातिपदार्थदर्शने इति, जातिपदार्थ पक्षे इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—न तु वहुद्रव्यावसाय इति, न तु द्रव्यावसाय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे त्वर्थासंगतिः।

एतदग्रे—उद्भूतावयवार्थभेद इति, उद्भूतावयवभेदार्थभेद इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठोऽपि युक्तः। अर्थसंगतेः। अत्रपाठे प्रथमो भेदशब्दो विशेषपरः।

एतदग्रे—समुदायोऽपेक्षितेतरेतरावयवार्थाभिधायित्वादिति, समुदायो-विवक्षितेतरेतरावयवार्थाभिधायित्वादिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थ-संगतेः। अपेक्षितेतरेतराभिधापितत्वादिति तृतीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—द्वन्द्ववचनसामर्थ्यात्तन्त्रेण इति, द्वन्द्ववचनसामर्थ्यं तन्त्रेण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्था-संगत्याचायुक्तः।

एतदग्रे—एकाविभक्तिरिति, एकविभक्तिरिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—न किञ्चिद् बाध्यते इति, न कश्चिद् बाध्यते इति पाठद्वयं दृश्यते। तत्र सामान्ये नपुसकमेव युक्तमिति आद्य पाठ एव युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—यदि वा व्यक्तिपदार्थनये इति, यद्यक्रिमपदार्थ नये इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्था संगत्याचायुक्तः।

एतदग्रे—एकशेषे जातिरिति, एकशेषो जातिरिति पाटद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, वाक्यार्थेऽन्वयसम्भवाच्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

एतदग्रे—अवश्यमुपलक्षणत्वेन इनि, अवश्यमभ्युपलक्षणत्वेन इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अभिशब्दो व्यर्थः।

एतदग्रे—तन्निबन्धना सरूपाणामिति, तन्निबन्धनात्स्वरूपाणामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तन्निबन्धानां संघटनादिति तृतीय पाठोऽपि क्वचिद् दृश्यते। स त्वर्थासंगत्याऽयुक्तः।

एतदग्रे—एकक्रियाविषयत्वेन इति, एकक्रियाणां विषयत्वेन इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु शब्दाशुद्धयाऽर्थासंगत्याचायुक्तः। अत्रैव—एकक्रियाविषयत्वेनापेक्षितसुबन्तावस्थायामिति, एक क्रियाविषयापेक्षसुबन्तावस्थायामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतदग्रे—संघटनमिति, घटनमिति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—समुदायस्यैवार्थवत्त्वादिति, समुदायस्यनार्थवत्त्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—नायं तन्त्राख्य इति, नयतन्त्राख्य इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठे तु अर्थासंगतिः।

एतदग्रे—सम्भवतीत्यतः सत्यां प्रातिपादिकसंज्ञायामिति, त्पक्षतिप्तातिपदिकसंज्ञायामिति पाठद्वयं दृश्यते। तत्राद्य पाठोयुक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—वाक्यमपि वा अप्रयोगसमवायि इति, अप्रयोग समवायि वाक्यमपि वाप्तप्रयोजकम् इति पाठद्वयं दृश्यते। तत्राद्य पाठोयुक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रातिपादिकस्यापेक्षणे इति, कार्यादिकस्यापेक्षणे इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। प्रातिपदिकस्येयत्ता एतदुपेक्षणे इति, प्रातिपदिकस्यापेक्ष्यते इति पाठद्वयमप्यत्रोपलभ्यते। तदुभयम् युक्तम् अर्थसंगतेः।

एतदग्रे—नियतक्रियाविषयसाधनभावापरिज्ञानादिति, नियतक्रियाः साधनभावापरिज्ञानादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—नावतिष्ठेत इति, नावतिष्ठन इति, नावतिच्छेत इति पाठत्रयं दृश्यते। तत्राद्यंपाठद्वयं युक्तम्, अर्थसंगतेः। तृतीय पाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—समुदायार्थोपपत्तिरिति, समुदायधर्मोपपत्तिरिति पाठद्वयं दृश्यते तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—समासविधानादिति, सनाथचेता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु प्रकृतानुपयोगादयुक्तः।

एतदग्रे—परस्परमन्वयोपपत्तिरिति, आसात्.........न्योपपत्तिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्या-चायुक्तः।

एतदग्रे—तदेवं समुदायार्थोपपतौ इति, तदेव यः समुदायार्थोपपत्तौ इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रातिपादिकसमुदायोऽर्थवत्वात् प्रातिपदिकसंज्ञक इति अर्थवत्प्राति-पदिकसमुदायोऽर्थवत्वात्प्रातिपदिकसंज्ञक इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, सार्थकपदघटितत्वात्। द्वितीय पाठे तु अर्थवत्पदं व्यर्थम्। प्रातिपदिकत्वेनैवार्थ वत्त्वलाभात्। क्वचित्तु—समुदायोऽर्थवत्त्वात्प्रातिपदिकसंज्ञक इति पाठः, स तु न युक्तः, समुदायेऽवयवाकांक्षाया अनिवृत्तेः।

एतदग्रे—सुबन्तसमुदायस्यवाक्यस्यैव प्रातिपदिकसंज्ञानिवार्यते इत्येक विभक्ताविति, सुबन्तसमुदायस्येत्यारभ्य निवार्यते इत्येकविभक्तावित्येतदनन्तरं क्वचित्—दायो इति क्वचित् समुदाय इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तृतीयपाठश्चायुक्तौ। दायसमुदायपदयोर्वैयर्थ्यात्। अत्रैव-वाक्यस्यैव.. .... ..इत्येकविभक्ताविति चतुर्थपाठोऽपि क्वचिद्दृश्यते। स तु तु न युक्तः विवक्षितार्थाबोधकत्वात्।

एतदग्रे—प्रातिपदिकैकशेषः समर्थित इति, तदेवं.......प्रातिपदिकैकशेषः समर्थित इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु तदेवमिति विन्दवश्चव्यर्थानि।

प्रत्ययस्यप्रधानस्येति ॥ ६१ ।

कारिकायास्तृतीयेपादे—सिद्धः संख्याविवक्षायामिति, सिद्धः संख्याविव-क्षाया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्था-संगत्याऽयुक्तः। नहि संख्या विवक्षाया अनुग्रहः किन्तु प्रधानस्येति हेलाराजीय-दर्शनतोऽवसायात्।

अस्या एव कारिकायाश्चतुर्थे पादे--गुणे इति, ग्रहे इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः हेलाराजेन तस्यैव व्याख्यातत्वात्। द्वितीयपाठस्तु प्रकृतानुपयोगादयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—संख्यायां गुणे इति, गुणे संख्यायामिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अनेक ग्रहणात् इति, अनेक ग्रहणानुग्रहात् इति पाठद्वयं दृश्यते तदुभयं साधु अर्थसंगतेः।

एतदग्रे—अवयवतत्पुरुषाश्रयेण इति, अवयव एव तत्पुरुषाश्रयेण इति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः। एतदनन्तरं तु शब्दपाठः क्वचिद् दृश्यते, क्वचिन्न। तदुभयं साधुः अर्थसंगतेः।

एतदग्रे बहूनामव्यवस्थितत्वान्नियमेन इति, बहूनामस्यितानां नियमेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या-शब्दाशुद्धचा चायुक्तः।

एतदग्रे—न समास इति, समासो न इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे क्रृतः स्यादिति, क्वतः स्यादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगते·। द्वितीय पाठस्तु अर्थासंगत्या शब्दशुद्धचा चायुक्तः।

एतदग्रे द्विगुविधानाच्चेति, द्विगुणविधानाच्चेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सुसूक्ष्मजटकेशादाविति, सुसूक्ष्मं जटकेशादाविति, ससूक्ष्मजटके शादाविति, सुसूक्ष्मजटकेशेनेत्यादाविति पाठचतुष्टयं दृश्यते। तत्राद्यचतुर्थपाठौ युक्तौ, अर्थसंगतेः। द्वितीय-तृतीय पाठौ तु अर्थासंगत्याऽयुक्तौ।

एतदग्रे - सह द्वन्द्व इति, सह द्वन्द्वे इति पाठद्वयं इति दृश्यते। तत्राद्यपाठो युक्तः, :अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—संख्या जातिरित्युक्त्वा इति, संख्या जातिरित्युक्तम् इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु यद्यपि शुद्ध एव तथापि तत्र वाक्यभेदो दोषः।

अत्रैव-संख्याजातिरित्युक्त्वा तत्प्रसंगेन इति, संख्या जातिरित्युक्तम् त्वात संगेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दा-शुद्धचाऽर्थासंगत्या चायुक्तः।

एतदग्रे - विचार्य इदानीमिति, विचार्यदानीमिति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धचाऽयुक्तः।

अभेदरूपंसादृश्यमिति ।। ८२ ।

कारिकायाः प्रथमेपादे—अभेदरूपं सादृश्यमिति, अभेदरूप सादृश्यमिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

द्वितीयपादे—शक्तय इति, शक्रयः इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—इयमत्र इति, इयत्यत्रेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अन्वयविज्ञानोन्नीयमानसद्भावा इति, अन्वयीविज्ञानोन्नीयमानसद्भावा इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—व्यक्तिभ्योव्यतिरेकेण इति, व्यक्तिभ्योऽव्यतिरेकेण इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—आत्मानं नो दर्शयति इति, आत्मन दशनो दर्शयति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

एतदग्रे—एक प्रत्यवमर्शजननसामर्थ्यादिति, एक प्रत्यवमर्श जनने सामर्थ्यादिति पाठद्वयं दृश्यते तदुभयं साधु, अर्थसंगतेः। अत्रैव—एक प्रत्यमर्श जननसामर्थ्यादध्यासाद्वा सन्तु इति, एक प्रत्यवमर्शजननसामर्थ्याद्वा सन्तु इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु विकल्पानुपपत्याऽयुक्तः।

अत्रैव—यत्सादृश्यमिति, तत्सादृश्यमिति पाठद्वयंदृश्यते। तत्राद्यपाठो युक्तः, अग्रे—तदपि जातिरिति तत्पदेन प्रत्यवमर्शात्। अतएव द्वितीयपाठो नयुक्तः।

एतदग्रे—एक प्रत्यवमर्शजनकं वा व्यतिरिक्तमेव इति, एक प्रत्यवमर्श जनकं वाच्यव्यतिरिक्तमेव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीय पाठोऽपि अर्थासंगत्याऽयुक्तः।

एतदग्रे—एव। अन्विताकारज्ञानजनकमिति, एवमन्विताकारजनक ज्ञानमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सर्वपार्षदो न्याय इति, सर्वपार्षदन्याय इति पाठद्वयं दृश्यते तदुभयं साधु अर्थसंगतेः। एतदनन्तरम्—भेदः, एवमंप्रतीतेः। नाप्यात्मनामभेदः, तथाप्य प्रतीतेः। के ……भेद शब्दाभ्यामभिधीयते तदा शब्दसार इयमात्रादविवक्षित भेदरन्याध्यारोपेण परैर्विरोधोनिर्विषय एवापद्यते। तत्र यदाभेदान् परित्यज्य भेदरूप विवक्षया इति पाठः संयातायातः प्रकृते अनुपयुक्तोऽशुद्धश्च।

एतदग्रे—न काचिदनुपपत्तिरिति, त इदं न काचिदनुपपत्तिरिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः। अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—व्यतिरेकाव्यतिरेकचिन्ता तु इति, व्यतिरेकाव्यतिरेकचित्ता तु इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—ग्रह एव इति, ग्रहण एवेति पाठद्वयं दृश्यते। तदुभयम् युक्तम् अर्थासंगतेः। गृह एवेति पाठस्तु युक्तः।

दण्डोपादित्सयादण्ड मिति ॥ ८३ ॥

कारिकाया द्वितीये पादे—प्रतिपद्यते इति,प्रतिपत्तये इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठे तु दण्डमित्यस्य कर्मत्वासंगतिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्या एव कारिकायाश्चतुर्थे पादे—प्रतीयते इति, प्रतियते इति, पाठद्वयं वर्तते। तत्राद्य पाठेऽर्थसंगतिरिति स युक्त। द्वितीय पाठे तु अर्थासंगतिः छन्दोभङ्गश्च।

नेच्छानिमित्तादिच्छावानिति ॥ ९४।

कारिकायाः प्रथमे पादे—नेच्छानिमित्तादिच्छावानिति, तत्रानिमित्तादिच्छावानिति पाठद्वयं वर्तते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्त। एतस्या एव कारिकायाश्चतुर्थे पादे—बुद्धिरर्थान्तराश्रया इति, बुद्धिरर्थानराश्रया इति पाठद्वयं वर्तते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

तत्रैतत् कारिकाद्वयव्याख्याने हेलाराजीये—इहानुगताकारे इति, यक्ष अनुगताकारे इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—व्यक्तीनां व्यावृत्ताकाराणामिति, व्यक्तीनाँ वृत्ताकाराणामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः। व्यक्तीनां त्यक्त व्यतिकराणामिति तृतीयपाठोऽपि क्वचिद्दृश्यते। स तु कथञ्चिद् युज्यते। तथाहि व्यतिकरः संभेदः। मिश्रणम्—अभेदः इति यावत्। व्यतिकर शब्दश्च प्रयुक्तः संभेदे कालिदासेन रघुवंशे। तीर्थेतोयव्यतिकरभवेजह्नुकन्या सरखोरिति। तथा च त्यक्तव्यतिकराणाम् त्यक्ताभेदानाम् भिन्नानामिति फलितोऽर्थः।

एतदग्रे—तद्वदनुयायिनी इति, तद्वदनुपायिनी इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। तदंमेर्शनानुयायिनी इति तृतीय पाठोऽपि क्वचिद्दृश्यते। स तु अर्थासंगत्या शब्दाशुद्धयाचायुक्तः।

एतदग्रे—व्यतिरिक्ता जातिरिति, व्यतिरिक्ता इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थान्तरानाकाङ्क्षत्वात्। द्वितीयपाठस्तु विशेष्यसाकाङ्क्षत्वादयुक्तः।

एतदग्रे—अभ्युपगन्तव्या इति, अभ्युपगन्तव्यमिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, जातेर्विशेष्यत्वेन तल्लिंगस्यैवौचित्यात्। अत एव द्वितीय पाठो न युक्तः।

एतदग्रे—कथमनवयवेन इति, कथमनवयवा इति, कथमवभवेन इति पाठत्रयं दृश्यते। तत्र द्वितीय पाठो युक्तः, जातिलिङ्गत्वस्यैवौचित्यात्। प्रथमपाठे तु अनवयवत्वेन इति पाठः समुचितः। तृतीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—व्यक्ति नानुयायादिति, व्यक्तीरनुयायादिति, व्यक्तीर्नानुमायादिति, व्यक्तीर्नानुयातमिति पाठचतुष्टयं दृश्यते। तत्र द्वितीयपाठो युक्तः, अर्थसंगतेः। इतरत् पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—किमत्र निमित्तमिति, किमत्र न जातित्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या निरस्तः।

एतदग्रे—अवयवसन्निवेशो गवामिति, अवयवसन्निवेशो गृस्याद्वा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठे तु शब्दाशुद्धिरर्थासंगतिश्च।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—अन्यस्त्वश्वानामिति, अन्योत्वश्वानामिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः शब्दशुद्धेश्च द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—गोत्वाश्वत्वयोरिति. गोश्वात्वात्वयोरिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः शब्दाशुद्धिश्च।

एतदग्रे--तर्हि विशिष्टात् सन्निवेशादिति, तर्हि विशिष्टात्......पर्याया-दिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थस्या-स्फुटत्वेनायुक्तः।

एतदग्रे—पर्यायात् प्रतिनियमेन इति, प्रत्यया प्रतिनियमेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अनुगताकार प्रत्ययोऽस्तु इति, अनुगताकारः प्रत्ययोऽस्तु इति पाठद्वयं दृश्यते. तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—यथा ह्यवयवसंनिवेश इति, तथा सावयवसन्निवेश इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासगत्याऽयुक्तः।

एतदग्रे—प्रतिव्यक्तिभिन्नोऽपि इति, प्रतिव्यक्तिभिन्नेऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अवयवसन्निवेशस्य विशेषणत्वात्। अतएव द्वितीय पाठो न युक्तः।

एतदग्रे—सामान्यस्याभिन्नस्येति, सामान्यापि भिन्नस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठे त्वर्थासंगतिः।

एतदग्रे—तीत्यन्यसंसर्गक्तानां सा, इति पाठः संपातायातः प्रकृतानुपयोगा-दुपेक्ष्यः।

एतदग्रे—इत्यलमन्तर्गडुना इति, अलमन्तर्गडुना इति पाठद्वयं दृश्यते। तत्राद्य-पाठे इतिशब्दः सार्थकः, पूर्व वाक्यार्थस्योत्तरवाक्यार्थे हेतुत्वबोधकः। अतएव द्वितीय पाठो न युक्तः।

एतदग्रे—न सर्वो जनकः सर्वत्र इति, सर्वो जनको न सर्वत्र इति पाठद्वयं दृश्यते। तदुभयं युक्तम्। यत्र कुत्रापि स्थितेन नञा जकत्वस्य निषेधसम्भवात्।

एतदग्रे—दण्डसम्बन्धो निमित्तमिति, दण्डशब्दो निमित्तमिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, निमित्त शब्दस्य प्रवृत्तिनिमित्त परत्वात्। द्वितीय-पाठस्तु न युक्त, दण्डशब्दस्य अर्थबोधे निमित्तत्वात्।

एतदग्रे—तस्या निमित्तं भण्यते इति, तस्य निमित्तं द्रायते इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, शब्दाशुद्धेः अर्था-संगतेश्च।

एतदग्रे—न चैतदत्र वक्तुं शक्यते इति, न चैतद् वक्तुं शक्यते इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः। अत्रेति पदं विनाऽपि तदर्थस्य प्रकरणप्राप्त-त्वात्। एतदत्र वक्तुं न शक्यते इत्यपि पाठो युक्त एव। अर्थसंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—दण्डसम्बन्धं प्रति इति, दण्डसम्बन्ध प्रति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे - तथोपादित्सा इति, दण्डोपादित्सा इति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्तः, अर्थासंगतेः। द्वितीयपाठस्तु अर्थसंगत्यायुक्तः।

एतदग्रे—यत्र कार्ये इति, यत्र कार्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। इतः पूर्वम् निमित्तमित्युक्ते··· तदुपादित्सामिति पाठो दृश्यते। स तु विवक्षितार्थानवबोधकत्वादयुक्तः। यत्र् कार्ये विनियोग इत्यतः परम् ····तत्र सामर्थ्यादिदर्शनमिति, तत्र सामर्थ्यदर्शनमिति पाठद्वयं दृश्यते तदुभयं साधु, अर्थसंगतेः।

एतदग्रे—तदुपादित्सानिमित्तं वक्तव्यमिति, तदुपादित्सानिमित्तमिति वक्तव्यमिति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसंगतेः।

एतदग्रे- तथा च तत एवेति, ततश्च तत इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु शब्दाशुद्ध्याऽर्थासंगत्याचायुक्तः।

एतदग्रे—इच्छानिनिमित्ताद् दण्डोपादित्सावानिति, इच्छानिमित्तो दण्डोपादित्सावानिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—इत्यस्तु प्रत्यय इति, इत्येवास्तु प्रत्यय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे एवकारो व्यर्थः।

एतदग्रे—स्वात्मनिमित्तमिति, स्वात्मनिमित्तमिति पाठद्वयं दृश्यते। तदुभयं साधु अर्थसंगतेः।

एतदग्रे—नैतच्छक्यतेऽभिधातुमिति, नैतच्छक्यते वक्तुमिति पाठद्वयं दृश्यते। तदुभयं साधु, एकार्थत्वात्।

एतदग्रे—अनुरूपं कार्यमिति, अनुरूपं हि कार्यमिति पाठद्वयं दृश्यते। तदुभयं युक्तम् अर्थसंगतेः।

एतदग्रे—इच्छावानिति ज्ञानम्, न दण्डी इति इति, इच्छावानिति ज्ञानम् दण्डी इति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विषय नियम सामर्थ्ये सत्यपि न तस्मादेवेति, सामर्थ्ये सत्यपि न तस्मादेवेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु सामर्थ्य प्रतियोगिनोऽनिर्देशादयुक्तः।

एतदग्रे—तत्सदृशमित्यादिज्ञानादिति, ततः सदृश इत्यादि ज्ञानादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगते। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। अत्र पाठे हि सादृश्यप्रतियोगिनो निर्देशो नास्ति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—व्यतिरिक्तमिति, व्यक्ति व्यतिरिक्तमिति पाठद्वयं दृश्यते। तत्राद्य· पाठो युक्तः, सादृश्यव्यतिरेकस्य विवक्षितत्वात्। द्वितीय पाठे तु विरुद्धार्थ प्रतीतिः।

स्वभावोऽव्यपदेश्यो वा ।। ८५ ।

इति कारिकायाः प्रथमे पादे—स्वभावोऽव्यपदेश्यो वा इति, स्वभावव्यपदेश्यो वा इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। हेलाराजेन चायमेव पाठो व्याख्यातः। द्वितीय पाठश्च न युक्तः। अर्थासंगतेः। स्वभावोऽव्यपदेशो वा इति पाठोऽपि क्वचिद् दृश्यते। स तु युक्तः, अर्थसंगतेः। अस्या एव कारिकाया द्वितीये पादे—वावतिष्ठते इति, वावतिष्ठतो इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः शब्दशुद्धेः। द्वितीय पाठस्तु तदभावादयुक्तः।

एतत्कारिकाव्याख्यानेहेलाराजीये--प्रतिनियतकारणानभ्युपगमे इति, प्रतिनियतकारणानभ्युपगमो इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—कारणकारणादेव इति, कारणादेवेति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्त अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे--तत्रापि तत्कारणादिति, तत्रापि तत्कारणात् तत्रापि तत्कारणादिति पाठद्वयं दृश्यते। तदुभयं युक्तम् अर्थसंगतेः।

एतदग्रे—सर्वान्ते इति, सर्वत्रान्ते इति पाठद्वयं दृश्यते। तदुभयं युक्तम् अर्थसंगतेः। अत्रैव—सर्वान्ते मूलकारणे इति, सर्वान्ततया मूलकारणे इति पाठद्वयं दृश्यते। तत्राद्य पाठोऽर्थसंगत्यायुक्तः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—सर्वस्य वस्तुनः, सर्वस्य वादिनः इति, सर्वस्य वस्तुनः सर्वस्य वादिनो वा इति पाठद्वयं दृश्यते। तत्र वाशब्दघटितः पाठो युक्तः। विकल्पार्थस्यात्रौचित्यात्।

एतदग्रे येषांत्वनित्यमिति, येषाञ्चनित्यमिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः। नित्यं कारणमिति पक्षस्यपूर्वमुक्तत्वात्।

एतदग्रे—सामर्थ्यमव्यपदेश्यमेवइति, सामर्थ्यंव्यपदेश्यमेवेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अव्यपदेश्यतत्रस्यैव निरुप्यत्वात्।

एतदग्रे—अथवा नित्यकारणपरिग्रह एवेति, अथानित्यकारणपरिग्रह एवेति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। तथाहि—अत्राथशब्दः पक्षान्तरोपन्यासे। पक्षान्तरञ्चात्र नित्यकारणपक्षएव।

एतदग्रे· स्वभावो व्यपदेश्य इत्यत्र अव्यपदेश्य इति पदच्छेद एव युक्तः। स्वभावस्य तथात्वात्। इतः पूर्वम्-वैलक्षण्येन इदं तदितिशब्देन इति, येवेदं तदिति शब्देन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः।

एतदग्रे—स्वभावशब्देन सामर्थ्यशब्देन च इति, सामर्थ्यशब्देन च इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः समुच्चयार्थकचशब्ददर्शनात्। द्वितीय पाठस्तु समुच्चयानुपपत्या अयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सा नवतिष्ठते, तदपि सामर्थ्यमप्यस्य परोक्षत्वादेवाव्यपदेश्यं व्यवहरन्ति इति पाठो दृश्यते। सतु संपातायातोऽसंगतार्थकश्चेति हेयः।

एतदग्रे—एवमव्यपदेश्यस्वभावेऽवस्थानात् इति, एवमव्यपदेश्ये स्वभावेऽवस्थानादिति, एवमव्यपदेशभ्यावेनावस्याभावादिति पाठत्रयं दृश्यते। तत्राद्यं पाठद्वयं युक्तम्। अर्थसंगतेः। तृतीयपाठस्तु अर्थासंगत्या शब्दाशुद्धया चाऽयुक्तः।

एतदग्रे—न प्रकल्पते इति, न कल्पते इति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—वाक्ये इति, एकवाक्ये इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः एकपदस्य व्यर्थत्वात्। अत्रैव-वाक्ये यथानुयातेति, वाक्ये यथानुपातेति, वाक्यथानुयातेति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्या शब्दाशुद्धया चायुक्तम्।

एतदग्रे—आनय इति, चानयेति पाठद्वयं दृश्यते। तत्र चकारपाठो व्यर्थः।

एतदग्रे—भुङ्क्ष्वचेत्येवमिति, भुङ्क्ष्वैव तदैव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्यायुक्तः।

एतदग्रे—इत्ययुक्तमव्यवहार्यमिति, इत्युक्तंव्यवहार्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। इत्युक्तमव्यवहार्यमिति तृतीयपाठोऽपि क्वचिद् दृश्यते। स तु न युक्तः। अर्थसंगतेः।

एतदग्रे—तदेवमभिन्नव्यवहारनिबन्धनानि इति, तदेवं भिन्नव्यवहारनिबन्धनानि इति पाठद्वयं दृश्यतेः। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे - सदृश इति व्यवहार इति, सदृश इति प्रत्यय इति पाठद्वयं दृश्यते। तदुभयं युक्तम्। अर्थसंगतेः।

एतदग्रे—अन्यच्च सादृश्यज्ञानमिति, अन्यस्य सादृश्यज्ञानमिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सामान्यज्ञानादिति, सामान्यं ज्ञानादिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—गोगवयादिषुभावादिति, गोगवयादिष्वभावादिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्त, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अथ नावधार्यन्ते विवेकेन इति, अथ नावधार्यविवेकेन इति, पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः। अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः शब्दाशुद्धिश्च।

एतदग्रे—जातय इति, जायत इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्त अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थासंगत्या चायुक्तः।

एतदग्रे—उच्यते-तत्रेति, उच्यतष्वितत्रेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु तदुभयाभावः। अत्रैव—तत्ररूपि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समवायादिति, अत्ररूपिसमवायादिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः तदर्थस्यविप्रकृष्टत्वात्।

एतदग्रे - कार्यकल्प्यत्वमुच्यते इति, कार्यकल्पत्वमुच्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे - ज्ञानं नान्यकार्यमिति ज्ञानं नामकार्यमिति पाठद्वयं दृश्यते। तत्राद्यपाठो न युक्त अर्थासंगतेः। द्वितीयपाठस्तु युक्तः, अर्थसंगतेः।

एतदग्रे—चक्षुरादिवदधिपतिप्रत्ययरूपमिति, चक्षुरादिवदवधिमत्ति प्रत्ययरूपमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे तदेवायातं संवेद्यते इति, संवेद्य तदेवायातमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सामान्यं विषय इति, सामान्यविषय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु समासे उद्देश्यविधेयभावा प्रतीत्या अयुक्तः।

एतदग्रे - तस्यसत्त्यविकल्पत्वमिति, तस्य विकल्पत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु विकल्पसम्बन्धिनोऽनिर्देशादयुक्त इति। इतः पूर्वम्—असति सामान्ये इति, असति स मन्ये इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—असत्यविषयत्वाच्चेति, सत्यविषयत्वाच्चेति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—प्रतिकर्मव्यवस्थायामिति, प्रकृतिकर्मव्यवस्थायामिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः।

एतदग्रे— नीलं प्रत्यक्षमिति, नीलं प्रत्यक्षया इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, अर्थसंगतेः। द्वितीय पाठे तु—या इत्यधिकं व्यर्थश्च।

एतदग्रे—सामान्यमीदृशमेवाप्रत्यक्षमिति, सामान्यमेवाप्रत्यक्षमिति पाठद्वयं दृश्यते। अत्र ईदृशपदमावश्यकम्। दार्ष्टान्तिकत्वात्।

एतदग्रे एकार्थकारित्वाच्च भिन्नःप्रत्यय इति, एकार्थकारित्वाच्चभिन्न इति पाठद्वयं दृश्यते। अत्र प्रत्ययपदमावश्यकम्। अन्यथाभेदाधिनाप्रसिद्धिः।

एतदग्रे—असति सामान्येनोदियात् इति, असति समासे नोदियादिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः। अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्याऽयुक्तः। नहि समास एकप्रत्यवमर्शस्य प्रयोजक इति।

एतदग्रे द्रव्यानभ्युपगमादिति, द्रव्याभ्युपगमादिति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—रूपादिसमुदायसाध्यमेकमिति, रूपादिसमुदायसाध्यमेकस्मिनृति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगतेरयुक्तः। एतदग्रे—समुदायबुद्धिभवन्नैकवुद्धिरिति समुदाय बुद्धिर्भवेन्नैकत्वबुद्धिरिति पाठद्वयं दृश्यते। तदुभयं युक्तम्। अर्थसंगतेः।

एतदग्रे--मिथ्यारूप संविच्चैकबुद्धिरिति, भवेत्⋯⋯संविच्चैक बुद्धिरिति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो न युक्तः, विवक्षितार्थाप्रत्यायकत्वात्। क्वचित् सम्यक् सम्वेदनमूलत्वादिति, क्वचित् क्वचित्सम्वेदनमूलत्वादिति पाठद्वयं दृश्यते। तत्र द्वितीयपाठे क्वचित् पदस्य द्विरुक्तिर्नयुक्ता व्यर्थत्वात्।

यदा भेदान् परित्यज्य ॥ ८६ ।

इति कारिकाया अवतरणिकायां हेलाराजीये सांख्यनयेन इति, सांख्य दर्शनेन इति पाठद्वयं दृश्यते। तदुभयं युक्तम् अर्थसंगतेः। शब्दालंकारानुरोधेन तु आद्यपाठ एव युक्तः। अस्या एव कारिकायाः प्रथमे पादे--यदा इति, यथा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अग्रे तृतीय पादे तथा इति दर्शनात्।

अस्या एव कारिकाया द्वितीये पादे—बुद्ध्यैक इव इति, बुधैक इव इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु विवक्षितार्थाप्रत्यायकत्वादयुक्त। बोद्धव्य इवेति तृतीयपाठोऽपि क्वचिद् दृश्यते। एष पाठो न युक्तः प्रकृतानुपयोगात्।

तृतीयेपादे—व्यक्त्यात्मैव तदातत्रेति व्यक्त्यात्मैव प्रदा तत्रः इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः, शब्दशुद्धेश्च। द्वितीय पाठस्तुतदुभयाभावादयुक्तः।

एतत्कारिकाव्याख्यानेहेलाराजीये—इहैकरूपसमन्वयादिति, इहैकत्र रूप समन्वयादितिपाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—असदनुत्पत्तेश्चेति, असदुत्पत्तेश्चेति, न सदुत्पत्तेश्चेति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयमर्थासंगत्याऽयुक्तम्।

एतदग्रे—कार्यकारणयोरभेद इति, कायकारणयोरभेद इदि पाठद्वयं दृश्यते। तत्र द्वितीय पाठो न युक्तः, अर्थासंगतेः। अत्रैव अभेद इति, भेददनि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु अर्थासंगत्या शब्दाशुद्ध्याचायुक्तः।

एतदग्रे—किञ्चिद्भेदाभेदात्मकमिति, किञ्चिद्भेदात्मकमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—सर्वाभेद इति, सर्वात्मभेद इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तथापरिणाम इति, तथैव परिणाम इति, यस्य परिणाम इति पाठत्रयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे एव पदस्य वैयर्थ्यम्। तृतीयपाठोऽप्ययुक्तः अर्थासंगतेः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—न ततोऽतिरिच्यन्ते इति, ततोऽतिरिच्यन्ते इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽनुपादेयः।

एतदग्रे—सर्वं ह्येकस्यैव इति, सर्वं वात्मकस्यैव इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विवर्त इति, विवर्तते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठे तु———एकस्यैवेति पदार्थस्य कथं कर्तृत्वनिर्वाहः।

एतदग्रे—एवञ्च कृत्वा इति, एवञ्चकत्वा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

एतदग्रे—एवमप्रतीतेः नाप्यत्यन्तमभेद इति, एवमप्यतीतेनाप्यत्यन्तमभेद इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तथाप्यप्रतीतेरिति तथाह्यप्रतीतेरिति पाठद्वय दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः द्वितीयपाठस्तु तु अर्थासंगत्याऽयुक्तः।

एतदग्रे— स्वसंविज्ञानपदाभावादगत्या इति, स्वसंविज्ञानमर्थानवगत्या इति स्वसंविज्ञानवयदानवगत्या इति, स्वसंविज्ञानपदानवगत्याइति पाठचतुष्टयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठत्रयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—भेदाभेदशब्दाभ्यां यदाऽभिधीयते इति, भेदाभेदशब्देन साऽभि-धीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु-अर्थासंगत्याऽयुक्तः।

एतदग्रे—भेदान् परित्यज्य इति, भेदान्परित्यज्यन्ते इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—भेदाभेदरूपाविवक्षयेति, भेदरूपाविवक्षयेति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—व्यक्तेरात्मैव इति, व्यक्तेरात्मैव च इति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे चशब्दो व्यर्थः।

एतदग्रे—तदेव सामान्यमेकबुद्धिविषय इति, तदेव एकबुद्धिविषय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तत्पदार्था-प्रतीत्याऽयुक्तः।

एतदग्रे—अविरुद्धमिति, अविरुद्ध इति पाठद्वयं दृश्यते। तत्रोद्देश्यबोधक-स्यैकत्वपदस्यनियतनपुंसकत्वात् विधेयबोधकेविरुद्धपदे नपुंसकत्वमेवोचितम्।

एतदग्रे—विकाराणामनर्थान्तरभूतानमिति, विकाराणामवान्तरभूताना-मिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः प्रकृतार्थसंगतेः। द्वितीयपाठस्तु तद-संगत्याऽयुक्तः।

एतदग्रे—सांव्यवहारिकमिति, संव्याहवाग्किमिति पाठद्वयं दृश्यते। तत्राद्य-पाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठस्तु तदुभयाभावादयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—विजातीयभेदापेक्षायामिति, विजातीयमनभेदापेक्षायामिति विजातीयभेदापेक्षया इति पाठत्रयं दृश्यते। तत्र प्रथमतृतीयपाठौ युक्तौ, अर्थसंगतेः। द्वितीय पाठस्तु नञ्द्वयपाठस्य निष्फलत्वादयुक्तः।

एतदग्रे—अर्थान्तराद्भेदापेक्षायामिति, अर्थान्तराद्भेदाभेदापेक्षायामिति पाठद्वयं दृश्यतेः। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठेत्वर्थासंगतिः। स्वसदृशाभेदापेक्षण इत्यनेन सहविरोधश्च।

भेदरूपैरनुस्यूतमिति ॥ ८७ ।

कारिकाया अवतरणिकायां हेलाराजीये—भिन्नाकाराया जातिबुद्धेर्विषयमिति, भिन्नाकारजातिबुद्धिविषयमिति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः। भिन्नाकारबुद्धिविषयमिति तृतीय पाठोऽपि दृश्यते। स तु न युक्तः, भिन्नाकारबुद्धेर्जातीतरविषयाया अपि दर्शनात्। एतत्कारिकायास्तृतीयेपादे समूहावग्रहाइति, समुहावग्रहाइति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः अर्थसंगतेः। द्वितीयपाठे तु शब्दशुद्धिः।

अत्रैव पादे—समूहावग्रहा बुद्धिरिति, समूहावग्रहाबुद्धरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिः।

एतत्कारिकाव्याख्याने हेलाराजीये—भेदरुपाण्यपि इति, भेदरूपादायपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु शब्दाशुद्धिरर्थासंगतिश्च!

एतदग्रे—संचेत्यन्ते इति, सदाय वेद्यन्ते इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या शब्दाशुद्ध्याचायुक्तः।

एतदग्रे—समूहमवगृह्णाति इति, समूहमवगृह्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीयपाठे तु शब्दाशुद्धिः।

एतदग्रे—परिच्छिनत्ति या इति, परिच्छिन्नेति या इति, परिच्छिन्नक्रिया इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। इतरत्पाठद्वयन्तु अर्थासंगत्याऽयुक्तम्।

एतदग्रे—सा प्रवर्तते इति, संप्रवर्तते इति, प्रवर्तयेते इति पाठत्रयं दृश्यते तत्राद्य पाठो युक्तः। या इति पूर्वमुद्देश्यनिर्देशात्। द्वितीय पाठे तु विधेयापरामर्शो दोषः। तृतीयपाठस्तु वाक्यार्थेऽनन्वयादयुक्तः।

:एतदग्रे—एकमिव इति, एकमेव इति पाठद्वयं दृश्यते। तत्राद्यपाठोयुक्तः कारिकायां तथा दर्शनात्। हेलाराजीयव्याख्यानुरोधाच्च, तत्र हि एकत्वस्याध्यारोपो व्याख्यातः। नतु एकत्वम् वास्तवम् इति।

एतदग्रे—इति दर्शनम् इति, इति निदर्शनमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। दर्शनशब्दस्य पक्षपरत्वात्। द्वितीयपाठस्तु न युक्तः, अर्थासंगतेः। निदर्शनशब्दस्य दृष्टान्तपरत्वात्।

एतदग्रे—एक धर्मावेशनिमित्तभेदोपसर्जनतया इति, एक धर्मावेगनिमित्ताभेदोपसर्जनतया इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः द्वितीय

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पाठस्तु अर्थासंगत्याऽयुक्तः। एक धर्मविशनिमित्तभेदोपसर्जनतया इति तृतीय पाठोऽप्यत्र क्वचिद् दृश्यते। सोऽप्यर्थासंगत्यायुक्तः। निमित्तभेदे एकधर्मविशासंभवात्। भेदरूपैरनुस्यूतमित्येतत्कारिकानन्तरम्— सकृत्प्रवृत्तावेकत्वम् इति कारिकातः प्राक् कारिकाद्वयं दृश्यते —

तदा सह विवेःायामेकबुद्धिनिबन्धनम्।
वध्वाऽवयवविच्छेद समुदायोऽभिधीयते॥
प्रतिक्रियं समाप्तत्वादेकोभेदसमन्वितः।
द्वन्द्वे द्विप्तादि भेदेन तदावत्त्वेन गम्यते इति।

तत्र कारिकाद्वयस्यैवं पाठशुद्धिः —

तदासहविवक्षायामेकबुद्धिनिबन्धनम्।
बद्धावयव विच्छेद समुदायोऽभिधीयते।
प्रति.क्रियं समाप्तत्वादेकोभेदसमन्वितः।
द्वन्द्वे द्वित्वादिभेदेन तदा द्वित्वेन गम्यते। इति

अत्र कारिकाद्वयस्यायं संक्षिप्तोऽर्थः। यदा घटपटमिति समाहारद्वन्दश्चिकीर्षितस्तदा सह विवक्षायाम्—

बद्धः प्रतिवद्धोऽत्रयव विच्छेदोऽवयवविभागो यस्मिन् स तथाभूतः समुदायः— एकविषयाबुद्धिरेक बुद्धिः- एकत्व बुद्धिरिति यावत्। सा निवन्धनं निमित्तं यस्मिन्नभिधाने तद्यथा भवति तथाऽभिधीयते इति आद्यकारिकायाः पदयोजना। यदा तु धवखादिरावििति इतरेतरयोगश्चिकीर्षितस्तदा धवखदिरौद्दिनत्तीत्यत्र द्वन्द्वे धवं छिनत्ति खदिरं छिनत्तीत्यत्र प्रतिक्रियं समाप्तत्वाद्—अन्वयस्य समाप्तेः— एकोऽपि धवखदिरसमुदायः समासार्थः—भेदसमन्वितः। अवयवभेदेन प्रतीयमानः इतरेतरयोगद्वन्द्वे द्वित्वादिभेदेन हेतुनातदाद्वित्वेन गम्यते इति द्वितीयकारिकायाः पदयोजना।

सकृत्प्रवृत्तावेकत्वमिति॥ ८८।

कारिकायाः द्वितीयेपादे—सदृशात्मतामिति सदृशात्मनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

अस्या एव कारिकायास्तृतीयेपादे— भिन्नात्मिकानामिति, भिन्नात्मनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेः। द्वितीयपाठस्तु शब्दाशुद्धयाऽयुक्तः।

अस्या एव कारिकायाश्चतुर्थेपादे--प्रपद्यते इति, प्रवर्तते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। व्याख्यातश्च स एव हेलाराजेन। द्वितीय पाठे तु—आवृत्तौ सदृशात्मतामित्यनेन सहान्वयासम्भवः।

एतत्कारिकाव्याख्याने हेलाराजीये—भेदहेतूनामिति, भेदवतां हेतूनामिति, हेतून्यं त्यागे इति, हेतून्यं बुद्धिरूक्त्वा इति पाठचतुष्टयं दृश्यते। तत्राद्यपाठोयुक्तः, अर्थसंगतेः। इतरत्पाठत्रयं तु अर्थासंगत्याऽयुक्तम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सामान्यबुद्धिरित्युक्त्वा इति, सामान्य बुद्धिरित्युक्तमिति, सामान्य बुद्धिरित्युक्ता इति पाठत्रयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीय पाठे तु वाक्यभेदो दोषः तृतीय पाठस्तुवचन कर्मणोनिर्देशादयुक्त।

एतदग्रे—निर्विषया सादृश्यबुद्धिरिति, निर्विषय सादृश्य बुद्धिरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु समासे उद्देश्यविधेय भावाप्रतीत्याऽयुक्तः।

एतदग्रे—वैकत्वम् इति, चैकत्वमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु समुच्चयार्थासंगत्याऽयुक्तः।

एतदग्रे—सदृशात्मतामिति, सदृशात्मनामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। व्याख्यातश्चैष एव हेलाराजेन। द्वितीय पाठे तु अर्थासंगतिः।

एतदग्रे—भेदहेतुपरित्यागेन इति, भेदहेतुत्यागेन इति पाठद्वयं दृश्यते। तदुभयं युक्तम् अर्थसंगतेः।

एतदग्रे अभिन्नात्मिका व्यक्तीरवगृह्य इति, भिन्नात्मकार्थव्यक्तिरेव गृह्य इति पाठद्वय दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे कार्यान्तरविषयतयेति, कार्यान्तरविविषयतयेति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठे विपदमधिकम्।

एतदग्रे—अभेदावसायरूपत्वादिति, भेदावसायरूपत्वादिति पाठद्वयं दृश्यते तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। नहि जातिबुद्धिर्भेदावसायरूपेति।

एतदग्रे—भेदापोहान्नान्या इति, भेदापोहात्तान्यां इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु शब्दाशुद्ध्याऽयुक्तः।

एतदग्रे—भेदाभेदावग्रहरूपत्वान्नेयमिति, भेदाभेदावग्रहरूपत्वन्निद्यं इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थानवगत्याचायुक्तः।

एतदग्रे—गृह्णाती ··· एकान्तेनाभेदावसायरूपत्वादिति, तस्या एकान्तेना भेदावसायरूपत्वादिति पाठद्वयं दृश्यते। तत्र द्वितीयपाठो युक्तः। अर्थसंगतेः। प्रथमपाठस्तु शब्दाशुद्ध्याऽर्थानवगत्याचायुक्तः।

एतदग्रे—भेदानुस्यूतस्येति, भेदानुस्कृतस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीय पाठस्तु शब्दाशुद्ध्याऽर्थानवगत्या चायुक्तः।

एतदग्रे—तत्र ग्रहणादिति, ग्रहणादिति पाठद्वयं दृश्यते। तत्राद्य पाठोयुक्तः, देशविशेषनिर्देशस्यात्रौचित्यात्। अत एव द्वितीयपाठो न युक्तः।

एतदग्रे—समूहावग्रहे हि समूहिनामनावृत्ता इति, सपूहावग्रहेऽपि हि नामना वृता इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाशुद्ध्याऽर्थानवगत्या चायुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—सामान्यं गृह्णाति इति, सामान्यस्यैव गृह्णाति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु कर्मणः सम्बन्धित्वविवक्षया षष्ठीमभ्युपेत्य समर्थनीयः। तत्रापि एवकारो व्यर्थः।

एतदग्रे—पूर्वं भेदमिति, पूर्वभेदमिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः। प्रतिपत्तेः पूर्वकालिकत्वस्यात्र विवक्षितत्वात्। तच्चात्र पाठे दुर्लभम्।

एतदग्रे—प्रतिपद्येति, प्रतिपाद्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। समानकर्तृकत्वात्। द्वितीयपाठस्तु तदभावादयुक्तः।

अनुप्रवृत्तेति यथा ॥ ८९ ॥

इति कारिकाया अवतरणिकायां हेलाराजीये—व्यतिरिक्त जातिदर्शनमिति, व्यक्ति व्यतिरिक्तजातिदर्शनमिति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—अव्यतिरिक्तजातिदर्शनमिति, व्यक्तिजातिदर्शनमिति पाठद्वयं दृश्यते तदुभयं युक्तम्, अर्थसंगतेः।

एतदग्रे—काल्पनिकं जातिदर्शनमिति, काल्पनिकजातिदर्शनमिति पाठद्वयं दृश्यते। तदुभयं युक्तम्, अर्थसंगतेः। अस्यां कारिकायां—यथा भिन्ना इत्यत्र अभिन्ना इति पदच्छेदः कार्यः। अत्र कारिकायां - यथाऽभिन्ना इति, यदाऽभिन्ना इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः उत्तरार्धे तथा इति परामर्शात्।

अत्र कारिकायां तृतीयेपादे—अर्थो व्यावृत्तरूपोऽपि इति अर्थे व्यावृत्तरूपोऽपि इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठे तु अर्थासंगतिः।

एतत्कारिकाव्याख्याने हेलाराजीये—इहाभिन्नप्रत्ययावसेया इति. इहभिन्नप्रत्ययावसेया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः. अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। नहि भिन्नप्रत्ययावसेया जातिर्भवति इति।

अत्रैव—इहाभिन्नप्रत्ययावसेया इति. इहाभिन्नप्रत्ययावसाया इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः वर्तिपदार्थप्राधान्यात्। द्वितीयपाठे तु अन्यपदार्थप्राधान्यम्। व्यधिकरणबहुव्रीहिश्चेति दोषद्वयम्।

एतदग्रे—गौरिति इति, गौरीति इति पाठद्वयं दृश्यते। तत्राद्य पाठः प्रकृतोपयुक्त इत्युपादेयः। द्वितीयपाठस्तु प्रकृत्तानुपयुक्त इति हेयः।

एतदग्रे—प्रत्यर्थनियतत्वादिति, प्रत्यर्थिनियतत्वादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—भिन्नाऽपि सती इति, भिन्नोऽपिति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। शव्दाशुद्धिरप्यत्र।

एतदग्रे—गोत्वादिज्ञानत्वाद्यस्ति इति, गोज्ञानत्वाद्यस्ति इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठे तु द्रव्यजातेरनिर्देशादर्थासंगतिः।

एतदग्रे—बुद्धिष्वपरसामान्यस्येति, बुद्धिष्वेव परसामान्यस्येति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—यतश्चानादिकालीनभेदावग्रहसामर्थ्यप्रतिघातनिमित्तविभ्रमवशादिति, यतश्चानादिकलीलीनभेदावग्रहसामर्थ्यप्रतिघातनिमित्तविभ्रमवशादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः, द्वितीयपाठस्तु शब्दाशुद्धयाऽर्थानवगत्या चायुक्तः।

एतदग्रे – बुद्धीनामभेदावसाय इति, बुद्धीनां भेदावसाय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—भविष्यतीति भेद एवेति, भविष्यत्येव भेद इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या हेयः।

एतदग्रे—सौगता इति, सौभामा इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, प्रसिद्धेः। द्वितीयपाठस्तु अप्रसिद्धयाऽयुक्तः। अत्रैव—अभेदावसायो मिथ्येति, भेदावसायो मिथ्येति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, बौद्धानां भेदवादित्वात्। द्वितीयपाठस्तु अत एव अयुक्तः।

सरूपाणाञ्च सर्वेषामिति ॥ १०० ।

कारिकाया अवतरणिकायां हेलाराजीये—किमनादिकालीनविभ्रमवशादेवायम्, उत बहिरस्याभेदावसायस्य किञ्चन निमित्तमस्तीति, किमनादिकालीनविभ्रमवशादेवायमुजबहिरप्यवस्थाभेदावसाय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च। द्वितीय पाठस्तु उभयासंगत्याऽसंगतः।

अस्याः कारिकाया द्वितीयेपादे—न भेदोपनिपातिनः इति, न भेदोपनिपातित इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः अर्थसंगतेः। द्वितीयपाठे तु अनन्वयोऽर्थासंगतिश्च।

अस्या एव कारिकायाश्चतुर्थे पादे—नापि भेदोऽवधार्यते इति, नापि नापि वेधो न धार्यते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठे तु अर्थासंगतिः।

एतत्कारिकाव्याख्याने हेलाराजीये—प्रख्योपाख्यात्मक इति, स्वरूपात्मक इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः द्विविधव्यवहारस्य अग्रे उपदर्शनात्। अत एव द्वितीय पाठो न युक्तः।

एतदग्रे—रूपमेषामिति, रूपं येषामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अयुक्तः, अग्रे यच्छब्दार्थस्य तत्पदेनापरामर्शात्।

एतदग्रे—वास्तवस्यभेदस्यानवधारणादिति, वास्तवस्यानवधारणादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, विशेष्यनिर्देशात्। द्वितीयपाठे तु तदभावो दोषः।

एतदग्रे—दुरवधारभेदत्वेन इति, दुरवधारेण तत्त्वेन इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु तदभावादयुक्तः।

एतदग्रे—सादृश्यनिबन्धन इति, सादृश्यलक्षण इति पाठद्वयं दृश्यते। तत्राद्य पाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु ; अर्थासंगत्याऽयुक्तः। अत्रैव—सादृश्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निबन्धनोऽभेद व ····उपाख्या इति पाठो दृश्यते । स तु अशुद्धोऽर्थानवबोधकश्च ।

एतदग्रे—असाधारणभावरूपनिवेशिसंविज्ञानपदाभावादिति, असाधारण भावरूपनिवेशे संविज्ञानपदाभावादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः द्वितीयपाठस्तु तदभावादयुक्तः ।

एतदग्रे—वाचकाभावोऽवगत इति, वाचकाभावोऽपगत इति, वाचकाभावोऽपि गम्यते इति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । तृतीयपाठे तु अपिशब्दो व्यर्थः ।

एतदग्रे—अभेदाध्यवसायानुविधायिन एवेति, अभेदाध्यवसायगनुविधायिन एवेति, पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः अर्थसंगतेः । द्वितीयपाठे तु शब्दाशुद्धिः ।

एतदग्रे—तत्रापीतिदर्शयितुमिति, तत्रापि निदर्शयितुमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—विशेषाणामिति, विशेष्याणामिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । अत्रैव—विशेषाणामविवेचनादिति, विशेषाणामपि वचनादिति, विशेषाणामपि चेतनादिति पाठत्रयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयतृतीयपाठौ तु अर्थासंगत्याऽयुक्तौ । विशेष्याणामविवेचनादिति चतुर्थपाठोऽपि क्वचिद्दृश्यते । सोप्यर्थासंगत्याऽयुक्तः ।

एतदग्रे—वाचकाभावादिति, वाचकभावादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—शब्दप्रवृत्तिरिति, शब्दः प्रभृति इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—न तु बहिर्वस्तुभूतं सामान्यमिति, न भूतं सामान्यमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—किञ्चनात्र निमित्तमिति, विमुक्तनिमित्तमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

ज्ञानशब्दार्थ विषया इति ॥१०१॥

कारिकाया अवतरणिकायां हेलाराजीये—व्याप्तिर्ह्यत्रोक्ता इति, व्याप्तिरत्रोक्ता इति पाठद्वयं दृश्यते । तदुभयं साधु, अर्थसंगतेः ।

एतत्कारिका व्याख्याने हेलाराजीये—विषयभेदाद्भेदोन्याय्योऽप्यर्वाग्दर्शिनो गौगौरित्यभेदावसायादिति, विषयभेदाद्भेदोन्वाख्यापूर्वादशने गौरीत्येवमभेदावसायादिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः । अत्रैव—अर्वागदर्शिन इत्यस्यस्थाने—अर्वाग्दर्शने इति पाठो दृश्यते । स तु अयुक्तः । अत्रैव—गौरित्येवमभेदेनावसायादिति पाठोऽपि क्वचिद् दृश्यते । स तु युक्त एव अर्थसंगतेः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदग्रे—एकत्वमसदध्यारोपितमिति, एकत्वमध्यारोपितमिति पाठद्वयं दृश्यते। तदुभयमपि साधु, अर्थसंगतेः।

एतदग्रे—अनुनासिकतादीनां धर्माणामिति, अनुनासिकादीनां धर्माणामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः, भावप्रधाननिर्देशो वा, व्यधिकरणषष्ठी वा।

एतदग्रे—धर्माणाम्भेदादिति, धर्माणाम्भेदेऽप्यभेदादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे शब्दानां न किञ्चिदिति, शब्दानां किञ्चिदिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्त, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अथाभेदेनावसीयन्ते इति, अथभेदेनावसीयते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—अर्थानामपि खण्डमुण्डादिरिति, अर्थानां खण्डमुण्डादिरिति पाठद्वयं दृश्यते। तत्र अपिशब्दपाठोऽत्यन्तमावश्यकः शब्दानां समुच्चयाय।

एतदग्रे—नादृतोऽर्वाग्दर्शनैरिति, नादृतोवाग्दर्शनैरिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—विजातीयव्यावृत्त्या अन्वयिरूपोल्लेखनादिति, विजातीमान्वपि रूपोल्लेखनादिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु शब्दाऽशुद्धयाऽयुक्तः।

एतदग्रे—न सर्वैर्विविच्यते इति, न सर्वैर्विविच्यन्ते इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः। विशेष इति कर्मणः प्रथमैकवचनान्तत्वात्।

ज्ञानेष्वपि यथार्थेषु इति ॥१०२॥

कारिकायाः प्रथमे पादे—यथार्थेषु इति, यथार्थिषु इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्या हेयः।

अस्या एव द्वितीये पादे—सर्वेषु इति, सर्वेऽपि इपि पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः। अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतत्कारिकाव्याख्याने हेलाराजीये—सर्वत्र जातिसद्भावावेदक इति, सर्वजातिसद्भावावेदक इति पाठद्वयं दृश्यते। तदुभयं साधु, अर्थसगतेः।

एतदग्रे—ज्ञानजातय इति, ज्ञापनजातय इति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, अर्थसंगतेः। द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः।

एतदग्रे—तत्र तत्र प्रमाणसिद्धानामिति, तत्र प्रमाणसिद्धानामिति पाठद्वयं दृश्यते। तत्राद्यपाठो युक्तः, पूर्वत्र—यत्र यत्र इति द्विरुक्तिदर्शनात्। अत एव द्वितीयपाठो न युक्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञेयस्थमेव सामान्यमिति ॥१०३॥

कारिकाया द्वितीये पादे— ज्ञानानामुपकारकमिति, भावानामुपकारकमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्या हेयः ।

एतदग्रे— ज्ञेयवज्ज्ञानमिति, ज्ञेयवज्ज्ञानेन इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठे त्वर्थासंगतिश्च्छन्दोभङ्गश्च । एतत्कारिकाव्याख्याने हेलाराजीये—रूपवत् क्रियते इति, पररूपवत् क्रियते इति पाठद्वयं दृश्यते । तत्राद्य-पाठो युक्तः. अर्थसंगतेः । द्वितीयपाठस्तु न युक्तः, रूप्यते इत्यस्य रूपवत् क्रियते इति व्याख्यानस्यैव औचित्यात् ।

एतदग्रे—संविदात्मसमवेतेन इति, समवेतेनेति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, समवायानुयोगिनो निर्देशात् । द्वितीयपाठस्तु तदभावादयुक्तः ।

एतदग्रे—यत्पररूपेणरूपणमिति, यत्परेणरूपणमिति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—अभदेन तद्भेदावसाय इति, भेदेवसायन इति पाठद्वय दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु आनर्थक्यादयुक्तः ।

एतदग्रे—प्रत्यर्थनियतत्वे इति, प्रत्यर्थनियमवत्त्वे इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, अर्थसंगतेः । द्वितीयपाठस्तु अर्थासंगत्याऽयुक्तः ।

एतदग्रे—एव वैलक्षण्यानुपपत्तेरिति, एवावैलक्षण्यानुपपत्तेरिति पाठद्वयं दृश्यते । तत्र द्वितीयपाठो युक्तः बहिरभिन्नेन निमित्तेन तत्र भाव्यमिति समनन्तर-ग्रन्थानुरोधात् । एतद्ग्रन्थविरोधाच्चाद्यपाठो न युक्तः ।

यथा ज्योतिः प्रकाशेन ॥ १०४ ।

इति कारिकाया अवतरणिकायां हेलाराजीये—पररूपेण न रूप्यते, पररूपेण रूप्यते इति पाठद्वयं दृश्यते । तत्र द्वितीयपाठो युक्तः, अर्थसंगतेः । पररूपेण रूप्यते इत्येव हि उक्तं पूर्वकारिकायाश्चतुर्थे पादे । आद्यपाठस्तु अत एव न युक्तः । अर्थासंगतेश्च ।

एतत्कारिकायाः प्रथमे पादे—यथा ज्योतिः प्रकाशेन इति, यथाज्योति-प्रकाशेन इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, शब्दशुद्धेः । द्वितीयपाठस्तु तदभावादयुक्तः । एतत्कारिकायास्तृतीये पादे—ज्ञानाकारस्तथान्येन इति, ज्ञाना-कारयथान्येन इति पाठद्वयं दृश्यते । तत्राद्यपाठो युक्तः, शब्दशुद्धेरर्थसंगतेश्च । द्वितीयपाठस्तु तदुभयाभावादयुक्तः ।

एतत्कारिकाव्याख्याने हेलाराजीये—

(१) दीपः इति, (२) दीप इति, (३) दीपान्तरं नापेक्षते इति, (४) दीपा-न्तारानापेक्ष्यते इति, (५) आत्मप्रकाशनाय इति, (६) स्वप्रकाशाय इति, (७) प्रकाशकत्वमिति, (८) प्रकाशत्वमिति, (९) प्रकाशकस्याप्रकाशे इति, (१०) प्रकाशस्याप्रकाशे इति, (११) प्रकाशासंचेतने तल्लग्नार्थसंचेतनासिद्धेरिति,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१२) प्रकाशासम्भवेनतल्लाभार्थं संवेदनासिद्धेरिति, (१३) उत्तरकालं तु संवेदनमिति, (१४) उत्तरकालं संचेतनमिति, (१५) उत्तरकालं तु वेदनं क्वोपयोगि इति, (१६) उत्तर काल तु चेतनं कोपयोगी इति, (१७) उत्पन्नायां च इति, (१८) न उत्पन्नायामिति, (१९) आत्मसमवेतस्येति, (२०) तस्य आत्म समवेतस्येति, (२१) प्रकटितोऽर्थ इत्यात्मगामि इति, (२२) प्रकटितार्थ इत्यार्थगामि इति, (२३) पर प्रकाश्यत्वे इति, (२४) पर प्रकाशत्वे इति, (२५) अभेद ग्रहणात्। स्वसमवेत सामान्यवशेन इति, (२६) अस्याभेदनिमित्तं······स्वसमवेत सामान्येति, (२७) अन्यथैवाभेदप्रतिभासस्येति, (२८) अन्यथा वा भेदप्रतिभासस्येति, (२९) नाभिन्न उपपद्यते इति, (३०) नाभिन्न इति, (३१) ज्ञानानामुपकारकमिति, (३२) ज्ञानानामप्युपकारकमिति, (३३) दर्शनान्तर प्रक्रियां ब्रूम इति (३४) दर्शनान्तर प्रक्रिमया ब्रुमः इति।

घटज्ञानमिति ज्ञानम् ॥१०५।

इति कारिकाया अवतरणिकायां हेलाराजीये—३५ घटोऽवसीयते इति, ३६ घटोऽभिधीयते इति, ३७ ज्ञाने घटज्ञानमिति, ३८ न ज्ञाने घटज्ञानमिति, ३९ नाभिधीयेत इति, ४० नाभिधायते इति, ४१ स्वयमज्ञातैव इति, ४२ स्वयमज्ञात्वैव इति, ४३ एतावानस्येति, ४४ तथावानस्येति, ४५ तद्बुभुत्सायामिति, (४६) तब्दुभुक्षणामिति, (४७) बुद्धिमालाऽपि इति, (४८) बुद्धिमात्राऽपि, इति, घटज्ञानमिति कारिकायाः पूर्वम्-इदं कारिकाद्वयं दृश्यते—

न चान्यसमवेतस्य सामान्यस्यावधारणे।
ज्ञानशक्तिसमर्थस्यादृतंस्यावस्तुनः क्वचित् ॥
आयौगपद्ये ज्ञानानामस्येत्यग्राहृणेन च।
यथा घटस्य स्मरणमुपलब्धे च जायते ॥ इति ॥

अत्र कारिकाद्वये द्वितीयकारिकायाः प्रथमे पादे—आयौगपद्ये इति पाठः साधुः, अग्राहृणे इत्यस्य स्थाने अग्रहृणे इति पाठः साधुः।

अस्यार्थः—यथा घटापेक्षया अन्यसमवेतस्य सामान्यस्य पटत्वादेर्ज्ञानशक्तिसमर्थस्य—ज्ञातुं योग्यस्य, क्वचिदपि अवस्तुनः—अवसतः सर्वथा असत्यस्य, विपर्ययबुद्ध्या सत्यतयाऽऽदृतस्य अवधारणे निश्चये सति, यथा च ज्ञानानाम् आ, अतिशयेन यौगपद्ये समूहालम्बनात्मके सति, अस्य ज्ञानस्य विषयीभूतमिदमित्यग्रहृणे च सति घटे उपलब्धे ज्ञाते च सति घटस्य स्मरणं न जायते, तथा ज्ञानाकारोऽन्येन ज्ञानेन नोपगृह्यते इति एतत्कारिका पूर्वकारिकोत्तरार्धेन संबन्धः इति।

घटज्ञानमिति ज्ञानमिति कारिकायाश्चतुर्थे पादे—

(४९) विषयोपनिपाति तत् इति, (५०) विषयोपनिपातितमिति,

अस्या एव कारिकाया व्याख्याने हेलाराजीये—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५१) घटाद्याकारं ज्ञानमिति, (५२) घटाकारं ज्ञानमिति, (५३) प्रत्ययविषयं यत्परामर्शज्ञानमिति, (५४) प्रत्ययविषयतत्परामर्शज्ञानमिति, (५५) तद्घट ज्ञानाद् भिन्नलक्षणमिति, (५६) तद् घटज्ञानभिन्नलक्षणमिति, (५७) साक्षाद् विषयेणाजनितत्वादिति, (५८) साक्षाद् विषयेण जनितत्वादिति, (५९) ज्ञानालम्बना इति, (६०) ज्ञान निबन्धना इति, (६१) न तद् गृह्यते इति, (६२) न तत्र गृह्यते इति, (६३) तज्ज्ञानमिति, (६४) तत् ज्ञाने इति, (६५) अतो न बुद्धिबुद्धिमालम्बते इति, (६६) अतो न इति, (६७) अतो न बुद्धिमालम्बते इति, (६८) ज्ञानं भिन्नमिति, (६९) ज्ञानं ज्ञानभिन्नमिति, (७०) न विषयप्रविष्टमिति, (७१) न विषयाप्रविष्टमिति, (७२) स्वात्मव्यवस्थितमिति, (७३) स्वात्मन्यवस्थितमिति, (७४) सञ्चेत्यते इति, (७५) संवेद्यते इति, (७६) ज्ञानास्तिताया इति, (७७) ज्ञानाऽप्तितायाइति, (७८) बोधत्वाविशेषादिति, (७९) बोधत्वादि शेषादिति, (८०) बोद्धृबोधत्वाविशेषादिति, (८१) यद्यपि ज्ञानज्ञानमिति, (८२) यदपि ज्ञानज्ञानमिति, (८३) घटज्ञानमिति ज्ञानं विषय इति, (८४) ज्ञानं घटज्ञानं विषय इति, (८५) यदेतद् बाह्यविषयमिति, (८६) पदेतद् बोध्यविषयमिति, (८७) घटज्ञानमिति ज्ञानमिति, (८८) इति ज्ञानमिति ज्ञानमिति, (८९) घट ज्ञानमिति तु ज्ञानं न ज्ञानरूपानुपाति इति, (९०) घटज्ञानमिति तु ज्ञानरूपानुपाति, इति (९१) पर संवेदन इवेति, (९२) पर संवेदन पर इवेति, (९३) परेण हि इति, (९४) ज्ञानमुपादाय परेण हि इति, (९५) स्ववत् परस्येति, (९६) स्वस्वरूपस्येति, (९७) उपलम्भात्मकत्वादिति, (९८) उपलभात्मत्वात् इति, (९९) स्वसंवेदनमिति, (१००) स्वयं संवेदनमिति, (१०१) न त्वात्मानमिति, (१०२] न ह्यात्मानमिति,

यतो विषयरूपेण ॥१०६।

इतिकारिकाया अवतरणिकायां हेलाराजीये (१०३ ज्ञानस्य ग्राह्याकारो इति, (१०४) ज्ञानस्य यो ह्याकारो इति, (१०५) स च घटज्ञानमिति, (१०६) ज्ञानस्य ···स च घट इति (१०७) इति बुद्धिरेव इति, (१०८) न बुद्धिरेव इति ।

अस्याः कारिकाया द्वितीये पदे—(१०९) ज्ञानरूपं न इति, (११०) ज्ञानरूपेणेति । तृतीयेपादे १११ अर्थरूपविविक्तञ्चेति, (११२) अर्थरूपं विविक्तञ्चेति, (११३) अथ रूपविविक्तञ्चेति ।

अस्या एव कारिकाया व्याख्याने हेलाराजीये—

(११४) परिहारो लगति इति, (११५) परिहाहोऽत्र लंगयति इति, (११६) ग्राह्यस्वभावेन ज्ञानं ज्ञानान्तरमिति, (११७) स्वभावेन ज्ञानं ज्ञानान्तरमिति, (११८) उपलक्षयति, न तद्रहितमिति, (११९) उपलक्षयति । तद्रहितमिति, (१२०) ज्ञानस्वरूपमिति, (१२१) ज्ञानस्यरूपमिति, (१२२) ज्ञानज्ञानाभिमतमपि विषयनिष्ठमेवेति, (१२३) ज्ञानज्ञानाभिमतविषयनिष्ठमेवेति, (१२४) ज्ञेयताप्रतिपादकत्वेन इति, (१२५) ज्ञेया जातिप्रतिपादिकत्वेन इति, (१२६) तेनैतदचोद्यमिति, (१२७) तेनैतदेव चोद्यमिति, (१२८) तेनैव तदेव चोद्यमिति, (१२९) ज्ञानरूपमर्थं-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रूपविनिर्मिति, (१३०) ज्ञानमर्थरूपविविक्तमिति, (१३१) स्वतोऽप्यस्यसिद्धिर्न स्यादिति, (१३२) स्वतोऽप्यस्य विधिर्न स्यादिति, (१३३) तत्पृष्ठभाविनोऽह्लादनीय प्रकामा इति, (१३४) यत्पृष्ठपातिना उक्तानुरूपा इति, (१३५) तत्प्रविष्ट भाविनो ह्लादतापप्रकामा इति, (१३६) तत्पृष्ठभाविनो भावादतापप्रकामा इति, (१३७) अहंकारस्पदतयेति, (१३८) अनहंकारास्पदतयेति, (१३९) अहंकारास्पदविच्छिन्नग्राह्याकारविधर्माण उत्तररूपा इति. (१४०) विधर्माणोऽन्तर रूपा इति. (१४१) विधर्माणोऽन्त्यरूपा इति, (१४२) संचेत्यन्ते इति, (१४३) संवेद्यत इति, (१४४) गृह्यमाणा अपि इति. (१४५) ग्राह्यमाणा इति, (१४६) प्रमाणपरिशुद्धा इति, (१४७) प्रमाणे परिशुद्धा इति, । पाठा उपलभ्यन्ते । तत्र—

(१) अर्थसंगत्यासाधुः, (२) शब्दाशुद्ध्याऽसाधुः ।

(३) अर्थसंगत्या शब्दशुद्ध्या च साधुः, (४) अर्थासंगत्याऽसाधुः ।

(५) (६) उभयमपि अर्थसंगत्या साधु, (७) (८) इदमपि उभयमर्थसंगत्या साध, (९,१०) इदमप्युभयमर्थसंगत्या साधु ।

(११)विवक्षितार्थावगमकत्वेन शब्दशुद्ध्या च साधुः । (१२) अस्फुटतया क्लेशेनार्थप्रतिपादकत्वादत्र क्लिष्टत्वं दोषः । (१३, १४, १५) एतत् त्रितयमपि विवक्षितार्थप्रतिपादकत्वात् शब्दशुद्ध्या च साधु ।

(१६) शब्दाशुद्ध्या असाधुः, (१७) अर्थसंगत्या साधुः, (१८) अर्थासंगत्याऽसाधुः. (१९) अर्थसंगत्या शब्दशुद्ध्या च साधुः, (२०) तस्येति तत्पदेनबुद्धिस्थस्य ज्ञानस्य परामर्शे क्लेशो दोषः ।

(२१) अर्थसंगत्या साधुः, (२२) अर्थाऽसंगत्याऽसाधुः, (२३) अर्थसंगत्या साधुः (२४) व्यधिकरणबहुव्रीहिः झटिति अर्थस्याप्रतिपत्तिश्च दोषौ । (२५) अर्थ संगत्या साधुः, (२६) अर्थासंगत्याऽसाधुः. (२७) अर्थसंगत्या साधुः, (२८) अयमपि साधुः वाशब्दस्य एवकारार्थत्वात् वा स्याद् विकल्पोमयोरेवार्थेऽपि समुच्चये इत्यमरः ।

(२९, ३०) अर्थसंगत्या उभयं साधु, (३१, ३२) अर्थसंगत्या उभयं साधु, (३३) अर्थसंगत्या साधुः, (३४) शब्दाशुद्ध्याऽसाधुः, (३५) अर्थसंगत्या साधुः, (३६) अर्थाऽसंगत्याऽसाधुः, नहि ज्ञानेन किञ्चिदभिधीयते ।

(३७) अर्थ संगत्या साधुः, (३८) अर्थासंगत्याऽसाधुः, न ह्यस्मिन्पाठे को ह्यत्रविशेष इत्यनेनान्वयः सम्भवति । (३९) अर्थसंगत्या साधुः, (४०) शब्दाशुद्ध्याऽर्थासंगत्या चापि असाधुः, नानुभूयेत इत्यत्र लिङो दर्शनादत्राऽपि लिङेव युक्तः ।

(४१) अर्थसंगत्या साधुः, (४२) अर्थासंगत्याऽसाधुः, (४३) अर्थसंगत्या साधुः (४४) शब्दाशुद्ध्याऽर्थासंगत्या चासाधुः । (४५) अर्थसंगत्या साधुः, (४६) शब्दाशुद्ध्याऽर्थाऽसंगत्या चासाधुः, (४७) अर्थसंगत्या साधुः (४८) अर्थाऽसंगत्याऽसाधुः, (४९) अर्थसंगत्या साधुः, शब्दशुद्धिरप्यत्र ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[५०] अर्थासंगत्या शब्दाशुद्धया चासाधुः, [५१, ५२] अर्थसंगत्या शब्दशुद्धया चोभयं साधु। [५३] अर्थसंगत्या साधुः, [५४] अर्थासंगत्याऽसाधुः, अग्रेऽपि तत्पददर्शनाच्च [५५, [५६] उभयमर्थसंगत्या साधु, [५७] अर्थसंगत्या साधुः [५८] अर्थासंगत्याऽसाधुः [५९, ६०] अर्थसंगत्या उभयं साधु, निबन्धनम्—आलम्बनतया निमित्तम्।

[६१, ६२] अर्थ संगत्या उभयं साधु, [६३] अर्थसंगत्या साधुः, [६४] अर्थासंगत्याऽसाधुः, [६५] अर्थसंगत्या साधुः। [६६] पदान्तराकाङ्क्षत्वेनान्वय बोधाजनकत्वादसाधुः। [६७] बुद्धिरित्यध्याहारेण साधुः, [६८] अर्थसंगत्यासाधुः, [७०] अर्थसंगत्यासाधुः।

[७१] अर्थासंगत्याऽसाधुः. [७२, ७३] अर्थसंगत्या उभयं साधु, [७४, ७५] अर्थसंगत्या उभयं साधु, [७६] अर्थसंगत्या साधुः। अत्र विषयप्रकाशनज्ञानास्तित्वयोर्व्यतिरेकोदर्शितः। (७७) अर्थासंगत्याऽसाधुः, (७८) अर्थसंगत्या साधुः, (७९) अर्थासंगत्याऽसाधुः, (८०) अर्थसंगत्या साधुः, (८१) अयमसाधुः. अग्रे तदपि इति दर्शनात्।

(८२) अर्थसंगत्या साधुः, (८३) अर्थसंगत्या साधुः (८४) अर्थासंगत्याऽसाधुः। (८५) अर्थ संगत्या साधुः, (८६) अर्थासंगत्याऽसाधुः (८७) अर्थसंगत्या साधुः, (८८) अर्थासंगत्याऽसाधुः, (८९) अर्थसंगत्या साधुः. (९०) अर्थासंगत्याऽसाधुः, (९१) अर्थसंगत्या साधुः, (९२) अर्थासंगत्याऽसाधुः, (९३) अर्थसंगत्या साधुः। (९४) अर्थसंगत्या अयमपि साधुः, ज्ञानमुपादाय इत्यस्य—परज्ञानं कथञ्चिच्चेष्टादिना अनुमायेत्यर्थः।

(९५) अर्थसंगत्या साधुः, (९६) अर्थासंगत्याऽसाधुः (९७) अर्थसंगत्या साधुः, (९८) शब्दाशुद्धयाऽर्थाप्रतीत्या चासाधुः। (९९. १००) उभयं साधु अर्थसंगतेः, (१०१, १०२) उभयं साधु अर्थसंगतेः, (१०३, १०४) उभयं साधु अर्थसंगतेः, (१०५) अर्थसंगत्या साधुः, (१०६) अर्थासंगत्याऽसाधुः, (१०७) अर्थ संगत्या साधुः। यद्यपि अत्र बुद्धिरेव संवेदित्री इति वक्तमुचितम् तथाऽपि उद्देश्यविधेयभावविपर्ययेण संवेदितुरुद्देश्यत्वं बुद्धेश्च विधेयत्वमादायेदमुपपद्यते।

[१०८] अर्थासंगत्याऽसाधुः, [१०९] अर्थसंगत्या साधुः, [११०] अर्थासंगत्याऽसाधुः, [१११] अर्थ संगत्या साधुः। [११२,११३] अर्थासंगत्याऽसाधू [११४] अर्थसंगत्या शब्दशुद्धया च साधुः। (११५) शब्दाशुद्धयाऽर्थासंगत्या चासाधुः, [११६] अर्थसंगत्या साधुः, [११७] अयमसाधुः, निर्विशेषे स्वभावे ज्ञानान्तरोपलक्षकत्वासंभवात्। [११८] अर्थसंगत्या साधुः, [११९] अर्थासंगत्याऽसाधुः। [१२०,१२१] उभयं साधु, अर्थ संगतेः। (१२२) अर्थसंगत्या साधुः. [१२३] समासे विधेयाविमर्शरूपोऽत्र दोषः।

(१२४) अर्थ संगत्या साधुः, (१२५) अत्र ज्ञेय जाति प्रतिपादकत्वेन इति पाठः साधुः। (१२६) अर्थसंगत्या साधुः; एतदित्यस्य इतरेतराश्रयरूपं दूषणमित्यर्थः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१२७,१२८) अर्थासंगत्या उभयमसाधु, (१२९,१३०) अर्थसंगत्या उभयं साधु, (१३१) अर्थसंगत्या साधुः। (१३२) अत्र अज्ञातज्ञापनरूपस्य विधिपदार्थस्य न तथा झटिति प्रतीति र्यथा चोदनारूपस्य, एवञ्च विवक्षितार्थबोधनेऽत्र क्लेश-रूपो दोषः।

(१३३) अर्थ संगत्या साधुः, तथाहि—ह्लादनीयप्रकामा इत्यत्र कर्मधारयः। ह्लादनीया इत्यस्य ह्लादका इत्यर्थः, बाहुलकात् कर्तरि अनीयर् प्रत्ययः। प्रकाम-इत्यस्य प्रकर्षेण काम्यन्ते इत्यर्थः, बाहुलकात् कर्मणि घञ्। (१३४,१३५,१३६) एते त्रयोऽपि अर्थासंगत्याऽसाधवः; (१ ७) अर्थसंगत्या साधुः, (१३८) अर्थासंगत्याऽसाधुः,—अहंकारास्पदतयैव ज्ञानरूपस्यात्मनो विज्ञानवादिनये संचेत्यमानत्वात्।

(१३९) अर्थसंगत्या साधुः, अहंकारास्पदेन विच्छिन्नो यो ग्राह्याकारस्तद् विधर्माण इत्यर्थः, वैधर्म्यञ्चेदन्ताहंताभ्याम्। (१४०,१४१) उभमपि अर्थासंगत्याऽसाधु। (१४२) अर्थसंगत्या साधुः, (१४३) संवेद्यन्ते इति बहुवचनान्तपाठः साधुः, (१४४) अयं पाठोऽर्थसंगत्या साधुः। (१४५) अत्र ग्रहणचोदनाया असंगत्याऽयं पाठोऽसाधुः, (१४६) अर्थसंगत्या साधुः, (१४७) प्रमाणेन परिशुद्धा इति पाठः समुचितः सत्सप्तमी स्वीकारे तु अत्रोल्लिखित पाठोऽपि साधुः।

इति श्रीब्रह्मीभूतकाशीनाथतनयरघुनाथकृतौ पाठभेदनिर्णये
जातिसमुद्देशः समाप्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon